S
016.091
H254n
v.6

Acc. No. B4082
dt. 24.6.87.
Sl no. 83260

# NOTICES OF SANSKRIT MSS.

**No. 1983.** शैवसर्वस्वसारः । Substance, palm-leaf, 11 × 1½ inches. Folia, 130. Lines, 5 on a page. Extent, 2,507 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magrání, Post Madhubaní, Darbhangá, Paṇḍit Kánái Jhá. Appearance, old, decayed. Prose and verse. Correct.

**S'aiva-sarvasva-sára.** A digest of the rules for the adoration of S'iva. By Vidyápati. Compiled by order of Queen Visvása Deví, wife of Rájá Padma Siñha, of Mithilá. Padma Siñha was the son of S'iva Siñha, grandson of Deva Siñha, and great-grandson of Bhava Siñha. There is an inscription of S'iva Siñha, dated 293 of Lakshmaṇa Sena's era, and Vidyápati flourished in his time, as also in that of his son. Contents: Greatness of S'iva; unity of Hari and Hara; characteristics of the worshippers of S'iva; devotion defined; merits of pilgrimage to visit liñgams; merits of visiting ditto; merits of touching ditto; ditto of cleaning the temple of ditto; rules for adopting the worship of ditto; ditto of throwing away the offerings made to S'iva; measures of articles to be used for applying on the body of ditto; rules for making ditto; merit of smearing liñgams with clarified butter; ditto of pouring water on ditto; ditto curds, milk, clarified butter, and water in which *kusa* grass has been steeped; pouring ditto from golden and other vases; ditto of pouring a continuous stream of milk, &c., in summer; ditto of dancing, &c. at the three daily services; ditto of music from the mouth; ditto of singing; ditto of worship; ditto of ditto at the three stated times daily; ditto of worship at midnight; ditto of worshipping S'iva under different forms; worship with a large number of articles; rules of worshipping daily after morning ablutions; worship for twenty days together; ditto for four months; ditto at auspicious times; formation of liñgams with clay; worship of ten million liñgams; merits of worship-

ping lingams made of salt; ditto ditto of crystal or pearl; vessel for offering *arghyas;* offering of essences; ditto of *arka* flowers; ditto of oleander and *droṇa* flowers; proper flowers for offerings; merits of offering Datura flowers along with bilva leaves; ditto of surrounding the seat of lingams with garlands; ditto of making flower pavilions for lingams; ditto of worship with golden flowers; ditto of offering particular kinds of flowers on particular months; ditto of burning incenses; ditto of lamps; oil lamps may be offered if clarified butter be not available; ditto ditto lamps arranged in the form of a tree; ditto of lamps during the month of Kártika; ditto of ripe plums; ditto of the juice of sugarcane and molasses; ditto of flesh-meat; ditto of boiled rice, &c.; ditto of gold; ditto of singing by females; ditto a cow with a calf; ditto of kine, elephants, villages, districts, &c.; ditto of hanging bells in temples dedicated to lingams; ditto of awnings; ditto of jewels; ditto of flags; ditto of golden vessels; ditto of horses, &c.; ditto of heaps of sessamum seed; merit of waving lamps before lingams; ditto of repeating the mantras of S'iva; ditto of circumambulation; ditto of prostration; ditto of bathing in streams before a temple; ditto of smearing ashes on one's own body; ditto of putting on sectarial marks; ditto of adoration by a hermit; what to abstain from on the part of devotees to S'iva; penance at night; rules regarding the fast on the 14th of the wane in Mágha; worship on the 8th of the wane;—Here the codex breaks off.

**Beginning.** सूर्य्याचन्द्रमसौ दृशौ तदुपरि ज्योतिर्म्मयं दर्शनं
विभ्राणो गण्डयविव + समधं विश्वैकवीजं विभुः।
धत्ते यः शिरसा सुधाकरकलामेकाक्षमुद्रामयीं
देयादभ्युदयं त्रिकालविदयं देवो भवानीपतिः॥
गङ्गोत्तुङ्गतरङ्गि + + मलयत् कीर्त्तिच्छटाचालित
घोणिच्छातलसर्व्वपर्व्वतवरो वीरव्रतालङ्कृतः।
भूपालावलिमौलिमण्डलमणिप्रत्यर्च्चिताङ्घ्रिद्वया-
म्भोजश्रीभवसिंहभूपतिरभूत् सर्व्वार्थकल्पद्रुमः॥
तस्माद्दुर्व्वारवैरिद्विपकुलदलनाकण्ठकण्ठीरवश्री-
राशीमाशेषद्भूभृन्मणिमुकुटतटज्योतिरुद्योतिताङ्घ्रिः।
तत्सूनुः पुण्यकीर्त्तिर्न्नयविनयदयादानदाक्षिण्यदक्षो
दक्षः सर्व्वाश्रितानां क्षितितलभुवि नृपो देवसिंहो बभूव॥

दत्तं येन द्विजेभ्यो द्विरदरथमहाग्राममुख्यैरसंख्यं
का वार्त्ता त्वन्यदाने कनकमयतुलापूरुषो येन, दत्तः ।
यस्य क्रीडासडागसुलयति स + + शासने वारिराशिं
देवोऽसौ देवसिंहः क्षितिपतितिलकः कस्य न श्लाघनीयः ॥
क्षोणीभर्त्तुरमुष्य वैरिवनिता वैदग्ध्यदीक्षागुरो-
रुद्भूतः शिवसिंहदेवनृपतिर्व्वीरावतंसः सुतः ।
शौर्य्यावर्ज्जितगौडगज्जनजनद्वीपालोपनयीकृता-
नेकोत्तुङ्गमतङ्गजाश्वकनकश्लाघाभिरामोदयः ।
संग्रामाङ्गणभीमभीमसदृशस्तस्यानुज + + +
दानस्वर्ज्जितकल्पवृक्षमहिमाऽसौ पद्मसिंहो नृपः ॥
कैलासोदरसोदरीयति शरच्छ्राकाशशाङ्कीयति
प्रालेयाचलमेखलीयति यशो यस्यारविन्दीयति ।
विद्यामङ्गिरसः सुतस्य विनयं रामस्य वृत्तं मुनेः
शौर्य्यं सूर्य्यसुतस्य धैर्य्यमचलस्येगाम्भीर्य्यमम्भोनिधेः ।
दानं दानवनन्दनस्य सकलं सारं समु + + ता
धाता यः शरदिन्दुसुन्दरयशाः क्षोणीपतिर्न्निर्म्मितः ॥
दुग्धाम्भोधेरिव श्रीर्गुणगणमहसि विश्वविख्यातवंशे
सम्भूता पद्मसिंहक्षितिपतिदयिता धर्म्मकर्म्मैकसीमा ।
पत्युः सिंहासनस्था पृथुमिथिलमहीमण्डलं पालयन्ती-
श्रीमद्विश्वासदेवी जगति विजयते चर्य्ययारुन्धतीव ॥
इन्द्रस्येव शची समुज्ज्वलगुणा गौरीव गौरीपतेः
कामस्येव रतिः स्वभावमधुरा सीतेव रामस्य या ।
विष्णोः श्रीरिव पद्मसिंहनृपतेरेषा परा प्रेयसी
विश्वख्यातनया द्विजेन्द्रतनया जागर्त्ति भूमण्डले ॥
दातारः कति नाभवन् कति न वा सन्तीह भूमण्डले
नैकोऽपि प्रथितः प्रदानयशसो विश्वासदेव्याः समः ।
यस्याः स्वर्णतुलामुखाखिलमहादानप्रदाना,न +
स्वर्ण + + स्वर्गीदृशामपि तुलाकोटिध्वनिः श्रूयते ॥
लीलालोल बनाली + चनिचयदलद्वीचिविस्तारभार-
प्रख्यातोन्मज्जमानामरतरसरद्धंससन्दोहवाङ्कः ।
पुण्यान् पुण्यौघमालाकुलकलितलसद्भृङ्गसङ्गीतसर्व्वी

श्रीमद्विश्वासदेव्या समस्तविरचितो विश्वभागस्तडागः ॥
नित्यं देवद्विजार्थं द्रविणवितरणारम्भसम्भावितश्री-
र्धर्मज्ञा चन्द्रचूडप्रतिदिवससमाराधनैकाग्रचित्ता ।
विज्ञानज्ञाप्यविद्यापतिकविनसमो विश्वविख्यातकीर्त्तिः
श्रीमद्विश्वासदेवी विरचयति शिवं शैवसर्वस्वसारं ॥
प्रमाणमूला नवपल्लवाढ्या सपुष्पिका रम्यफलोपपन्ना ।
अभीष्टसिद्धौ विबुधैरुपेया वाक्यावली कल्पलतेव शम्भोः ॥

तत्रादौ शिवमाहात्म्यं । स्कन्दपुराणे । इत्यादि ।

**End** एवं मासान्तरेष्वपि विहितद्रव्यविशेषं निशि प्राशनाहारः स्वपेत् । यत्रापि कृष्णा-ष्टमी न श्रुता निशाकालस्य न श्रुतस्तत्रापि—

**Colophon.** इत्यतः खण्डितत्वात् परिसमाप्तिसूचकं वाक्यं नास्तीति ज्ञेयम् ।

विषयः । शिवमाहात्म्यकीर्त्तनं । हरिहराद्वैतनिरूपणं । शिवभक्तलक्षणकथनं । भक्तिनिरूपणादिकम् । शिवदर्शनार्थं यात्राफलकथनं । शिवदर्शनमाहात्म्यकीर्त्तनं । स्पर्शनमाहात्म्यकीर्त्तनं । शिवालयसम्मार्ज्जनमाहात्म्यकथनं । शैवस्य सङ्कल्पविधिकथनं । शिवनिर्म्माल्यापनयनमाहात्म्यकथनं । अभ्यङ्गादौ द्रव्यमानादिपरिभाषा । शिवलिङ्गनिर्म्माणादिविधिः । घृताभ्यङ्गफलं । उद्वर्त्तनफलं । दधिदुग्धघृतकुशोदकादिना स्नपनफलं । हेमादिघटेन स्नपनविधिकथनादिकं । ग्रीष्मकालिकपयोधारादिपतने फलादिकथन । शिवपूजाकाले त्रिसन्ध्यनृत्यादिफलकथनं । मुखवाद्यफलकथनं । गीतफलकथनं । पूजाफलकथनं । त्रिसन्ध्यापूजाफलकथनं । अर्द्धरात्रे पूजाफलकथनं । महादेव-विरूपाक्ष-रुद्रादिमूर्त्तिभेदपूजामाहात्म्यकथनं । महोपचारपूजाविधानं । स्नानोत्तरप्रात्यहिकप्रातःपूजनविधिः । विंशतिदिवसाधिकरणकशिवपूजाविधिः । एवं चातुर्म्मास्यार्चनादौ विधानकथनं । पुण्यकालविशेषे शिवार्चनफलकथनं । पार्थिवशिवलिङ्गनिर्म्माणविधानादिकथनं । लक्षसंख्यकादिशिवलिङ्गपूजाफलं । लवणमयादिलिङ्गपूजाफलं । स्फाटिक-मुक्तामयादिलिङ्गपूजनफलं । अर्घ्यपात्रनिरूपणादिकं । गन्धदानादिविधिकथनं । अर्कपुष्पदानमाहात्म्यकथनं । करवीरद्रोणादिपुष्पदानफलं । विहितपुष्पनिरूपणं । बिल्वपत्रेण सह धुस्तूरपुष्पदानमाहात्म्यकीर्त्तनं । मालाभिर्व्विदियेष्टनस्य माहात्म्यकथनं । पुष्पमण्डपमाहात्म्यकथनं । सुवर्णकुसुमादिना अर्चनस्य फलादिकथनं । मासविशेषे पुष्पफलविशेषेण पूजाया माहात्म्यकीर्त्तनं । अगुरुगुग्गुल्वादिधूपदानफलकथनं । दीपदानफलकथनं । घृताभावे तैलदीपदानफलकथनं । दीपवृक्षदानमाहात्म्यकथनं । कार्त्तिकमासीयप्रत्यहदीपदानविधानादिकथनं । पक्वबदरादिफलदानफलकथनं । इक्षुरस-फाणितादिदानफलकथनं । मांसादिदानमाहात्म्यकथनं । अन्नादिदानफलकथनं । अत्र सर्व्वत्र शिवमुद्दिश्य दानमिति ज्ञेयं । तथा शिवमुद्दिश्य हिरण्यदानविधिः । स्तोत्रकर्त्तृकसङ्गीतश्रावणफलकथनं ।

उभयतोमुखीदानफलकथनं। गोगजादिदाने वृषभादिदाने च प्रत्येकं फलकथनं। ग्रामनगरदेशादिदानफलकथनं। शिवालये घण्टाबन्धनफलकथनं। वितानादिदानमाहात्म्यकथनं। रत्नादिदानमाहात्म्यकीर्त्तनं। शिवालये ध्वजादिदानमाहात्म्यकथनं। हेमपात्रादिदानफलकथनं। गजाश्वादिदानमाहात्म्यकथनं। तिलप्रस्थादिदानफलकथनं। आरात्रिकमाहात्म्यकथनं। शैवमन्त्रजपादिमाहात्म्यकीर्त्तनं। प्रदक्षिणफलकथनं। प्रणामफलकथनं। शिवसमीपस्थप्रस्रवणे स्नानफलकथनं। भस्मस्नानादिमाहात्म्यकथनं त्रिपुण्ड्रादिधारणफलकथनं। तपस्विपूजादिफलकथनं। शिवभक्तेन वर्ज्जनीयकथन। नक्तव्रतविधानकीर्त्तनं। शिवरात्रिव्रतविधिकथनं। कृष्णाष्टम्यां शिवपूजनविधिकथनं।

---

**No. 1984** प्रायश्चित्तकौमुदी, वा प्रायश्चित्तविवेकटिप्पनी। Substance, country-made paper, 16 × 3 inches. Folia, 64. Lines, 6 on a page. Extent, 1,417 s'lokas. Character, Bengali. Date, ? Place of deposit, Magrání, Post Madhubaṇí, Darbhángá, Paṇḍit Kanái Jhá. Appearance, old. Prose. Correct.

**Práyśchitta-kaumudí** alias **Práyśchitta-viveka-ṭippaní**. A commentary on S'úlapáṇi's digest of the rules regarding expiations. By Rámakṛishṇa Bhaṭṭáchárya.

**Beginning.** हरिं प्रणम्य मेघाभं पङ्कजेन्दनिवर्त्तनं।
तन्यते रामकृष्णेन प्रायश्चित्ताख्यकौमुदी ॥

प्रेक्षावतां प्रवृत्तये ग्रन्थस्य प्रयोजनाभिधेये अभिधीय अभिधानश्चाह नित्येत्यादि। यद्यपि मङ्गलाचरणमादौ ग्रन्थकर्त्तुरुचितं तथापि ज्योतिरागमादिना विघ्नव्यतिरेकनिश्चयेन—इत्यादि।

**End.** अथ तु मासानीत्यत्र मासस्य विशेषणत्वादन्यत्रान्वयसम्भावनैव नास्ति किमेतया फक्किकया इति।

**Colophon.** इति महामहोपाध्यायश्रीरामकृष्णभट्टाचार्य्यविरचितेयं प्रायश्चित्तविवेकटिप्पनी समाप्ता।

विषयः। शूलपाणिकृतप्रायश्चित्तविवेकस्य व्याख्यानं।

---

**No. 1985.** आख्यातवादव्याख्यारहस्यं। Substance, country-made paper, 14 × 4 inches. Folia, 28. Lines, 8 on a page. Extent, 868 s'lokas. Character, Maithilí, Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá. Appearance, old. Prose. Correct.

**A'khyátaváda-vyákhyá-rahasya.** A gloss on the A'khyátaváda, of the author. By Raghudeva Bhaṭṭácbárya.

**Beginning.** प्रणम्य श्रीरघुनाथं + + म गुणमन्दिरं ।
आख्यातवादमद्व्याख्या रघुदेवेन तन्यते ॥
सम्प्रदायाख्यातवादस्य मम ग्रन्थविलोकनैः ।
लीलयाख्यापनं धीराः कुर्व्वन्तु निर्ब्बिता अपि ॥
नैयायिकः परमतं निराकर्त्तुं प्रथमतः तन्निरूपयति आख्यातस्येति ।

**End.** प्रमत्वादिति लक्षणादिना उपपादने तु लाघवेन तर्कस्यैव शरणीकरणीयत्वादिति भाव इति दिक् ।

**Colophon.** इति महामहोपाध्यायश्रीरघुदेवभट्टाचार्य्यविरचितमाख्यातवादव्याख्यारत्नं परिपूर्णमिति ॥

विषयः । आख्यातवादस्य व्याख्यानं ।

---

**No. 1986.** शक्तिवादविवरणं । Substance, country-made paper, 12 × 3 inches. Folia, 62. Lines, 6 on a page. Extent, 1,372 s'lokas. Character, Nágara. Date, ? Place of deposit, Magrání, Post Madhubaní, Darbhángá, Pandit Kánái Jhá. Appearance, fresh. Prose. Correct

**S'aktiváda-vivarana.** A commentary on the S'aktiváda of Gadádhara. By Krishna Bhatta, son of Ranganátha Suri, and brother of Náráyana.

**Beginning.** श्रीकृष्णचरणौ नत्वा शक्तिवादार्थदीपिकां ।
करोति सम्प्रदायेन कृष्णभट्टो मुदे सतां ॥
सङ्केतोऽभिधारूपवृत्तिग्राहक इति मीमांसकमतं । लक्षणा च शक्तिरेव इति वैयाकरणमतं । तदुभयं कटाक्षयन्नाह सङ्केत इति । अत्र तीरं गङ्गापदार्थसम्बन्धि न गङ्गापदार्थ—इति ज्ञानेऽपि गङ्गायां घोष इत्यादितः शाब्दबोधोदयात् सङ्केतमात्रेणोपपत्तितो न लक्षणातिरिक्तवृत्तिः स्वीकार्य्येत्यभिप्रायेणाह लक्षणा चेति । इत्यादि ।

**End.** पर्य्यायताज्ञानस्य न्यायादिमते द्वयोः पदयोः तद्धर्मावच्छिन्नशक्तिमत्त्वज्ञानादिरूपत्वात् तत्कालीनस्य विशिष्टशक्तिज्ञानस्य सर्व्वमते लोमसत्वविशेष्यकलोमप्रकारकज्ञानजनकतया भवन्मते तदनुपपत्तेः । + + + + पर्य्यायत्वभ्रमस्य पशुपदं लोमवच्छक्तमित्याकारतया लोमसत्वविशेष्यकशाब्दबोधे बाधकाभावादिति ।

**Colophon.** इति श्रीरङ्गनाथसूरिसूनुनारायणानुजकृष्णभट्टविरचितं शक्तिवादविवरणं सम्पूर्णं ।

विषयः । गदाधरभट्टाचार्य्यकृतशक्तिवादस्य व्याख्यानं

---

**No. 1987.** शुभकर्म्मनिर्णयः । Substance, palm-leaf, 12 × 2½ inches. Folia, 100. Lines, 5 on a page. Extent, 1,082 s'lokas. Character, Maithilí. Date, L. S. 584. Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá ; another copy with Chhoṭi Jhá. Appearance, old. Prose and verse. Incorrect.

**S'ubhakarma-nirṇaya.** A digest of the rules regarding the performance of domestic rites according to the ordinances of Gobhila. By Murári Misra. The work was compiled under the auspices of Rájá Trivikramanáráyaṇa, son of Jagannáráyaṇa, grandson of Naranáráyaṇa, great-grandson of Víranáráyaṇa, great-great-grandson of Rúpanáráyaṇa, and great-great-great-grandson of Lakshmináráyaṇa.

**Beginning.** वन्दे नन्दतनूजं जगदालम्बं निरालम्बं ।

सन्देहतिमिरमिहिरं निगममिवेद्यमहः किमपि ॥

दुष्टानामेकशास्ता हरिचरणपरः पौरवर्गस्य पाता
वैरिश्रेणीनिहन्ता द्युतिजितमदनः श्रीप्रभूरिप्रदाता ।
विश्वव्यापिप्रतापस्त्रिजगति विदिते चारु + वङ्गदेशे
लक्ष्मीनारायणाख्यः समभवदवनीपालमालावतंसः ॥

कुमार इव गौरीशात् पारिजात इवाम्बुधेः ।
रूपनारायणो राजा लक्ष्मीनारायणादभूत् ॥

वारं वारमुदारवैभववतामस्यापि भूमीभृतां
द्वारं द्वारमुपेत्य हन्त सहसा भिक्षामलब्ध्वा बुधाः ।
एतस्मिन् समये स चेत्सकरुणः श्रीरूपनारायण—
स्तिष्ठेदित्यभिधाय लोलशिरसः पाणिं क्षिपन्त्यर्थिनः ॥

श्रीवीरनारायणमेदिनीन्द्रः श्रीरूपनारायणभूमिपालात् ।
जातस्ततः सर्व्वगुणैरुपेतो यथा जयन्तो विबुधाधिराजात् ॥

उपास्तु प्रतिवासरमपि प्रतिभटश्रेणीषु तृष्यन्मना
भिक्षुभ्यो मुकुरं ददन्नपि महन्त्यस्त्रायमानात्मनः ।
प्रागल्भ्यस्तथा रिपून् परिभवन्नप्युन्नतान्स्वपो-
धन्यो + जगतीतले भवतु कः श्रीवीरनारायणात् ॥

शिरोरत्नं राज्ञां जननयनराकाहिमकरो-
निवासो धर्म्माणां रणविजयलक्ष्म्याः प्रियतमः ।
अभूदस्मादुराज्ञो नयविनयविद्याबलमति-
श्रियां पारावारः स खलु नरनारायणनृपः ॥

देवस्त्रीगणगीतकीर्त्तिविजितक्षीराब्धिमुग्धद्युति-
र्नित्यानेकसुवर्णदानजनिताशेषार्थिवृन्दोत्सवः ।
यस्मादुद्भटवैरिकुम्भदलनप्रोद्दामपञ्चाननो
जज्ञे यज्ञपरायणः किल जगन्नारायणो भूपतिः ।
कृष्ण इव सुतात् कौशल्याया जयन्त इवेन्द्रतो-
रतिपतिरिव श्रीमद्विष्णोः कुमार इवेशतः ।
शुक इव मुनेर्व्यासाद्विधुर्यथाम्बुधे-
र्बुध इव विधोरस्माज्जातस्त्रिविक्रमभूपतिः ॥
यं रणमुखे त्रिविक्रमनारायणदेवमालोक्य ।
अपि कनकगौरमरयो मन्यन्ते सपदि कालमिव ॥
सोऽयं दानदयाविवेकविनयश्रीमत्यलोकोत्तरो-
नित्यं यज्ञपरायणो विजयते श्रीनिर्भयो भूपतिः ।
यस्योद्दामकृपाणकालकलितप्रत्यर्थिपृथ्वीपति-
प्रेयस्यश्रुपयःपयोधिषु यशो हंसावली क्रीडति ॥
बाहव्यूहैर्द्विरदनिवहैराचतुःसिन्धुसीम्नो-
मुक्तादामस्फुरितमकुटो मेदिनीं मर्दयन्तः ।
के नामैनं धरणिरमणं क्ष्माभुजो नाश्रयन्ते
रत्नच्छत्रोच्छलितकिरण-श्रेणिकिर्म्मीरिताशाः ॥
सोऽयं मुरारिधीरं सच्चकारितया समासाद्य ।
श्रीशारदाप्रसादात् तनुते शुभकर्म्मनिर्णयं नृपतिः ॥
विज्ञायाखिलशास्त्रतत्त्वममलं श्रीरामभद्राद्गुरो-
र्म्मिश्रात् केशवतः स्मृतीरथ तयोः सारं विचिन्त्य स्वयं ।
पादाम्भोजयुगं प्रणम्य शिवयोः सत्सेवतां प्रीतये
व्यातेने शुभकर्म्मनिर्णयममुं श्रीमन्मुरारिः कृती ॥

तत्रादावाभ्युदयिकनिर्णयः । तदादाववश्यं सगणाधिपा मातरः पूज्याः ।—इत्यादि ।

**End.** तथा च उपायातायार्थमिति कौथलीया इति कौथलीयाः शाखाविशेषाध्यायिनः । तेषां मते इदानीमागतायामपि न तु कौथुमाय + + + ग्रहणमिति ॥

**Colophon.** इति महामहोपाध्यायश्रीमुरारिमिश्रशर्म्मविरचितः शुभकर्म्मनिर्णयः समाप्तः इति ।

न्यायाम्भोजमरन्दतुन्दिलमनोभृङ्गो गिरां शेवधि-
र्म्मन्वादिस्मृतिमाकलय्य तदितः सारं समाकृष्य च ।

भाष्याणि प्रविचिन्त्य निश्चलहृदा श्रीगोभिलीये विधौ
ख्याते मे शुभकर्म्मनिर्णयमसृ श्रीमन्मुरारिः कृती ॥ समं ५८४ । कार्त्तिककृष्णपञ्चम्यां ।

विषयः । स्मृतिपुराणग्रन्थान्तरसंवादेन छन्दोगानां विवाहादिसमावर्त्तनान्तेषु दशविधेषु संस्कारेषु विधानकथनम् तदधिकृतगोभिलसूत्राणां समासेन व्याख्याकीर्त्तनञ्च ।

---

**No 1988** खण्डनखण्डखाद्यटीका । Substance, palm-leaf, 11 × 2 inches. Folia, 103. Lines, 5 on a page Extent, 1,672 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá. Appearance, old. Prose. Correct.

**Khaṇḍana-khaṇḍa-khádya-ṭíká** A commentary on S'ríharsa's Khaṇḍana-khaṇḍa-khádya,—a treatise on the non-existence of the Supreme soul. By S'aṅkara Miśra. (III, p. 70.)

**Beginning.** हरिशङ्करयोः सितासितं भुजगारातिभुजङ्गलाञ्छनं ।
वपुरस्तु मुदे विरुद्धयो-रपि संस + + भिन्नतां गतं ॥
विरुद्धधर्म्मिद्वयसन्निपातेऽप्यभेद एवेति विभावयन्नः ।
पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः शरीरं ॥
भवनाथसूक्तिगुम्फनमिह खण्डनखण्डखाद्यटीकायां ।
श्रीशङ्करेण विदुषा विदुषामानन्दवर्द्धनं क्रियते ॥

प्रारिप्सितप्रतिबन्धकदुरितनिराकरणकारणेष्टदेवतानमस्काररूपं मङ्गलं कुर्व्वन्नेव प्रेक्षावत् प्रवृत्त्यङ्गप्रयोजनाभिधेयसम्बन्धप्रतिपादनपरः परमतनिराचिकीर्षया स्वमते ब्रह्माद्वैतस्थापनां वैतण्डिकाऽपि स्वप्रौढिप्रकटनाय सूचयन्नाह,—अविकल्पेति । एकः पुरुष इत्यद्वितीयं ब्रह्मेत्यर्थः । श्रुतिषु तथाश्रुतत्वात् । यद् यथा श्रुतिषु श्रुतं तत्तथा यथा ब्रह्मण आनन्दमयत्व—इत्यादि ।

**End.** ननु सकलान्योन्याभाववृत्तिना केनचिद्धर्म्मेणावच्छिन्नस्योद्देश्यत्वं स्यादित्यत आह: अन्य इति । तस्मादवृत्तेरुपाधेर्व्याप्यनिरूपणात् ।

**Colophon.** इतः खण्डितत्वात परिशेषवाक्यं नास्ति ।

विषयः । श्रीहर्षकृतखण्डनखण्डखाद्यस्य अभावखण्डनप्रकरणं यावत् व्याख्यानं ॥

---

**No. 1989.** छन्दोगाह्निकोद्धारः । Substance, country-made paper, 10 × 4 inches. Folia, 32. Lines, 6 on a page. Extent, 499 s'lokas. Character, Maithilí. Date, Sк. 1716. Place of deposit, Magráṇi, Post Madhubaní, Darbháṅgá, Paṇḍit Kánái Jhá. Appearance, old. Prose and verse. Correct.

**Chhandogáhinkoddhára.** A summary of the daily religious duties imperatively necessary for such householders belonging to the Chhandoga school as do not cherish the household fire. By S'aṅkara Miśra, Mahámahópádhyáya, son of Bhavanátha Miśra. Contents : morning duties ; ablutions, wood fit for brushing the teeth, washing of the face, morning bath, rules of Gobhila on the subject ; Sandhyá defined, ritual of Sandhyá, offering of water to the manes, reading of the Vedas, adoration of deities, sacrifices to the Viśvedevás, daily s'ráddhas, hospitality, offering of food to cattle, breakfast, prohibited food, duties after breakfast, siestá, society of wife.

**Beginning.** ऊर्द्धबद्धजटाजूटक्रोड़क्रीड़त्सुरापगं ।
भजामि यामिनीकान्तकान्तभालस्थली हरं ॥
यावानकृते दोषश्छन्दोगानां निरग्नीनां ।
तावन्मात्रमिहाह्निकमल्पसानामुच्यते स्फुटं ॥
तत्र नरसिंहपुराणे,—उषःकाले समुत्थाय कृतशौचो द्विजोत्तमः ।
कुर्य्यात् स्नानं ततो नित्यं दन्तधावनपूर्व्वकं ॥ इत्यादि ।

**End.** अत्राह्निके एतावत्यपि कृते न प्रत्यवेयात । अन्यथा प्रत्यवेयादेवेति संचिप्याह्निकमुद्धृतं सामगानां ॥

**Colophon.** इति महामहोपाध्यायश्रीभवनाथमिश्रात्मजमहामहोपाध्यायश्रीशङ्करमिश्रकृतौ छन्दोगाह्निकोद्धारः समाप्तः । शाके १७१६ ।

विषयः । छन्दोगानामाह्निकृत्यमतिविस्तरेणानुष्ठातुमशक्तानां यावति अकृते प्रत्यवाय स्यात, निरग्नीनां तावदेव संक्षेपेण निरूपितं । तत्र प्रातः कृत्यकथनं । सामान्यतः शौच-विधिः । दन्तकाष्ठनिरूपणादिकं । आचमनविधिकथनं । प्रातःस्नानविधिकथनं । गोभिलीय-स्नानप्रयोगः । सन्ध्यानिर्णय । सन्ध्याप्रयोगः । तर्पणप्रयोगः । ब्रह्मयज्ञविधिकथनं । देवपूजा-विधिकथनं । शाकल्यकल्पेन वलिवैश्वदेवविधिकथनं । नित्यश्राद्धविधिकथनं । आतिथ्यविधि-कथनं । गोग्रासदानविधिकथनं । भोजनविधिकथनं । भोजने वर्ज्जनीयकथनं । भोजनोत्तरमाचमनीयविधिकथनं । शयनविधिकथनं । दारोपगमनविधिकथनञ्च ।

---

**No. 1990.** द्विविधजलाशयोत्सर्गप्रमाणदर्शनं । Substance, country-made paper, 12 × 5 inches. Folia, 22. Lines, 7 on a page. Extent, 706 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháṅgá, Paṇdit Kánái Jhá. Appearance, new. Prose and verse. Generally correct.

**Dvividha-jalásayotsarga-pramána-darsana.** Two different rituals for the consecration of tanks, wells and other reservoirs of water, according to the rules of the Bahvricha Bráhmana and of the Yajur Veda respectively. By Buddhikara S'ukla.

**Beginning.** नत्वा श्रेया वदवे दौ बन्धतो वेङ्कटविणौ ।
खारोपकूपसभारौ मेशोमेशौ जगद्‌गुरू ॥
सम्यगधनासभवविवसाध्याचित्यपूर्णादिचिकीर्षु पुंसां ।
निर्व्विघ्नमि मद्रात्कूपसेतुवापीसमुत्सर्गविधिं विधानैः ॥
श्रीबुद्धिकरशुक्लोऽहं मीमांसासारगौरवात् ।
विश्वनाथपदाम्भोजमधुपानमधुव्रतः ॥
अथाग्निमाचिकप्रक्रियोक्तोत्सर्गविधिः । इत्यादि ।

**End.** एवमग्निमाचिकजलाशयोत्सर्ग आभ्युदयिकं, तत्र स्त्रीणामपि पित्रादीनां पत्यादीनां प्रमाणाभावात्—इति ।

**Colophon.** इति महामहोपाध्यायशुक्लश्रीबुद्धिकरकृतौ द्विविधजलाशयोत्सर्गप्रमाणदर्शनं ।

विषयः । बह्वृचां यजुर्वेदिनाञ्च प्रत्येकं वापीकूपतडागादिप्रतिष्ठाविधिकथनं ।

---

**No. 1991.** मीमांसासूत्रदीधितिः, वा न्यायावलीदीधितिः । Substance, country-made paper, 12 × 4 inches. Folia, 340. Lines, 7 on a page. Extent 9,208 s'lokas. Character, Nágara. Date, ? Place of deposit, Magranigrám, Post Madhubaní, Darbhangá, Pandit Kánái Jhá. Appearance, old. Prose. Incorrect.

**Mímáñsá-sútra-dídhiti alias Nyáyavalí-dídhiti.** A commentary on the Mímáñsá aphorisms, explaining the parables used in illustration of them. By Rághavánanda Sarasvatí. Hall's Contributions, p. 182.

**Beginning.** नत्वा मुरारेः पदकञ्जरेणून् मन्देशितुर्भानुगजाननस्य ।
इष्या गुरूणाञ्च यतिस्तनोमि न्यायावलीश्रीधितिमर्थकल्पां ॥
तत्र । धर्म्मा ईदृशलक्षणा युग्माद्यस्तत्वलक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चेदिताः क्रमात् ॥

विध्यर्थवादः स्मृतिनामधेयं चतुर्विधं मानमुदीरयेऽत्र ।
पादैश्चतुर्भिस्त्रिदशलक्षणस्थैः सूत्रान्वितैः सिद्धति कर्म्मदृष्टं ॥
अल्पाक्षरमसन्दिग्धं सारविश्वतोमुखं ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥ इति ।
तत्र मीमांसासूत्रसन्दर्भोऽथातो धर्म्मजिज्ञासेति । इत्यादि ।

**End** मेषपतिशब्दस्य देवतापरत्वात् यत्र गणदेवता तत्राविकारो यत्र देवतास्वरूपभेदस्तत्रावश्यमूहस्तस्य देवताभेद ऊह इति स्थितं ।

**Colophon** इति श्रीराघवानन्दसरस्वतीविरचितमीमांसासूत्रदीधितौ नवमाध्यायस्य तृतीयः पादः ।

विषयः । न्यायप्रदर्शनपूर्वकं मीमांसासूत्रस्य नवमाध्यायतृतीयपादान्तं व्याख्यानं ।

---

**No. 1992.** स्मृतितत्त्वामृतं । Substance, palm-leaf, 11 × 2 inches. Folia, 112. Lines, 5 on a page. Extent, 2,423 s'lokas Character, Maithilí. Date, L S. 505,=Sk. 1546. Place of deposit, Magaáni, Post Madhubaní, Darbhángá, Pandit Kánái Jhá, a second copy with Pandit Chhoṭí Jhá of that place. Appearance, old. Prose and verse Correct.

**Smriti-tattvámrita** A digest of the rules of the Smritis. The codex under notice contains the chapter on rites for the pacification of adverse divinities, and works of public utility, and is called *S'ántipaushṭikáñjalí*. By Vardhamána Mahámahopadhyáya, son of Bhavesa by Gaurí.

**Beginning** श्रीमित्सपद्वककुलप्रभवस्य गौरी सा तस्य मत्कविभवे भवतनूद्भवस्य ।
श्रीवर्द्धमानकृतिनः स्मृतशान्तिपुष्टितत्त्वामृतं पिबत निर्वृतिमेतु चेतः ॥
व्यवहारोऽन्यथा लोके साम्प्रतं शास्त्रमन्यथा ।
तयोर्विरुद्धयोः शास्त्रं बलवत्त्वादिहादृतं ॥

इह योगक्षेमाविव सर्व्वेषामपेक्षितौ तत्र अक्लिष्टानिष्टनिवृत्तिः क्षेमः स इह शान्तिरित्युच्यते । तदर्थं कर्म्म शान्तिकं । अपूर्व्वाभीष्टलाभो लब्धपरिरक्षणञ्च योगः । तदर्थं कर्म्म पौष्टिकं । इत्यादि ।

**End** फलावाप्तिपर्य्यन्तं ब्रह्मचारिणा भवितव्यं कर्म्मावसाने फलप्राप्तिः । इति पौष्टिकं कोषः ॥

गौरी-भवेशपुत्रेणोक्तं वर्द्धमानविपश्चिता ।
स्मृतितत्त्वामृतनाम्नि निबन्धशान्तिकपौष्टिकं कर्म्म ।

**Colophon.** इति महामहोपाध्यायश्रीवर्द्धमानकृतौ स्मृतितत्त्वामृते शान्तिकपौष्टिकाञ्जलिः समाप्तः । शुभमस्तु । लसं ५०५ । शाके १५४९ ।

**विषयः ।** शान्तिकपौष्टिककर्म्मनिर्णयः । तत्र शान्तिकपौष्टिककर्म्मस्वरूपकथन । होमादीनामुभयरूपत्वकथनं । यागलक्षणकथनं । होमलक्षणं । यज्ञलक्षणं । शान्तिकामेन ग्रहयज्ञः कार्य्य इति निरूपणं । तत्र ताम्रस्फटिकादिना सूर्य्यादिनवग्रहाणां प्रतिकृतिनिर्म्माणकथनं । ग्रहाणां मूर्त्तिवर्णनं । ग्रहाणां जन्म-स्थान-जाति-गोत्रादिकमज्ञात्वा होमानुष्ठाने दोषकथनं । तेषां जन्मादिकीर्त्तनञ्च । ग्रहाणामग्निभेदकथनं । मण्डलादिसंस्थानकथनं । ग्रहयज्ञकालादिनिरूपणं । दक्षिणायनादौ निषिद्धेऽपि मलिम्लुचादौ शान्तिकं कर्त्तव्यमेवेतिनिरूपणं । होमद्रव्येषु प्रतिद्रव्य, विशेषपरिमाणकथनं । परिसमूहनादिषु प्रत्येकं मन्त्रकथनं । रूपनारायणधर्म्मधरकृतग्रहयज्ञपद्धतिदूषणं । ग्रहाणां पूजाविधिकथनं । होमविधिकथनं । दक्षिणानिरूपणं । शान्तिकपौष्टिककामेन अल्पवित्तेनापि कुपितग्रहस्य पूजा कर्त्तव्येतिकथनं । ग्रहाणां प्रत्येकं शुक्लादिफलकथनं । उत्पातनिरूपणमुखेन त्रिविधाद्भुतनिरूपणं । तत्र नैमित्तिकाद्भुतानि । दिव्यान्तरिक्षाद्भुतादिनिरूपणं । अद्भुतानां फलपाककालकथनं । त्रिविधाद्भुतनियमेन शान्तिव्यवस्थाकथनं । तत्र अभिचारशङ्कादौ अभयाशान्तिकथन । राजयक्ष्मरोग-भूकम्पादौ वैष्णवीशान्तिकथनं । पशुमरकादौ रौद्रीशान्तिकथनं । वेदनाशनास्तिक्यादौ ब्राह्मीशान्तिकथनं । अभिशापप्रसववैकृत्यादौ प्राजापत्याशान्तिकथनं । उपस्करादौ कौमारीशान्तिकथनं । वह्निवैकृतादौ आग्नेयीशान्तिकथनं । भृत्याभिमर्षणादौ गान्धर्व्वीशान्तिकथनं । अपभृत्यधननाशादौ कौवेरीशान्तिकथनं । वृक्षादीनां वैकृते पार्थिवीशान्तिकथनं । एवमन्यत्र प्रत्येकं शान्तिकथनं । सूर्य्यादिषु ग्रहेषु उत्पातकथनपूर्व्वकं प्रत्येकं शान्तिकथनं । वायव्यमण्डलफलकथनं । एवमाग्नेयवारुणादिफलकथनं । ग्रहयुद्धनिरूपणपूर्व्वकं तच्छान्तिकथनं । ग्रहणफलकथन । नाडीलक्षणशान्तिकथनं । अभिषकद्रुम-जाति-नक्षत्रपीडानां शान्तिकथनं । नभसोत्पातशान्तिकथनं । निर्घातशान्तिकथनं । दिग्दाहशान्तिकथनं । छायाद्भुतादिशान्तिकथनं । उल्कापातादौ शान्तिकथनं । वातातिवृष्ट्याद्यद्भुतशान्तिकथनं । आग्नेयमण्डलादिफलकथनं । जलाशयाद्भुतकथनपूर्व्वकं तच्छान्तिकथनं । प्रतिमाद्भुतादिशान्तिकथनं । वृक्षवल्लीवनगुल्माद्यद्भुतशान्तिकथन । शकुनाद्यद्भुतशान्तिकथनं । मृदङ्गादिवाद्याद्भुतशान्तिकथनं । वस्त्राद्भुतशान्तिः । शस्त्राद्भुतशान्तिः । मानुषाद्भुतशान्तिः । प्रसवाद्भुतशान्तिः । अद्भुतानां फलपाकसमयकथनं । पौष्टिककर्म्मविधिकथनं । गायत्रीहोमादिविधानं । षडङ्गरुद्रविधानकीर्त्तनं । प्राजापत्यादिविधिकथनं । चान्द्रायणादिविधिकीर्त्तनञ्च ।

No. 1993 लिङ्गवृत्तिः। Substance, palm-leaf, 10 × 2 inches. Folia, 34. Lines, 5 on a page. Extent, 481 S'lokas. Character, Maithilí. Date, ? Place of deposit Magráṇi, Post Madhubaní, Darbhángá, Paṇdit Kánái Jhá. Appearance, old Prose. Correct.

**Liñga-vṛitti.** On the genders of words. By Vararuchi Áchárya.

**Beginning.** यावान् कश्चित् नान्तः शब्दो नपुंसको बोद्धव्यः। यावानिति परिमाणवाची शब्दः कश्चिदिति अनिर्दिष्टनामधेयं। न अन्ते यस्य स नान्तः। शब्द्यन्तेऽनेनार्था इति शब्दः, अभिलाप्य इत्यर्थः। स च शब्दश्चतुर्विधः। जातिशब्दः, गुणशब्दः, क्रियाशब्दः, यदृच्छाशब्दश्चेति। इत्यादि।

**End.** अयं योनिरियं योनिः गुह्यस्थानं। वाग्विषयस्य महतः संक्षेपत एव लिङ्गविधिरुक्तः। यन्नोक्तमत्र सद्भिस्तल्लोकतएव बोद्धव्यं॥

**Colophon.** इत्याचार्य्यश्रीवररुचिकृता लिङ्गवृत्तिः समाप्ता।

विषयः। क्वचिदन्त्याक्षरनिर्द्देशेन क्वचिच्च पर्य्यायोल्लेखेन शब्दानां लिङ्गानुशासनकीर्त्तनं।

---

No. 1994. जातकसारः। Substance, palm-leaf, 11 × 2 inches. Folia, 23. Lines, 5 on a page Extent, 432 s lokas. Character, Maithilí Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇdit Kánái Jhá Appearance, old. Mostly in verse. Correct.

**Játakasára.** An epitome of horoscopy. By S'isu Mahámahopádhyáya.

**Beginning.** तामीश्वरीमखिलदेवकिरीटकोटि-रत्नांशुकेशरितपादसरोजलक्ष्मीं।
रम्भकवम्भरजटाचयचारुचन्द्रां याता वदात मुखतामरसां नमामि॥
तरणिरजनिनाथौ पार्थिवः सोमसूनुस्त्रिदिवपतिपुरोधा भार्गवो भानुसूनुः।
शिशिरकरविरोधी केतवश्चेति सर्व्वे विदधतु बहुभाग्यं वो नभोगा नवैते॥
सोमभार्गवबुधेन्दुभास्कराः सौम्यशुक्रधरणीतनूद्भवाः।
जीवभानुसुतभानुजा गुरू-राशयश्चीशगणना यथाक्रमं॥ इत्यादि।

**End.** रजनिकिरणदुग्धाम्भोनिधेर्बुद्धितेजाः प्रबलदलनविद्याराशिपीयूषपूर्णः।
नयविनयकलाश्री दुष्कृतध्वान्तहन्ता विधुरिव शिवलक्ष्मीराजतिश्रीवटेशः॥
तस्यात्मजेन शिशुना सुखबोधहेतोरालोक्य जातकमवन्धि + + + चैवं।
स्थूलात्मकं चितमयं प्रथमप्रवेशे बालस्य पालनमतोऽस्य बुधा विधेयं॥

**Colophon.** इति महोपाध्यायश्रीशिशुविरचितो जातकसारः।

विषयः। राशितद्भाग-होरादिनिरूपणं। आतकस्यग्रहज्ञानोपायकीर्त्तनं। पितृपरोक्ष-जन्मकथनविधिः। अरिष्टकथनं। अरिष्टभङ्गकीर्त्तनं। परमयोगनिरूपणं। राजयोगकथनं। अनफादियोगकथनं। केमद्रुमयोगकथनं। रविकृतवेश्यादियोगकथनं। नवांशकफलकथनं। द्वादशांशफलकथनं। ग्रहदृष्टफलकथनं। अधमाष्टकयोगनिरूपणं। स्त्रीजन्मचिन्तनं। तत्र वैध-व्यादिज्ञानोपायकथनं। जारजयोगनिरूपणं। परमोच्चग्रहकथनं। त्रिकोणस्थितग्रहफलकथनं। नीचग्रहादिफलकथनं। ग्रहत्रययोगकथनं। चतुर्ग्रहादिफलकथनं। तनुस्थानादिग्रहफल-कथनञ्च।

---

**No. 1995.** व्रतपद्धतिः। Substance, palm-leaf, 10 × 2 inches. Folia, 62. Lines, 5 on a page. Extent, 1,306 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráni, Post Madhubaní, Darbhángá, Pandit Kánái Jhá: two other copies, one with Pandit Chhoṭi Jhá, another at Naduyárgram, Post Madhubaní, with Pandit Kanṭa Jhá. Appearance, old. Prose and verse. Correct.

**Vratapaddhati.** On optional fasts and penances, called Vratas. By Rudradhara Mahámahopádhyáya.

**Beginning.** भाल्यश्लिष्टशतोदृ(?)बोध श्रीरुद्रधरशर्म्मणा।
नानानिबन्धसिद्धान्तो लिख्यते व्रतपद्धतिः॥

तत्रादौ व्रतसामान्यधर्म्माः। तत्र देवलः।

अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः।
सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्। इत्यादि।

**End.** वस्तुतस्तु तत्रापि श्रद्धादेरभिलापं कर्त्तुमर्हति मतोऽपि तच्छादित्वस्य च प्रयोजक-त्वादिति। एष श्रीभाटेश्वरणोन्नीतः समयप्रदीपानुसारी पन्थाः॥

**Colophon.** इति महामहोपाध्यायश्रीरुद्रधरकृता व्रतपद्धतिः समाप्ता।

विषयः। सामान्यतो व्रतधर्म्मनिरूपणं। उपवासादिस्वरूपविवेचनं। स्त्रीणां सभर्त्तृकाणां पतिपार्श्वक्येन उपवासनिषेधकथनं। वैश्यशूद्रयोस्त्रिरात्रपञ्चरात्रोपवासनिषेधकथनं। गृहीत-व्रतापालने दोषकथनं। मासलक्षण-तद्विभागादिकथनं। युग्मादितिथिव्यवस्थाकथनं। नक्त-व्यवस्थाकथनं। हविष्यद्रव्यनिरूपणं। आदित्यव्रतविधानं। तत्र रविवारे उपवासव्रतविधानं। उभयसप्तमीव्रतकथनं। आरोग्यसप्तमीव्रतविधानं। फलसप्तमीव्रतकथनं। देवीव्रतविधानकथनं। तत्र दुर्गाचतुर्थीव्रतविधानं। शिवव्रतविधानं। तत्र अष्टम्यां नक्तभोजनव्रतविधानं। रौद्रव्रतवि-धानं। महाव्रतविधानकथनं। तत्र लिङ्गादिपूजाविधानकथनं। गोमयादिलिङ्गपूजाविधानं। एकादशीव्रतविधिकथनं। अशून्यशयनव्रतविधानं। यावज्जीवैकभक्तव्रतविधिकथनं। मास-

परित्यागविधानादिकथनं । एकभक्तव्रतविधिकथनं । शाकमासाहारव्रतविधानकथनं । दुग्धमासाहारव्रतविधिकथनं । एकरात्रद्विरात्रत्रिरात्राद्युपवासव्रतविधानं । एकान्तराद्युपवासव्रतविधानं । द्वादशमासकृत्यविधिनिरूपणं रटन्तशार्मिकरणविधिकथनं । प्रमादकृतच्छिद्रप्रायश्चित्तं । जन्मतिथिकृत्यनिरूपणं । सूतिकाषष्ठीपूजाविधानकथनं । वास्तुपूजाप्रकारादिकथनं । विद्यारम्भविधिकथनं । पञ्चपर्व्वकृत्यनिरूपणं । तिथिवारनियतकृत्यादिविधानं । आवश्यकश्राद्धकालादिनिरूपणं । चन्द्रादिग्रहणकृत्यनिरूपणं । मलमासस्वरूपकथनपूर्व्वकं तत्र कृत्यनिरूपणं । एकोद्दिष्टश्राद्धकालनिरूपणञ्च ।

---

**No 1996.** मिथ्यात्वनिर्व्वचनं । Substance, country-made paper, 16 × 3 inches. Folia 8. Lines, 8 on a page. Extent, 288 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇdit Kánái Jhá. Appearance, fresh. Prose. Correct.

**Mithyátva-nirvaćana.** A dissertation on unreality leading to the conclusion of the unity of the human and the divine souls, and the substantial unreality or mere phenomenality of the universe as distinct from that soul. By Gokulanátha Upádhyáya, Mahámahopádhyáya.

**Beginning.** रज्जुसर्पवदनाद्यविद्यया यत्र कल्पितमताच्चिकं जगत् तत्परं किमपि वस्तु गोकुले नन्दवेश्मनि निलीय तिष्ठति ॥ नियद्रूपव्यक्त्याविरवसुधादिरचेतनप्रपञ्चो मिथ्या जड़त्वात् दृश्यत्वात्परिच्छिन्नत्वात् तत्र यस्य वस्तुनो यत्र यत्र धर्म्मिणि यत्कालदेशावच्छेदेन — इत्यादि ।

**End.** वस्तुतः स्वजन्यत्वं स्वाधिकरणचणवृत्तिध्वंसप्रतियोगिवाक्यहत्यानुपूर्व्वीकत्वं वाक्यार्थज्ञानादृश्यतानिरूपितसाध्यत्वाद्यविषयता चरित संसर्गवयेण प्रयत्नवत्त्वं तात्पर्य्यमिति निष्कर्षः॥

**Colophon.** इति महामहोपाध्यायगोकुलनाथोपाध्यायविरचितं मिथ्यात्वनिर्व्वचनं पूर्णमिति ।

**विषयः ।** मिथ्यात्वस्वरूपनिरूपणपूर्व्वकं प्रपञ्चस्य मिथ्यात्वसंस्थापनं । प्रसङ्गाद्दुपासनादिस्वरूपकथनमुखेन जीवब्रह्मैक्यादिकीर्त्तनञ्च ।

---

**No. 1997.** लीलावतीप्रकाशटिप्पनी । Substance, palm-leaf, 10 × 1 inches. Folia, 64. Lines, 4 on a page. Extent, 1,393 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇdit Kánái Jhá. Appearance, old. Prose. Correct.

**Lílávatí-prakáśa-ṭippaní.** A gloss on Vardhamána's commentary on the Lílávatí. By Raghunátha S'iromaṇi Bhaṭṭácharya.

**Beginning.** ॐ नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

षड़ेव पदार्थाः इत्यवधारणस्य भाष्यादावभावात् आक्षेपासङ्गतेराव इत्येति अवधारणपरोऽव-धारणप्रयोजनकः विभागो विभजनं, तदर्थः कादाचित्कः । विभागात्मकमिति पाठस्तु सुगम एव विभागे विभागोद्देश्यत्वेन अभिमते न्यूनाधिकसंख्याव्यवच्छेदे—इत्यादि ।

**End.** अकारणेति । अन्वयव्यतिरेकाभ्यां क्वचिदकारणनाशस्यापि स्वकार्य्यनाशकत्वे न चतिरिति समर्थ्यं ।

**Colophon.** इति श्रीशिरोमणिभट्टाचार्य्यविरचिता लीलावतीप्रकाशटिप्पनी समाप्ता ।

विषयः । वर्द्धमानकृतप्रकाशाभिधानाया लीलावतीटीकाया व्याख्यान ।

---

**No 1998** पुष्पमाला । Substance, country-made paper, 11 × 4 inches. Folia, 4. Lines, 6 on a page. Extent, 60 s'lokas Character, Maithilí. Date, ? Place of deposit, Magiání-grám, Post Madhubaní, Darbhángá, Pandit Kánái Jhá. Appearance, new. Verse. Correct.

**Pushpa-Málá.** On the different kinds of flowers and leaves appropriate for the worship of particular divinities and at particular rites and ceremonies. By Rudradhara.

**Beginning.** जातीकुन्दशमीकुशेशयकुशाशोकं वकं किंशुकं
पुन्नागं करवीरचम्पकजवाशेफालिकाकुब्जकं ।
वासन्तीशतपत्रिकाविचकिलं मन्दारमर्काकयं
पीताम्लानकनागकेशरमिदं पुष्पं रवेः शस्यते ॥ इत्यादि ।

**End.** आहृत्य पत्रपुष्पं निपुणं कल्पतरुपारिजातादेः ।
पूजाविधौ सुराणां प्रशस्तदलपुष्पमालेयं ॥
रुद्रधरेण मनोरमै गुणजालेन गुम्फिता यत्नात् ।
तनोतु तोषपोषं मनसि चिरं सर्व्वविबुधानां ॥

विषयः । सूर्य्यपूजने विहिताविहितपुष्पनिरूपणं । एवं शिव-विष्णु-दुर्गा-लक्ष्मी-विष्णु-मूर्त्तिभेदानां पूजने विहिताविहितपुष्पपत्रादिनिरूपणं । सर्व्वसुरपूजने वर्ज्जितपुष्पकथनं । आद्यादौ विहिताविहितपुष्पकथनञ्च ।

---

Asiatic Society, Calcutta
Acc. No. B409 Date 24.6.87

**No. 1999.** धर्म्माधर्म्मप्रबोधिनी । Substance, country-made paper, 14 × 3½ inches. Folia, 157. Lines, 8 on a page. Extent, 3,120 s'lokas. Character, Maithilí. Date, Sm. 1410. Place of deposit, Naváni, Post Mádhepurá, Darbhángá, Pandit, Vañsamani Jhá. Appearance, old. Prose and verse. Correct.

**Dharmádharma-prabodhiní.** A digest of the Smriti rules regarding duty. By Premanidhi, son of Indrapati Mahámahopádhyáya, of Mithilá. The work was completed at Mysore, in the Nizám Sháhi dominion, in Samvat 1410, = A. D. 1353. It is divided into 12 chapters, thus—I. Daily duties. II. Worship. III. S'ráddhas. IV. Impurities. V. Purification. VI. Marriage. VII. Religious benefactions. VIII. Duties during times of distress. IX. Optional fasts. X. Pilgrimage. XI. Expiations. XII. Fruits of former works. Duties common to all classes, &c.

**Beginning.** जयति जयति गौरीबालको विघ्नहर्त्ता
जयति जयति देवो भानुकोटिप्रकाशः ।
जयति जयति ++स्वैकदन्तः सुरूपो-
जयति शुभगलाम्यः पातु नः सिद्धिदाता ॥
प्रणम्य जगदाधारं गुरूंश्चैव विशेषतः ।
क्रियते ब्राह्मणार्थाय धर्म्माधर्म्मप्रबोधिनी ॥

अथ प्रातःकृत्यं । तत्र स्मृतिसमुच्चये,—दक्षः ।
प्रातरुत्थाय कर्त्तव्यं गृहकृत्यं दिने दिने ।
तत् सर्व्वं सम्प्रवक्ष्यामि द्विजानां विधिसिद्धये ॥ इत्यादि ।

**End.** मन्वादिस्मृतिमालोक्य याज्ञवल्क्यं तथैव च ।
श्रीमत्प्रेमनिधिर्धीमान् अकरोद्धर्म्मबोधिनीम् ॥
श्रीमद्राजनिजामसाहविषये माहिष्मती या पुरी,
सा मे पूर्व्वजवासभूश्च सततं देवोऽपि यां वाञ्छति ।
श्रीमन्मैथिलठक्कुरेन्द्रपतिजो यत्नेन दृष्ट्वा स्मृतिं
कार्य्याकार्य्यविचारणार्थमकरोद्देवोपकण्ठे वसन् ॥

**Colophon.** इति महामहोपाध्यायमट्ठक्कुरश्रीमदिन्द्रपतिसूनुश्रीप्रेमनिधिविरचिते धर्म्मशास्त्रे धर्म्माधर्म्मप्रबोधिन्यां द्वादशोऽध्यायः । समाप्तश्चायं ग्रन्थः ।
मार्गे मासि सिते पक्षे षष्ठ्यां वै भृगुवासरे ।
यत्नेन पाठ्यतां विप्रैः समाप्तेयं प्रबोधिनी ॥ संवत् १४१० ॥

विषयः। प्रथमेऽध्याये,—आचारनिरूपणं। तत्र प्रातःकृत्यविधिः। मूत्रपुरीषाद्युत्सर्गस्थानादिनिरूपणं। षड्विधमौनविधानं। शौचविधिः। परिधानीयवस्त्रनिषेधः। सन्ध्यास्नानजपहोम-देवपूजातिथ्यवैश्वदेवरूपषट्कर्म्मनिरूपणं। तत्र विविधस्नानविधानं। आचमनविधानं। दन्तधावनविधिः। तत्र मन्त्रादिकथनञ्च। क्षौरकर्म्मविधिः। तैलनिषेधः। क्वचित् तैलाभ्यङ्गविधिः। प्रातःस्नानविधिः। तिलकविधिः। कुशमाहात्म्यं। तदुत्पाटनविधिः। तर्पणविधिकथनञ्च।

द्वितीयेऽध्याये,—अभिवादनविधिः। देवपूजाविधिः। तत्र अर्घ्यपाद्यादिविधिः। पुष्पनिरूपणं। अनुलेपनविधिः। धूपदीपनैवेद्यासनादिविधिः। प्रतिमानिरूपणं। शिवलिङ्गमाहात्म्यं चण्डिकापूजाविधिः। विष्णुपूजाविधिः। घण्टावादनविधिः। शङ्खपूजाविधिः। होमविधिः। वैश्वदेवविधिः। आतिथ्यविधिकथनञ्च।

तृतीयेऽध्याये,—श्राद्धविधिः। तत्र श्राद्धपूर्व्वदिनकृत्यं। एकोद्दिष्टविधिः। श्राद्धकर्तृनियमाः। तीर्थश्राद्धविधिः। विप्रपतितादिश्राद्धविधिः। वृषोत्सर्गविधिः। श्राद्धाधिकारिणः। द्वादशविधपुत्रविवेचनं। मलमासादिनिरूपणं। विषशस्त्रादिमृतानां श्राद्धविधिः। अपरपक्षामावस्यादिश्राद्धविधिः। श्राद्धप्रशस्तद्रव्याणि।

चतुर्थेऽध्याये,—अशौचनिरूपणं। सद्यःशौचादिदशविधाशौचनिरूपणं। अशौचसङ्करनिरूपणं। बालाद्यशौच। स्त्र्यशौचं। मृत्युविशेषाशौचं। असपिण्डाद्यशौचं। निर्हरणाद्यशौचं पिण्डदानविधिः। अशौचान्तदिनकृत्यं।

पञ्चमेऽध्याये,—द्रव्यशुद्धिनिरूपणं। तत्र जलशुद्धिलेपशुद्ध्यादिनिरूपणं। धातुशुद्धि। वस्त्रादिशुद्धिः। शस्यादिशुद्धिः। तृणकाष्ठादिशुद्धिः। स्वभावशुद्धिः। उच्छिष्टादिस्पर्शशुद्धिः। नानावस्तुस्पर्शशुद्धिः। अमेध्यस्पर्शशुद्धिः। आचमनानुकल्पः। कुक्कुरादिस्पर्शशुद्धिः।

षष्ठेऽध्याये,—विवाहविधिकथनं। कन्यादानाधिकारिणः। कन्यालक्षणादिकथनं। स्त्रीधर्म्मकथनं। पतिव्रतालक्षणादिक। सहगमनविधिः। गर्भाधानकथनं। जन्मविवरणकथनप्रसङ्गेन संक्षेपेण शारीरस्थाननिरूपणं। पुत्रजन्मादिकृत्यं। उपनयनादिविधिः। ब्रह्मचारिनियमाः। अनध्यायाः। गार्हस्थ्यविधिः। वानप्रस्थविधिः। यतिधर्म्मनिरूपणं।

सप्तमेऽध्याये,—ब्राह्मणप्रशंसा। दानविधिः। कृष्णधेन्वादिदानविधिः। महादेवप्रतिमाशालग्रामदानादिविधिः। गृहादिदानविधिः। अन्नजलभूमिदानादिविधिः। मत्स्यादिनियतदानविधिः। आरामादिवृक्षरोपणफलकथनं। सत्प्रतिग्रहासत्प्रतिग्रहादिनिरूपणं। देशकालपात्रविवेचनं।

अष्टमेऽध्याये,—आपद्धर्म्मनिरूपणं। क्षीरादिविक्रये पातित्यादिनिरूपणं। चातुर्व्वर्ण्यसाधारणधर्म्मनिरूपणं। भक्ष्याभक्ष्यनिरूपणं। प्रतिपदादिषु कुष्माण्डादिभक्षणनिषेधः। भोजनविधिः। जातिविवेकः।

नवमेऽध्याये,—व्रतादौ तिथ्यादिनिरूपणं। एकादशीनिरूपणं। उपवासनियमाः। सप्तीसावत्र्यादियोगः। रामनवमीविधिः। चैत्रादिद्वादशमासकृत्यनिरूपणं। सावित्रीव्रतं। दशहरा। चातुर्मास्यविधिः। जन्माष्टमीविधिः। नवरात्रपूजाविधिः। सङ्क्रान्तिपुण्यकालनिरूपणं। अर्द्धोदययोगः।

दशमेऽध्याये,—तीर्थमाहात्म्यकीर्त्तनं। तीर्थनामानि। निवासस्थाननिरूपणं। राजधर्म्मकीर्त्तनं। करादानादिविधिः। दुर्गादिनिरूपणं। ऋणदानादिविधिः। आधिनिरूपणं। साक्षिविधिः। लेख्यदिव्यादिप्रकरणं। सीमाविवादादिनिरूपणं। दायभागकथनं। द्यूतविधिः। दण्डपारुष्यविधिः। स्तेयविधिः। अभिगमादिदण्डविधिः।

एकादशेऽध्याये,—वधनिर्णयः। महापातकादिनिरूपणं। ब्रह्महत्यासुरापानादिप्रायश्चित्तं। अगम्यागमनप्रायश्चित्तं। क्षत्रियादिवधप्रायश्चित्तं। गोवधादिप्रायश्चित्तं। प्रायश्चित्तदिननिषिद्धानि। स्त्रीवधप्रायश्चित्त। इतरप्राणिवधप्रायश्चित्तं। इतरद्रव्यस्तेयप्रायश्चित्तं। व्रणादौ क्रिमियोगे प्रायश्चित्तं। आत्मघातप्रवृत्तप्रायश्चित्तं। अपमृत्युमरणप्रायश्चित्तं। गवादिविक्रयप्रायश्चित्तं। निन्दितविवाहप्रायश्चित्तं अन्यप्रायश्चित्तं। चान्द्रायणकृच्छ्रादिव्रतलक्षणं।

द्वादशेऽध्याये,—कर्म्मविपाककथनं। सामान्यतः सर्व्ववर्णकर्त्तव्यानि। माङ्गल्यानि। अश्वत्थादिवृक्षरोपणविधिः। लवणसंयुक्तक्षीरादिभक्षणनिषेधः। दीपनिर्व्वाणदोषाः। शयनविधिः।

---

**No 2000.** पुरञ्जनचरितनाटकम्। Substance country-made paper, $10 \times 2\frac{1}{2}$ inches. Folia, 30. Lines, 6 on a page. Extent, 531 s'lokas. Character, Maithilí. Date, Sk. 1701. Place of deposit, Sáradápura, Post Mádhepurá, Darbháñgá, Paṇḍit Harshanátha Jhá. Appearance, fresh. Prose and verse. Correct.

**Purañjana-charita.** A drama in five acts founded on the story of Purañjaná as given in the Bhágavata Puráṇa. By Kṛishṇadatta, of Mithilá. The play was first acted in the court of Purushottama Deva, of Orissá. The object of the work is to promote devotion to Kṛishṇa.

**Beginning.** नित्यानन्दचिदात्मकस्य कलया यस्याच्युतस्याखिलं
विश्वं चेति तदप्यचेतनमिव द्रागात्मनि भ्राम्यति।
यो गच्छत्यकरश्चलत्यचरणः पश्यत्यचक्षुः शृणो-
त्यश्रो मनसो गिरोऽप्यविषयो भक्त्यैकगम्योऽस्तु नः॥

अपि च। एकं वृक्षमधिश्रितौ सहचरौ द्विव्यौ सुपर्णौ भजे
पक्षं पिप्पलमत्यदश्निह ययोरेकी न गन्धेक्षते।

शास्त्रेष्वप्यतिदीप्तिमच्छति परो बुद्धा ममैव स्थितो-
ऽवद्योऽसावपि युक्तिमेति न परो मे नाय पन्था मतः ॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। भक्तिभावभाविभाकरविभाविभाविभावितप्रोद्गमानस-सारसमुल्लासितरमारमणचरणषट्चरणस्य क्षणक्षणविलक्षणविनयविवेकदयादानदाक्षिण्यादि-गुणगणस्य निरुपधिपरोपकारजागरूकयशोभारघनसारप्रसारसुरभीकृतसंसारस्य परमरमणीया-कारस्य श्रीदिवाकरपुरुषोत्तमस्य सभायां — — — — — — — — सुखोपविष्टानां शि-ष्टानां देवविद्वेशवास्तव्यानां शास्त्रिणां ब्राह्मणानां राजकार्य्यभारिणां व्यापारिणाञ्च मण्डली समुल्लसति। तदत्र नवीनं किमपि नाटकमभिनेतव्यमिति। नेपथ्याभिमुखमवलोक्य। आर्य्ये इतस्तावत्। प्रविश्य नटी। अज्ज अम्मि आणवेदु अज्जो को णिओओ अणुचिट्ठीअदुत्ति। सूत्र:। आर्य्ये साधुसमाजमाराधयितुमिच्छामि। नटी। कदमं उणपबन्धं समप्पिअ एदस्स आरोहणं करिस्सदि अज्जो। सूत्र:। यत् किल मैथिलकृष्णदत्तकविना पुरञ्जनचरितं नाम नाटकं निर्म्माय अस्मासु समर्पितं तदभिनयेनाराधनमस्य सम्भविष्यति। इत्यादि।

End. श्रीतनुच्छविसुवर्णरेखितमाङ्गकान्तमतडिद्गुनाश्रयि।
कृष्णरूपनिकषे निवेशितं प्रेमहेमसमुपवीक्ष्यतां मम ॥

अविश्राम एवमस्तु। इति निष्क्रान्ताः सर्व्वे।

Colophon. पुरञ्जनदुःखभञ्जनो नाम पञ्चमोऽङ्कः। समाप्तमिदं नाटकमिति।
शाकेऽब्दे धरणीवियन्मुनिधरासम्भाससमाने शुभे
माघे मासि दिवामणौ मकरगे विष्णोस्तिथौ सादरं।
श्रीमन्मैथिलकृष्णदत्तकृतिना सन्निर्म्मितं नाटकं
अलेखीत्तदिदं मुदा द्रुततरं श्रीहेमनाथद्विजः ॥ शुभमस्तु।

विषयः। (श्रीमद्भागवतीयपुरञ्जनोपाख्यानमवलम्ब्य गुम्फितमिदं नाटकम्।)

अत्र प्रथमाङ्के,—पुरञ्जनसचिवयोरभिनयेन तयोर्नागपुरप्रवेशसूचनं। तत्र च नागराजनाग-रीभिः सादरं सुगृहीतयोस्तयोः स्वामिन्यै स्वात्मनिवेदनम्। सम्नन्तरञ्च समं तत्पुराधि-कारिण्या पुरञ्जन्या पुरञ्जनस्य परिणयः समजनि।

द्वितीयाङ्के,—मृगयानुरागिणो राज्ञोऽदर्शनेन समुपासितायाः अपि सहजन्यया पुरञ्जन्याः शिरोवेदना मूर्च्छा च। अत्रान्तरे समागतस्य तस्य विमर्शनमनुगमनञ्च तदनु मदेऽदनादिदेश प्रस्थितायास्तस्याः।

तृतीयाङ्के,—सितपक्षचरयोरभिनयेन नगरमध्ये शत्रुप्रवेश-पुररोधन-पुरञ्जनापसरण-सूचनम्।

चतुर्थेऽङ्के,—अलक्षितलक्षणेन भगवता सह विलक्षणचरस्य संवादः। तत्र च नवलक्षणा-नाम्नी कामधेनुः प्रविश्यात्मनो गुर्ज्जरवृन्दावनादिदेशभ्रमणविवरणं निवेदयामास। अत्रान्तरे

चेटीमात्रमनाथायाः नाथविरहविधुरायाः पुरञ्जन्याः अग्निप्रवेशसाहसमवलोक्य नवलक्षणया तस्याः समाश्वासनञ्च।

पञ्चमाङ्के,—नवलक्षणासाहाय्येन तस्या गोपाललोकगमनपूर्व्वकं भगवद्दर्शनेन कृतार्थता पुनः पुरञ्जनसमागमश्चेति।

---

**No. 2001.** शूद्राचारचिन्तामणिः। Substance country-made paper, 11 × 2 inches. Folia, 102. Lines, 5 on a page. Extent, 1761 s'lokas. Character, Maithilí. Date, L. S. 425. Place of deposit, Sáradápur. Post Mádhepurá, Darbhángá, Pandit Vis'vanátha Jhá. Appearance, destroyed by worms. Prose and verse. Correct.

**S'udráchára-chintámani.** On the religious duties of S'udras. By Váchaspati Misra, of the court of Mahárájá Harináráyana, of Mithilá.

**Beginning.** नीत्वणत्विषे नमस्कृत्य श्रीवाचस्पतिशर्म्मणा।
धर्म्मशास्त्रं समालोक्य शूद्राचारो वितन्यते॥
तत्र। उद्बोधमैत्रशौचानि तथाचमनकारणम्।
दन्तशुद्धिराचम ++ प्रातस्नानादिक ततः॥
मध्यन्दिनस्नानविधिस्तर्पणस्य विधिस्ततः।
देवार्चनं तत्प्रसङ्गाद्वैष्णवस्य च लक्षणम्॥ इत्यादि.

**End.** मिथ्याभिशंसिनो दोषा द्विः स+भूतवादिनः।
मिथ्याभिशस्तदोषञ्च समाद+ + + + +॥

**Colophon.** इति महाराजाधिराजश्रीमद्धरिनारायणपरिषदा सकलपण्डितमण्डलीशिरोमणिना श्रीवाचस्पतिमिश्रेण विरचितः शूद्राचारचिन्तामणिः समाप्त इति।
शुभमस्तु। लसं ४२५। ज्येष्ठवदि।

विषयः। सदाचारनिरूपणादिकं। शूद्राणामुद्बोधविधिकथनं। मलमूत्रादित्यागविधिः। शौचविधिकथनं। आचमनविधिकथनं। आचमननिमित्तानि। द्विराचमननिमित्तादि। आचमनापवादकथनं। दन्तधावनविधि.। प्रातःस्नानादिविधिः। प्रातःकालादिनिरूपणं। माघमादिविधिकथनं। पोष्यवर्गपालनावश्यकतानिरूपणमुखेन पोष्यवर्गनिरूपणं। योगक्षेमादिकथनं। नैमित्तिकादिषड्विधस्नानविधिः। तर्पणविधिः। जलस्थलयोस्तर्पणविधिः। देवपूजाविधिः। उपचारविधिः। पुष्पादिचयनविधिः। दुर्गापूजाविधानादिकथनं। शिवपूजाविधिः। सूर्य्यपूजाविधिः। पञ्चोपचारादिविधिः। धूपदीपनैवेद्यादिनिरूपणं। शूद्रेण वैश्वदेवानन्तर-

पूजाप्रश्ने सिद्धान्नं देयं नान्यत्रेति निरूपणं। रसालादिविधिकथनं। विशेषेण दुर्गाशिवयोः पूजाविधिकथनं। शिवलिङ्गादिनिर्म्माणविधिः। विहिताविहितपुष्पाणि। विष्णुपूजाविधिः। शालग्रामशिलामाहात्म्यादिकीर्त्तनं। भगवद्गीतादिमाहात्म्यकथन। विष्णोर्द्वात्रिंशदपराधाः विष्णवे दानानि। गवादिदानविधिः। सर्व्वत्र विशेषदानप्रयोगकथनं। हरिभक्तिमाहात्म्य-कीर्त्तनं। पञ्चमहायज्ञविधानं। तत्र वैश्वदेवप्रयोगकीर्त्तन। नित्यश्राद्धविधिः। तत्र प्रयोगकथनं। अतिथिपूजाविधिः। भोजनविधिः। भोज्याभोज्यनिरूपणं। पानयोग्यदुग्धादिनिरूपणं। पशु-पक्षिमांसादिभक्षणविधिः। तत्र भक्ष्याभक्ष्यनिरूपणं। भक्ष्यमत्स्यनिरूपणं। मांसभक्षणवर्ज्जनयो-र्विधिः। षड्विधघातकलक्षणादिकथनं। शयनविधिकथनं। दारोपगमनविधिः। गर्भाधानादि-विधिकथनं। रजस्वलाधर्म्मनिरूपणं। सामान्यतः स्त्रीधर्म्मनिरूपणं। गार्हस्थ्यधर्म्मनिरूपणं। मिथ्याशंसनादिदोषकीर्त्तनञ्च।

---

**No. 2002.** दानपञ्जी। Substance, country-made paper, 11 × 3 inches. Folia, 10. Lines, 9 on a page. Extent, 1,708 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepurá, Darbhángá, Pandit Harshanátha Jhá. Appearance, new. Prose and verse. Correct.

**Dánapanjí.** A summary of religious benefactions. By Ratnákara Thakkura.

**Beginning.** यदीयस्मरणादेव समीहितमवाप्यते।

सद्भिर्निर्व्विघ्नमधुना तन्नमामि परं महः॥

श्रीरत्नाकरधीरेण विस्तराद्दानसागरात्।

सर्व्वसारं समुद्धृत्य किञ्चिदाख्याय लिख्यते

तत्र दानप्रशंसा। यानि सन्त्यत्र ++ नि हरेः प्रोक्तानि शंसति।

तेषां श्रेष्ठतमं दानमिति मे नास्ति संशयः। इत्यादि।

**End.** दक्षिणां दद्यात्। ततः ॐ स्वस्तीति प्रतिवचनं। अन्यतो गच्छमानीय दक्षिणां दद्यात्।

**Colophon.** इति श्रीरत्नाकरठक्कुरविरचिता दानपञ्जी समाप्ता।

विषयः। दानस्वरूपनिरूपणं। देयद्रव्यगुणकथनं। दानविधिः। दानकालनिरूपणं। अलङ्कारधान्यादिदानविधिः। वर्षभोज्यदानविधिः। कपिलादिगोदानविधिः। उभयतोमुखी-दानविधिः। वृषभधेनुदानविधिः। गुड़धेनु-तिलधेनु-जलधेनु-घृतधेनुप्रभृतिदानविधिः। वरमहिषीदानविधिः। अश्वदानविधिः। दोलादिदानविधिः। दासीदानादिविधिः। आस-नादिदानविधिः। सिन्दूरतैलशर्कराजलधर्म्मघटादिदानविधिः। विविधफलशस्यदानविधिः।

सुवर्णरजततान्त्रादिदानविधिः। पूर्णपात्रकृष्णाजिनादिदानविधिः। ग्रामनगरादिदानविधिः। शालग्रामशिवलिङ्गादिदानविधिः। घृतघटादिदानविधिः। कौषेयवस्त्रादिदानविधिकीर्त्तनञ्च। अत्र सर्व्वत्र दानप्रयोगकीर्त्तनमिति ज्ञेयम्।

---

**No. 2003.** योगरत्नाकरः। Substance, country-made paper, 12 × 4 inches. Folia, 20. Lines, 6 on a page. Extent, 381 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepurá. Darbhángá, Pandit Harshanátha Jhá; another copy at S'ántipura, Pandit Kálidása Vidyávágis'a. Appearance, fresh. Verse. Generally correct.

**Yoga-ratnákara.** A guide to the performance of Yoga meditations, giving details about the various modes of sitting, regulating the breath, &c., &c. By Víreśvaránanda.

**Beginning.** यद्ब्रह्म वेदाः प्रवदन्ति सन्तश्चैतन्यशब्दात्मकमव्ययं तत्।
योगीन्द्रवृन्दैः परमात्मतेजो ध्यातं सदाव्यादनिशं परं नः॥
आनन्दोल्लासकन्दोपरिपरिविलसद्ब्रह्म पद्मान्तरस्थं
नित्यं चैतन्यरूपं वरद-भयहरं तत्त्वविद्यादियुक्तम्।
शान्तं पूर्णेन्दुकुन्दोज्ज्वलविमलवपुर्विश्वनाथं भजेऽहं
विज्ञानध्वान्तहंसं सकलसुरगणैर्योगिभिर्वन्द्यमेकम्॥
वदाम्यहं योगमलङ्क्रमच्युतं यतोऽभवत् शाश्वतमव्ययं स्वयम्।
अभ्यासतो ब्रह्मनिरूपणात्मकं संसारसिन्धोस्तरणैककारणम्॥
सारं सङ्गृह्य तन्त्राणां वेदानां मतमव्ययम्।
योगिनां परहंसानां सिद्धानां विदुषां सताम्॥
श्रीमद्वीरेश्वरानन्दस्तनोति ज्ञानसिद्धये।
योगरत्नाकरे ग्रन्थे क्रमशो मे।चहेतवः॥ इत्यादि।

**End.** अभ्यासाद्भवतीह सिद्धिरतुला ध्यानाद्धि योगीश्वरः
सम्पाठात् कवितालिरेव विमला सम्पाठ्यते येन वै।
तस्याष्टौ परिसिद्धयः करतले नित्यं भवेन्मुक्तिमान्
पापान्मोचविमानमेति नितरां निर्व्वाणमेवाच्युतम्॥
श्रीमद्धरिहरानन्दनाथशिष्येण धीमता।
श्रीमद्वीरेश्वरानन्दकृतिना ग्रन्थ ईरितः॥ ॐ नमस्तारिण्यै।

विषयः। प्रथमतो योगाभ्यासप्रकारनियमादिकथनम्। कुम्भकादिकरणविधिकीर्त्तनं।

प्राणायामस्वरूपकथनादिकं। आसनविधिकथनं। ध्यानप्रकारकथनं। ध्येयस्वरूपादिकीर्त्तनं। षट्चक्रनिरूपणादिकं। शिवतीर्थाद्याध्यात्मिकतीर्थनिरूपणं। अन्तर्यजनविधिकथनं। तत्र ध्यानादिविधिकथनं। उद्वर्त्तनविधिः। आन्तरहस्तिनिरूपणं। शारीरतत्त्वकथनमुखेन जीवस्वरूपादिकथनं। मोक्षस्वरूपकीर्त्तनञ्च।

---

**No. 2004** पाण्डवचरितम्। Substance, country-made paper, 12 × 1¼ inches. Folia, 127. Lines, 5 on a page. Extent, 2,530 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Pandit Vis'vanátha Jhá. Appearance, decayed. Verse. Correct.

**Pándava-charita.** An epic poem on the career of the Pándavas, founded on the details given in the Mahábhárata. By Lakshmídatta, son of Lakshmínáráyana, who styles himself a Rájapandita, but does not say in whose court he flourished. The codex is incomplete, breaking off in the middle of the 21st canto.

**Beginning.** कन्दर्पदर्पाङ्कुरमात्तयोगं सिन्दूरपूरारुणसिन्दुगौरम्।
कुन्दावदातस्मितमद्गुहास्यं वन्दामहे तद्द्वयमद्वयं वा॥
गोवत्सपुच्छग्रहणोत्सुकाय गोपाङ्गनापाङ्गतरङ्गिताय।
आनन्दनन्दाङ्गनरिङ्गणाय तस्मै परस्मै महसे नमोऽस्तु॥
सन्दर्भलम्भाय विदर्भवाचां व्यासं भजे चन्द्रमसं कवीनाम्।
यद्भारतीनिर्भरचन्द्रिकाभिर्मोहान्धकारा जगतो विधूताः॥
व्यासस्य यद्भारतभारतीषु व्यासं समासादभिधातुमीहे।
बाल्येहित + + + सन्तु सन्तः कर्म्माणि कुर्वन्ति न किं किशोराः॥
सोमान्वये सोम इवाम्बुराशौ राजाऽभवत्पाण्डुरिति प्रसिद्धः।
यद्दाक्रमामाद्य सुखापधानं सदा + + + कमला व्यरंसीत्॥ इत्यादि।

**End.** सङ्ग्रामाय यदा जुहाव सुरजिद्वाचा तपोनन्दनो
व्याख्यानैरथ वा + + पनिपदां संसूय दुर्य्योधनं।
तज्जातं कुरुशासितुः सुरपुरप्राप्तौ पुरो मङ्गलं
प्रायश्चित्तमनुत्तमं खलु सतां यत्किञ्चिदाभाषणम्॥

**Colophon.** इति श्रीश्रीमल्लक्ष्मीनारायणराजपण्डितकविडिण्डिमलक्ष्मीदत्तविरचिते पाण्डवचरिते महाकाव्ये पाण्डवविजयो नाम विंशतितमः सर्गः। (इतः परमेकविंशतितमसर्गस्य कियदंशो वर्त्तते)।

विषयः। १मे सर्गे,—पाण्डोर्मृगयावर्णनं। मृगरूपधारिणः किमिन्दमुनेः तस्य शापश्राप्तिकथनं। पाण्डवानामुत्पत्तिकथनञ्च। २ये,—पाण्डवानामस्त्रशिक्षावर्णनादिकं। ३ये,—तेषामेकचक्रानिवासवर्णनं। ४र्थे,—द्रौपदीस्वयंवरवर्णनं। ५मे,—सुभद्राहरणवर्णनं। ६ष्ठे,—जलविहारवर्णनं। ७मे,—खाण्डवदाहवर्णनं। ८मे,—राजसूयवर्णनं। ९मे,—द्यूतक्रीडावर्णनं। १०मे,—अर्ज्जुनस्य तपस्यार्थं प्रयाणवर्णनमुखेन गिरिवनादिवर्णनं। किराताज्र्जुनसमरसंरम्भादिवर्णनञ्च। ११शे,—अर्ज्जुनस्य सुरलोकगमनवर्णनं। तत्र स्वर्गवर्णनञ्च। १२शे,—अर्ज्जुनस्य उर्व्वश्या सह संवादवर्णनादिकं। १३शे,—युधिष्ठिरादीनां तीर्थयात्राप्रसङ्गेन वदरिकाश्रमगमनवर्णनं। १४शे,—सौगन्धिकाहरणवर्णनं। १५शे,—पाण्डवानां द्वैतवनवासवर्णनं। गन्धर्व्वराजकृतकौरवकामिनीहरणादिवर्णनञ्च। १६शे,—पाण्डवानां विराटनगरवासवर्णनं। १७शे,—उत्तरगोगृहसमरवर्णनं। १८शे,—कुरुपाण्डवयोः समरोद्योगवर्णनं। १९शे,—भीष्मवधवर्णनं। अभिमन्युवधवर्णनञ्च। २०शे,—जयद्रथवधवर्णनं। द्रोणकर्णादिवधवर्णनं। दुर्य्योधनस्य द्वैपायनह्रदप्रवेशवर्णनञ्च। (इतः केचन एकविंशतितमसर्गीयाः श्लोका वर्त्तन्ते। तत्र च दुर्य्योधनस्योरुभङ्गवर्णनं।)

---

**No. 2005.** भक्तितरङ्गिणी, सेतुसहिता। Substance, country-made paper, 10 × 4 inches. Folia, 460. Lines, 10 on a page. Extent, 12,048, s'lokas. Character, Nágara. Date, ? Place of deposit, Sáradápura; Post Mádhepura, Dárbhángá, Paṇḍit Vis'vanátha Jhá. Appearance, fresh. Prose and verse. Correct.

**Bhakti-taraṅgiṇí** A metrical dissertation on devotion to Kṛishṇa. By Vaidyanátha Páyaguṇḍa. The text extends to 200 s'lokas, and is divided into five cantos, metaphorically called waves, *taraṅgas*, in keeping with the name of the work, which means "the ocean of devotion." The author takes the Bhágavata Puráṇa for his text. The work was completed for the gratification of Govindarája, son of Rámaráya Maṇi, of the gotra of Bharadvája. Annexed to the work in a commentary entitled *Setu* or the bridge. Its author's name is not apparent.

**Beginning.** मूलस्य,—निखिलभुवनपालं कामिनीकेलिलोलं
यदुकुलमणिपालं दानवेन्द्रान्तकालम्।
सजलजलदनीलं नन्दबालं सुबालं
व्रजयुवतिरसालं नौमि गोपालबालम्॥
मोहितगोपीजालं दोलितमालं यशोविशालम्।
दर्शितचित्रलीलं नीरदनीलं नमामि गोपालम्॥

अस्ति श्रीमदमन्दमन्दरगिरिग्रावस्थलुप्रस्खल-
त्तुङ्गोत्तुङ्गतरङ्गभङ्गिसुभगप्रभात्मजारोधसि ।
इन्द्रप्रस्थमिहावलोमसदनं सत्सम्पदामासनं
स्वःसाम्राज्यविडम्बिनिस्तुलगुणं भूमण्डलीमण्डनम् ॥
तत्रोदारपवित्रचित्रचरिते सद्विप्रविश्वम्भरा-
लम्बे विष्णुपदारविन्दमुकुलध्यानादवाप्तोदये ।
भारद्वाजकुलाम्बुधौ समभवच्छ्रीरामरायो मणिः
प्राज्ञो दान्तियुतः सुनीतिनिपुणो रामोऽपरः सद्यशाः ॥
तस्मादाविरभूच्चतुर्थ इव यः सप्तार्चिषामष्टमो-
वर्षाणामिव पञ्चमः स पुरुषार्थानां महानीतिमान् ।
साक्षाच्छ्रीपतिरांश्रितराजमभ्रतिर्गोविन्दरायः सुधी-
++मेघ इवावदातहृदयो विष्णोः पदालम्बनः ॥
सत्या++तरो ललामसुयशःस्फीतः प्रपीताम्बरः
पद्मासद्मनि यस्य तत्सरसिजे स्वास्ते मुदा सर्व्वदा ।
साक्षात् केशव एव सम्प्रति पुनस्त्रातुं जगन्मण्डलं
तस्मात् श्रीविबुधाधिपो विजयते श्रीकेशवाख्यः सुधीः ॥
भूरिस्फुरन्मदगदाधिगताधिकाधि-
चेतोऽगदीकरणमौषधमद्वितीयम् ।
आदिष्टवान् स खलु भागवताभिसारं
कर्त्तुं यथा भवति मां मम तत्प्रसादः ॥
तस्यादेशवशात् केशवविभोर्विद्वद्विभूषामणे-
र्ग्रन्थं भक्तितरङ्गिणीति विदितं स्वच्छं ततोऽभ्युद्धरे ।
श्रीमद्भागवताख्यरत्ननिधितो रत्नं सतां शर्म्मदं
माहात्म्यश्रवणादिपञ्चलहरीयुक्तं प्रयत्नादहम् ॥
आलोच्य निखिलं भक्त्या श्रीमद्भागवतं मुदा ।
इतस्ततानि तत्रत्यान्यत्र पद्यानि कौतुकात् ॥
लिखामि मत्वा नागेशं वैद्यनाथः स्वबुद्धये ।
पायगुण्डेति यः ख्यातः काश्यां सत्कृत्य भक्तितः ।
अत्र श्लोका मया दृष्टाः सहस्त्यर्थं शतद्वयम् । इत्यादि ।
सेतोः,—अवनीतलवर्त्तिलोचनामृतवर्षिं सगुणैकमन्दिरम् ।
प्रमदाजनमीनवेधनं शिशुरूपं तमहं भजे हरिम् ॥

वैद्यनाथः पायगुण्डो विद्वत्केशवदेवजः ।
व्याख्यां भक्तितरङ्गिण्याः सेत्वाख्यां विलिखाम्यहम् ॥
श्रीधरस्वामिमणिभिः कृता येषां मनोहरा ।
व्यत्यस्ता सर्व्वतः सा वै श्लोकीकृत्य प्रयत्नतः ॥
मौलक्रमानुरोधेन सविशेषात् कचिन्मया ।
स्वकृतानां सुपद्यानां नूतना च विलिख्यते ॥

तत्र तावत् प्रारिप्सितग्रन्थप्रतिबन्धकदुरितशमनाय कृतमिष्टदेवतानमस्काररूपं मङ्गलं शिष्य-शिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति निखिलेति ।

**End.** मूलस्य,—अतिप्रयत्नेन मया कृतोऽयं रत्नालयो ग्रन्थनिधिर्गुणाभ्रः ।
समर्पितः श्रीपतिपादपङ्कजे भक्त्या स तेनाद्य हरिः प्रसीदताम् ॥

**Colophon.** इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथविरचितायां भक्तितरङ्गिण्यां पञ्चमस्तरङ्गः सम्पूर्णः । समाप्तोऽयं ग्रन्थः ।

सेतोः—रसानां नवानां शृङ्गारादीनां प्रेम्णो भक्तिरसस्य च आलयः, ग्रन्थेषु निधिः, गुणाभ्रः गुणाश्रयः । शुभमस्तु ।

विषयः । ग्रन्थोऽयं भगवन्माहात्म्यादिप्रतिपादकानां श्रीमद्भागवतीयपद्यानां सङ्ग्रहेण निर्म्मितः । तत्र च कचित् क्वचित्; सङ्गतिमेषां प्रतिपादयितुं स्वयमपि ग्रन्थकारो द्विशतसंख्यकान् श्लोकान् रचयामास । तत्र प्रथमे तरङ्गे श्रीमद्भागवतप्रामाण्यादिनिरूपणपूर्व्वकं प्रथमादिक्रमेण द्वादशस्कन्धवर्त्तिनां श्लोकानां विन्यासेन भगवन्माहात्म्यकीर्त्तनं। एवं द्वितीये तरङ्गे,—भगवद्धाम-प्रतिपादकानां श्लोकानां सङ्गतिर्दर्शिता । तृतीये तरङ्गे,—भगवदुपासनापरपद्यानां सन्दर्भ-सञ्जीकरणं । चतुर्थे तरङ्गे,—भगवत्स्तुतिपराणां पद्यानां सङ्गतिप्रदर्शनं । पञ्चमे तरङ्गे,—भगव-द्भजनप्रयोजकानां तेषां गुम्फननैपुण्यप्रदर्शनेन भक्तिमाहात्म्यप्रपञ्चनं । ग्रन्थस्यास्यैव व्याख्यानं सेतुरिति ज्ञेयम् ।

---

**No. 2006.** तत्त्वदीपनम् । Substance, palm-leaf, 12 × 2 inches. Folia, 192. Lines, 6 on a page. Extent, 6,033 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá. Paṇḍit Vis'vanátha Jhá. Appearance, old. Prose. Correct.

**Tattva-dípana.** A gloss on the S'abdakhaṇḍa of Gaṅges'a's Tattvachintámaṇi. By Vishṇupati, son of Rámapati Mahámahopádhyáya.

**Beginning.** भागधेयं परं ब्रह्म देवकीवसुदेवयोः ।
गुप्तमर्थं श्रुतेर्वन्दे भूयो गोपालबालकम् ॥

गुरो रामपतेः शास्त्रं ज्ञात्वा विष्णुपतिः पितुः ।
कुरुते शब्दखण्डस्य तत्त्वदीपनमीदृशम् ॥
अथशब्देति । अथेत्यानन्तर्य्याभिधानं मङ्गलसूचनाय । इत्यादि ।

**End.** न च व्यभिचारिलिङ्गपरामर्शजन्यत्वेनानुमितेर्भ्रान्तत्वं स्यादिति वाच्यं गुणजन्यत्वेन तस्या अभ्रान्तत्वात् । + + +

**Colophon.** इति महामहोपाध्यायश्रीरामपतिसूनुश्रीविष्णुपतिविरचितं शब्दखण्डस्य तत्त्वदीपनं परिपूर्णम् । ॐ शिवमिति ।

**विषयः ।** गङ्गेशोपाध्यायकृततत्त्वचिन्तामणेः शब्दखण्डस्य व्याख्यानम् ।

---

**No. 2007.** किरणावलीप्रकाशप्रकाशिका । Substance, palm-leaf, 12 × 2 inches. Folia, 192. Lines, 6 on a page. Extent, 5,610 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Pandit Vis'vanátha Jhá. Appearance, old. Prose. Correct.

**Kiraṇávalí-prakás'a-prakás'iká.** A gloss on Vardhamána's commentary on Prasastapáda's Vais'eshika treatise entitled Kiraṇávalí. By Bhagiratha Ṭhakkura.

**Beginning.** कैशोरं कलयन्तं मायाकायं पुरातनं पुरुषम् ।
नन्दालिन्दनिकेतं निगमरहस्यं नमस्यामि ॥
यः कैशोरे विश्वविख्यातकर्म्मा धर्म्माचार्य्यः श्रीमहादेवशर्म्मा ।
तत्सोदर्य्यो वर्द्धमानस्य सूक्तौ भावं मेघः सम्यगाविष्करोति ॥

सृष्टि परद्विष इति पूर्व्वेणान्वयि । तेनान्यदपि बीजं जलसम्बन्धेनाङ्कुरयति इति ध्वनि-त्यते । इत्यादि ।

**End.** द्रव्यत्ववैशिष्ट्यसंसर्गमर्य्यादया भानेवाश्रितत्वावच्छिन्नसाध्यस्य द्रव्यत्वेऽप्रसिद्धेरित्यतः सर्व्वमवदातमिति ।

धीरा धरणिभवानी यमजनि चन्द्राद्भगीरथं तनयम् ।
तस्य कृतावेतस्यां सन्तः सन्तोषमाचरन्तु ॥
आसीदनुपमः पृथ्व्यां महादेवः कुलाग्रणीः ।
अनुजस्तस्य कृतवान् इमां व्याख्यां भगीरथः ॥

**Colophon.** इति महामहोपाध्यायठक्कुरश्रीभगीरथविरचिता किरणावलीप्रकाश-प्रकाशिका समाप्तेति ॥

**विषयः ।** किरणावलीनामप्रशस्तपादकृतपदार्थधर्म्मसङ्ग्रहस्य या व्याख्या तस्या वर्द्धमान-कृतं प्रकाशाभिधेयं यद्व्याख्यानं तस्य व्याख्या ।

---

**No. 2008.** चण्डिकाचरितचन्द्रिका। Substance, country-made paper, 10 × 4 inches. Folia, 31. Lines, 10 on a page. Extent, 734 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Pandit Harshanátha Jhá. Appearance, fresh. Verse. Correct.

**Chandiká-charita-chandriká.** A poem on the exploits of the Deví as described in the Chandí section of the Márkandeya Purána. By Krishnadatta.

**Beginning** सिद्धिश्रीः साधकानां प्रसरति पुरतो यत्पदाराधकानां
निर्विघ्नं यत्प्रसादादुदयति सहसा सापि निःश्रेयसश्रीः।
त्रैगुण्यात्मत्रिमूर्त्तिर्निरुपधिकरुणास्वर्य्यमाधुर्य्यधुर्य्यात्
तुर्य्या सा कापि कुर्य्यात् सपदि मम मनःशुद्धिबुद्धिप्रसिद्धिम्॥
चन्द्रचूडां चिदानन्दचुञ्चुं चन्दनचर्च्चिताम्।
चञ्चन्तीं चञ्चलां चाच चिन्मये चण्डिकां चिरम्।
सद्गुणाम्बुनिधिहृद्धिकारिणी तापपापतिमिरापहारिणी।
सेव्यतामभृतमारम्भिणी चण्डिकाचरितचन्द्रिकाऽचिरम्॥
मङ्गलमयि जनमङ्गलनामसहस्रे। प्रथयसि धामनि रुचतमिस्रे।
श्रीमति गतिरसि जगदम्ब जय जय देवि शिवे॥

ध्रुवम्। हरिमवबोधयसि स हरसि च विधिखेदम्।
जनयसि मधुकैटभमतिभेदम्॥ इत्यादि।

**End.** सिद्धिरस्तु सकले मम साध्ये सम्प्रसादविभवेन शिवायाः।
तत्पदाम्बुजयुगे रमणीये बुद्धिरस्तु सततं सुहृतश्रीः॥

**Colophon.** इति कृष्णदत्तकृतौ सिद्धिलक्षणायां चण्डीचरितचन्द्रिकायां सम्प्रसादवरप्रदानो नाम एकादशः सर्गः। समाप्तोऽयं ग्रन्थः।

विषयः। देवीमाहात्म्यमवलम्ब्य विरचितमिदं गीतिकाव्यमिति।

---

**No. 2009.** मिथिलेशाह्निकम्। Substance, country-made yellow paper, 11 × 4 inches. Folia, 212. Lines, 9 on a page. Extent, 5,459 s'lokas. Character, Maithilí. Date, ? Place of Deposit, Navání, Post Mádhepura, Darbhángá, Pandit Vañsamani Jhá. Appearance, fresh. Prose and verse. Correct.

**Mithiles'áhníka.** A Smriti compilation embracing all the leading topics of domestic religious duties. By Ratnapáni S'armá, son of Gangolí Sanjévesvara S'armá.

**Beginning.** स्रष्टा कमलजन्मा यस्त्रिजगतां गोविन्दतां रक्षणे
संहारे हरतामपारमतुलां विश्वात्मतायाश्च यः ।
नैर्गुण्येऽप्यनरूपतामिव परं तस्मै नमोऽमायिने
हेरम्बाय करावलम्बनविधावालम्बनायासकृत् ॥
वंशावलीचरितं मिथिलेशश्रीछत्रसिंहनृपतेः ।
कथितं रामचरितं शृणु विदितं तदाह्निकं सपदि ॥
प्रभोऽस्तु सामवेदित्वात् तथाचारोऽपि लिख्यते । इत्यादि ।

**End.** न्यायोपार्ज्जितवित्तेन कर्त्तव्यं ह्यात्मरक्षणम् ।
अन्यायेन तु यो जीवेत् स कर्म्मभ्यो बहिष्कृतः ॥
तिष्ठतु नाम प्रकीर्णकमतः परम्) ।

**Colophon.** इति श्रीगङ्गालीमिश्रविश्वेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीते मिथिलेशाह्निके प्रकीर्णकं समाप्तम् ।

विषयः । वैदिकप्रातःकृत्यं । तान्त्रिकप्रातःकृत्यं । मूत्रपुरीषाद्युत्सर्गविधिः । शौचविधिः । आचमनविधिः । आचमनानुकल्पविधानं । दन्तधावनविधिः । प्रातःसन्ध्याविधिः । द्वितीययामार्द्धकृत्यं । एवं तृतीयचतुर्थयामार्द्धकृत्यनिरूपणं । स्नानविवेचनं । तत्र वैदिकतान्त्रिकादिमन्त्रकथनं । वेदाभ्यासादिकथनं । गुरुपूजाविधिः । पौष्यवर्गादिनिरूपणं । ब्राह्मणादिधर्म्मकथनं । नीतिकथनं । ब्राह्मणादिवर्णानां निषिद्धानि । आपत्कृत्यानि । चक्रवृद्ध्यादिनिरूपणं । आतुरस्नानादिविधिः । अघमर्षणादिविधिः । द्विवस्त्रादिविधानं । स्नानानन्तरं शिरःकम्पने दोषकथनं । मन्त्रस्नानादिकथनं । तीर्थावाहनविधिः । तान्त्रिकादितिलकविधिः । वैदिकसन्ध्याविधिः । तत्कालविवेचनं । गायत्रीव्याख्या । दर्भनामतत्प्रभेदकीर्त्तनं । प्राणायामादिनिरूपणं । सामगानां वैदिकसन्ध्याप्रयोगः । तान्त्रिकसन्ध्याप्रयोगः । वैदिकतर्पणविधिः । यज्ञोपवीतविधिः । स्त्रीकर्त्तृकतर्पणे विशेषकथनं । काम्यतर्पणादिकथनं । पितृगाथाकीर्त्तनं । तर्पणवाक्यविवेचनं । जपयज्ञादिनिरूपणं । जपे निषिद्धानि । नवग्रहार्चनविधिः । ब्रह्मयज्ञविधिकथनं । गायत्रीहृदयगायत्रीकवचादिकथनं । तैलाभ्यङ्गादिव्यवस्था । देवप्रतिमानिरूपणं । शालग्रामशिलादिनिरूपणं । शिवनैवेद्यग्राह्यत्वनिरूपणं । देवगृहलेपनादिमाहात्म्यकथनं । देवतास्नाने घृतादिपलविवेचनं । अष्टमङ्गलनिरूपणं । सामान्यतः पूजनक्रमकीर्त्तनं । पुष्पविचारः । सूर्य्यादिदेवपूजाफलकीर्त्तनं । देवताविशेषे विहिताविहितपुष्पाणि । पुष्पमानविधिः । देवताविशेषे धूपनैवेद्यादिविवेचनं । स्नानकुम्भविवेचनं । नैवेद्यभक्षणविचारकथनं । दुर्गादिपूजाविधिः । शिवलिङ्गविधानकथनं । पञ्चमुखादिरुद्राक्षविधिः । लिङ्गपरिमाणादिकथनं । शिवनैवेद्यादिपवित्रता । वैष्णवस्य रुद्राक्षधारणफलं । समयविशेषे रुद्राक्षधारणनिषेधः । रुद्रादिप्रभेदतदभिषेकादिकथनं । शतरुद्रीयकथनं । विष्णुपूजाविधिः । अत्र षोडशो-

पचारादिनिरूपणं। सर्व्वदेवमन्त्रकथनं। अष्टाङ्गपञ्चाङ्गादिप्रणामविधिः। निर्म्माल्यधारणादि-विधिः। विष्णोरपराधाः। पत्रदानेनापराधक्षमाकथनं। नारायणपूजाविधिः। चरणोदका-दिविधिः। सामान्यतः सर्व्वदेवतातान्त्रिकपूजाविधिकथनं। तत्र विविधन्यासमुद्रोपचारादि-विधिकथनं। गुरुपूजनादिविधिः। करमालाविधिः। मणिमालानियमः। महाशङ्खमालादि-विधिः। देवताभेदे मालाभेदकीर्त्तनं। मालासंस्कारादिकथनं। सङ्क्षेपहोमकथनं। जप-पदार्थविवेचनं। जपाङ्गविचारः। लुप्तबीजमन्त्रादिकथनं। कवचादिपाठविधिः। निर्म्माल्य-धारणविधिः। पञ्चद्रव्यशुद्धिविधानकीर्त्तनञ्च। वैश्वदेवादिविधिः। होमे विहिताविहितद्रव्याणि। हविष्यद्रव्यविवेचनं। अग्न्यभावे अप्सु होमविधिकथनं। पायसवलिविधिः। नित्यश्राद्धविधि। अतिथिपूजाविधिः। सनकादिदानविधिः। गोग्रासविधिः। वामदेव्यगानविधिः। भोजन-विधितत्समयादिनिरूपणं। द्विरशनविधिः। भोजनपात्रविचारः। भोज्याभोज्यविवेचनं। प्रासादादौ भोजननिषेधः। ताम्बूलविधिः। षष्ठयामार्द्धकृत्यनिरूपणं। सन्ध्याकथनं। शयन-विधिः। शय्याविवेचनं। अन्यशय्यायां शयनादिनिषेधः। शयनसमये पठनीयकथनं। दारोप-गमनविधिः। गर्भाधानादिकथनं। रजस्वलाशौचनिरूपणं। पुत्रानुत्पत्तौ उपायकथनं। तत्र दिवसनक्षत्रादिनिरूपणं। द्रव्यगुणकथनं। ऋतुगुणकथनं। रसगुणकथनं। धान्यादिगुणः। शाकादिगुणः। विविधफलगुणाः। जल-दुग्ध-दधि-तक्र-घृत-गुडादिगुणाः। लशुनादीना-मभक्ष्यता। मत्स्यभोजनविधिः। वैधहिंसायां दोषाभावनिरूपणं। मांसभक्षणविधिः। वृथामांस-भक्षणादौ दोषकथनं। मांसस्य पुरुषार्थचतुष्टयसाधनत्वकथनं। भक्ष्यमत्स्यपरित्यागादिनिरूपणं। भोजनार्हान्ननिरूपणं। शूद्रान्नविवेचनं। प्रतिपदादिक्रमेण कुष्माण्डादिनिषेधः। नवखातनवो-दकादिविवेचनं। द्रव्यशुद्धिनिरूपणं। अभ्युक्षणमात्रशुद्धिनिरूपणं। गुडादिशुद्धिकथनं। भोजन-प्रकारकथनं। धर्म्मार्थविवाहफलं। बन्धुहीनस्य संस्कारकरणे फलं। शूद्रश्राद्धादिभोजनदोषकी-र्त्तनं। गार्हस्थ्यधर्म्मनिरूपणं। न्यायोपार्ज्जितधनप्रशंसा। अन्यायोपार्ज्जितधनस्य निन्दाकीर्त्तनञ्च।

---

**No. 2010. तन्त्रकौमुदी।** Substance, palm leaf 10 × 2 inches. Folia, 112. Lines, 6 on a page. Extent, 2,485 s'lokas. Character, Maithilí. Date, Sk. 1551. Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Paṇḍit Vis'vanátha Jhá. Appearance, old. Verse. Correct.

**Tantra-kaumudí** A digest of Tántric religious duties. By Devanátha S'armá. The work is purely Vaishṇavite, and refers only to those rites and duties which Vaishṇavas recognise. None of the S'ákta rites has been noticed. At the end of the work the author gives a long list of the Tantras, Yámalas, and Pancharátras he had consulted.

**Beginning.** वाणीरद्रुमकुञ्जभाजियमुनाकूले तमालद्युति-,
निर्मुक्ताङ्गशरच्छशाङ्कविकसद्दिव्याननो माधवः ।
राधोल्लासविलासविभ्रमलसत्स्वेदार्द्रगण्डस्थलो-
गोपीभिर्मधुनिर्व्विशेषमनिशं पीतो हरिः पातु वः ॥
श्रीदेवनाथशर्म्मा तनुते खलु तन्त्रकौमुदीमेताम् ।
आगमलीनमतीनामतिहृद्यामखिलतन्त्रेषु ॥
सम्प्रदायविरोधेन सिद्धमप्युज्झितं मया ।
सम्प्रदायानुरोधेन निर्म्माणमपि कथ्यते ॥
अथागमेन प्रामाण्यं विसम्वादिनि सर्व्वतः ।
पञ्चरात्रप्रमाणत्वं रोधकस्यानुरोधतः ॥ इत्यादि ।

**End.** संहितां वैष्णवीं तद्वत् तत्त्वसागरसंहिताम् ।
संहितां कपिलप्रोक्तां श्रीमन्म+रसंहिताम् ॥
तन्त्रं श्रीभुवनेश्वर्य्या मन्त्रदेवप्रकाशितम् ।
कल्पं श्रीवनदुर्गायास्तन्त्रं सम्मोहनाह्वयम् ॥
हयशीर्षमुखमतं सारसङ्ग्रहसङ्ग्रहम् ।
प्रपञ्चसारव्याख्यानं मन्त्रदर्पणमेव च ॥
विज्ञानभास्करं तद्वत् श्रीरामार्च्चनचन्द्रिकाम् ।
मन्त्रनेत्रं चन्द्रिकाया व्याख्यानं यामलत्रयम् ॥
विश्वानेश्वरसिद्धान्तसारश्रीतन्त्रकाण्यपि ।
विश्वामलुलितं पञ्चरात्रं नारायणीमपि ॥
वसिष्ठसंहितां गार्ग्यसंहितां भैरवसंहिताम् ।
दिव्यं सारस्वतं चित्रचन्द्रिकां कामिकमप्यथ ॥
चौमावरोत्तरग्रन्थं प्रतिष्ठासारसङ्ग्रहम् ।
संहितां वायवीं तद्वत् संहितां ब्रह्मणस्तथा ॥
शम्भोः संहिताश्चैव मन्त्राश्च++र्निं तथा ॥
ईशानसंहितां तद्वत् सिद्धान्तं विश्वकर्म्मणः ॥
तन्त्रं श्रीदक्षिणामूर्त्तेः शतपञ्चादिकं तथा ।
व्याख्यानं शारदायाश्च वैशम्पायनसंहिताम् ॥
तथैव त्वरिताख्यानं स्मृतिशास्त्राण्यशेषतः ।
ज्योतिःशास्त्राणि चालोच्य सकलाः परपद्धतीः ॥
सर्व्वेषां सारमुद्धृत्य देवनाथेन धीमता ।
विधानमिति सम्प्रोक्तं परश्चर्य्यादिकर्म्मणः ॥

**Colophon.** चन्द्रबाणशरभूमिभूषिते सम्मते शकमहीपतेर्गते ।
रामनामविदितेन केनचिन्मिश्रसंमे लिपिरलिखरायुषा ॥

विषयः । तन्त्रशास्त्रप्रामाण्यव्यवस्थापनं । जन्मसम्पदादिविवेचनं । राश्यादिविवेचनं । सिद्धादिनिरूपणं । मन्त्राणां स्त्रीत्वादिकथनं । दीक्षाकालादिनिरूपणं । कलावतीदीक्षादिविधि-कथनं । दीक्षितस्य नियमादिकथनं । दीक्षायां पूजादिविधिकथनं । पुरश्चर्य्यादिविधिकथनं । तत्र आसनादिनिरूपणं । मुद्राणां लक्षणादिकथनं । जपमालाविधानं । जपविधिः । विविध-मन्त्रनिरूपणं । कौलयोगविधिकीर्त्तनं । दशमन्त्रसंस्कारकथनं । कौलानामाह्निककृत्यविधिकथनं । विशेषेण भूतशुद्धिप्रकारकीर्त्तनं । मातृकादिन्यासविधिकथनं । अन्तर्यजनविधिकथनं । विशे-षेण वाह्यपूजाविधिकथनं । तत्र देवताविशेषे पुष्पादिविवेचनं । नैवेद्यादिविधानञ्च । होम-विधिकथनं । अग्नेर्दशविधसंस्कारकथनं । मन्त्रसिद्धिविधिकथनं । वीरसाधनविधिकथनं । होमद्रव्यप्रमाणनिरूपणं । कुण्डविधानकीर्त्तनं । मानपरिभाषाकीर्त्तनं । षट्कर्मनिरूपणञ्च ।

---

**No. 2011.** मन्त्रप्रदीपः । Substance, country-made paper, 11 × 4, inches. Folia, 125. Lines, 10 on a page. Extent, 4,610 s'lokas Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhangá, Pandit Lála Jhá. Appearance, fresh. Prose and verse. Correct.

**Mantra-pradípa.** A Tántric compilation comprising rules for initiation in Tantric rites; mystic mantras, for different gods and goddesses; and rituals for their worship. By Harapati A'gamácharya, son of Ruchipati Mahámahopádhya, and inhabitant of Váijáligráma. His family village was Kháuál. The work was compiled under the orders of Mahárájádhirája Kañsanaráyana Lakshmínátha Deva, and is divided into 15 chapters. The gods named are partly S'ákta and partly Vaishnavite. No. 747 (II, p. 156), bears the same name as this, but its subject and author are different.

**Beginning.** जगद्गुरुन् नमस्कृत्य नित्यानन्दं महेश्वरम् ।
यस्य स्मरणमात्रेण नृणां सिद्धिर्भवेद्ध्रुवम् ॥
त्रिजगज्जननीमाद्यामच्युतविधिशङ्करैर्वन्द्याम् ।
शवसंस्थामहमीडे निखिलासुरघातिनीं चण्डीम् ॥
खौआलकुलजातो वैजौलीग्रामवासविख्यातः ।
रुचिपतिसूनुः श्रीमान् दीक्षावान् हरपतिर्लयति ॥
श्रीकंसनारायणभूमिपालः सानुग्रहो मे कुरुते निदेशम् ।

मन्त्रप्रदीपं कुरु मत्परं त्वं यद्दर्शने मे भवति प्रमोदः ॥
मूर्द्धा समादाय तदेकदत्तामाज्ञां विविच्याखिलमन्त्रतन्त्रम् ।
यथायथास्थानविचि + मादौ सिद्धादिकं सिद्धिकरं नराणाम् ॥

— — — — — — — — तत्र मन्त्रकरणे विष्णुयामल-रुद्रयामलादिसारमुद्धृत्य लिख्यते ।

तत्र विष्णुयामले,— दीक्षां विनोपदेशस्य दुष्टत्वात् प्रथमन्तु सा ।
पापक्षयं दिव्यभावं साधकस्य करोत्यतः ॥ इत्यादि ।

End. स्तुत्वा प्रणम्य शिरसा उदकेन समर्पयेत् ।
चरणाम्बुजमूले । इति नैवेद्यभक्षणदोषः ।

Colophon. इति समस्तप्रक्रियाविराजमानशिवभक्तिपरायणमहाराजाधिराजश्रीमत्-कंसनारायणश्रीमल्लक्ष्मीनाथदेवनिदेशप्रोत्साहिताज्ञया वैजौलीग्रामवासिविख्यातखौआलग्रामीण-महामहोपाध्यायश्रीरुचिपतिशर्म्मात्मजागमाचार्य्यश्रीहरपतिविरचिते मन्त्रप्रदीपे पञ्चदशः पटलः समाप्तः । मम पुस्तं हरेद्यस्तु चौरविद्याबलेन वा ।
पिता तस्य भवेत् कुष्ठी माता तस्य च शूकरी ॥ इति ।

विषयः । १, २ये पटले,—दीक्षाया आवश्यकत्वकथनं । सिद्धादिनिर्णयः । अकड-मादिचक्रविधिः । नाडीविधिः । राशिचक्रं । नक्षत्रचक्रं । ऋणधनजिज्ञासा । गणनिरूपणं । कुलाकुलादिविचारः । बालादिभेदः । मन्त्रसंस्कारः । दीक्षासमयदेशगुरुशिष्यादिनिरूपणं । सामान्यदीक्षाविधिः । ग्रहणादिकालीनदीक्षा । नवग्रहहोमविधिः । वागीश्वरी-भुवनेश्वरी-नित्या-दुर्गा-बाला-गणेश-चन्द्र-कार्त्तिक-क्षेत्रपाल-सूर्य्य-वह्नि-हरि-हरादीनां मन्त्रनिरूपणं ।

३—७मे पटले,—सर्व्वदेवताप्राणप्रतिष्ठाविधिः । प्रशस्ताप्रशस्तासननिरूपणं । भूतशुद्धिः । श्रीकण्ठादिन्यासाः । मालाद्रव्यकथनं । जपविधिः । मालासंस्कारप्रयोगादिकथनं । ग्रन्थन-विधिकथनञ्च शङ्खस्थापनप्रकारः । आवाहनादिमुद्राकथनं । अर्घ्यपुष्पादिविधिः । दीपनिर्व्वाण दोषकथनं । चिच्छक्तिपूजाविधिः । प्रयोगकीर्त्तनञ्च । छिन्नमस्तापूजाविधिः । उग्रतारा-विधिः । प्रयोगकथनञ्च । उच्छिष्टचाण्डालिनीपूजादिकथनं । सुन्दरीपूजादिकथनं । त्रिपुरसुन्दरीविधिः । कालीपूजाविधिकथनञ्च ।

८—११शे पटले,—नवदुर्गापूजाविधिः । वाग्वादिनीपूजाविधिः । लक्ष्मीपूजाविधिः । महाप्रस्तारिणीपूजाविधिः । अश्वारूढापूजाविधिः । अन्नपूर्णापूजाविधिः । महिषमर्द्दिनीपूजा-विधिः । पूतिनीपूजाविधिः । त्रिपुरभैरवीपूजाविधिः । बालापूजाविधिः । उच्छिष्टमातङ्गी-पूजाविधिः । त्वरितापूजाविधिः । चिकण्ठिकापूजाविधिः । नित्यक्लिन्नापूजाविधिः । नित्या-पूजाविधिः । त्रिपुटापूजाविधिः । पद्मावतीपूजाविधिः । दुर्गापूजाविधिः । जयदुर्गापूजाविधिः । मातङ्गीपूजाविधिकथनञ्च ।

१२—१४शे पटले,—गणेशपूजाविधिः । महागणपतिपूजाविधिः । शक्तिगणपतिपूजा-

विधिः। पीताम्बरगणपतिपूजाविधिः। उच्छिष्टगणपतिपूजाविधिः। वटुकभैरवपूजाविधिः। चन्द्रपूजाविधिः। सूर्य्यपूजाविधिः। विष्णुपूजाविधिः। वासुदेवपूजाविधिः। लक्ष्मीवासुदेवपूजाविधिः। हयग्रीवपूजाविधिः। दधिवामनपूजाविधिः। रामचन्द्रपूजाविधिः। वाराहपूजाविधिः। धरणीपूजाविधिः। नरसिंहपूजाविधिः। श्रीकरपूजाविधिः। पुरुषोत्तमपूजाविधिः। गोपालपूजाविधिः। बालगोपालमदनगोपालादिपूजाविधिः। शिवपूजाविधिः। उमापतिपूजाविधिः। मृत्युञ्जयपूजाविधिः। दक्षिणामूर्त्तिपूजाविधिः। नीलकण्ठपूजाविधिः। अर्द्धनारीश्वरपूजाविधिः। पशुपतिपूजाविधिः। क्षेत्रपालपूजाविधिकथनञ्च।

१५शे पटले,—वटुकनाथपूजाविधिः। चण्डेशपूजाविधिः। अजपापूजाविधिः। मार्त्तण्डभैरवपूजाविधिः। दक्षिणकालीपूजाविधिः। अरिमन्तप्रत्यग्नाग्निकीर्त्तनञ्च। अत्र सर्व्वत्र पूजापद्धतिरस्तीति ज्ञेयम्। इति।

---

**No. 2012.** नीलाद्रिमहोदयः। Substance, palm-leaf, 15 × 5 inches. Folia, 196. Lines, 4 on a page. Extent, 4,018 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Dr. Rájendralála Mitra. Appearance, new. Verse. Correct.

**Níládrimahodaya.** The temple of Jagannátha at Puri, its origin, merits, the images existing there, their worship, feasts and festivals. The work follows closely, but not strictly, the *Purushottama-máhátmya* given in the Padma Purána, but it professes to be an extract from the Súta Sañhitá. It has the alternative name of *Purushottama-máhátmya*.

**Beginning.** नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥
तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं चर्म्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रं।
कृष्णत्विषं कनकपिङ्गजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनां॥
एकदा नैमिषारण्ये पुण्ये सर्व्वसुखप्रदे।
नानातीर्थसमायुक्ते नानागुल्मसमोरमे॥
फलपुष्पाढ्यवृक्षाणां निकरैः परिमण्डिते।
नानानीलसमायुक्ते विविक्ते सगरञ्जिते॥
तापसाश्रमसङ्कीर्णे ख्याते परमपावने।
तादृशेऽपि वने रम्ये शौनकाद्या मुनीश्वराः॥
तुष्णीम्भूय समस्तास्ते गोष्ठीं चक्रुर्मनोरमां।

समस्ततीर्थतत्त्वानां ज्ञानाय जगतीतले ।
क्षेत्राणां शिवदानाञ्च जिज्ञासायै त्वरान्विताः ॥
सभायां जायमानायां तत्क्षणे च मुनीश्वरः ॥
जटामण्डलधारी च कौपीनधृतसुन्दरः ॥
कृष्णाजिनोत्तरीयेण विराजितवपुर्मुनिः ।
सूतस्तदानीं सम्प्राप्तश्च शिष्यगणैर्युतः ॥
तं दृष्ट्वा परमप्रीताः शौनकाद्यास्तपस्विनः ।
समुत्थाय नमश्चक्रुः सोऽपि तान् दण्डवद्भुवि ॥
तत्र प्रणामं कृतवान् उवाच स तदा मुनिः ।
समासीनं ततो दृष्ट्वा ऋषयस्ते मुनीश्वराः ।
ऊचुः प्राञ्जलयः सर्व्वे सर्व्वलोकहिताय वै ॥

ऋषय ऊचुः । भगवन् सर्व्वधर्मज्ञ सर्व्वतीर्थातितत्त्ववित् ।
अतो ब्रूहि समस्तानां तीर्थानां शिवसम्भृतां ।
क्षेत्राणाञ्च फलं तावत् सूत नः कथयाधुना ॥
तेषां मध्ये वरः को वा क्षेत्राणाञ्च मुनीश्वराः ।
तीर्थानाञ्च तथा ब्रूहि यतस्त्वं व्यासशासितः ।
समारभेत तद्वक्तुं गुह्यं तैः दृष्टमुत्तमं ॥

सूत उवाच । शृणुध्वं मुनयः सर्व्वे संयतात्मान एव हि ।
तीर्थानां क्षेत्रराशीनां मध्ये श्रीपुरुषोत्तमः ।
गुह्यः सर्व्वतमोध्वंसी सर्व्वपुण्यफलप्रदः ॥

End. नैव तेषाञ्च देवानां सम्पुष्टिश्च कदाचन ।
न तेषां मङ्गलं भूमौ प्रवृत्तानाञ्च तत्र हि ॥

Colophon. इति सूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये चत्वारिंशत्तमोऽध्यायः ॥

विषयः । अत्र चत्वारिंशदध्यायाः सन्ति । तत्र १मे,—तीर्थानां मध्ये पुरुषोत्तमतीर्थस्य प्राधान्यकथनं । २ये,—कृतयुगे मालवाख्ये देशे अवन्तीनामपुर्य्यां इन्द्रद्युम्नो राजा बभूव इत्यादिवृत्तान्तं । ३ये,—एकाम्रक्षेत्रमाहात्म्यं । ४र्थे,—बलेन भक्त्या च युक्तस्य दारुरूपस्य हरेराविर्भावकथनं । ५मे,—इन्द्रादयो देवा ब्रह्मलोकादागत्य दारुरूपस्य हरेः पूजादिकं चक्रुरित्यादिवृत्तान्तं । ६ष्ठे,—ब्रह्मकृतदारुमयहरिस्तोत्रं । ७मे,—८मे, च ब्रह्मणा इन्द्रद्युम्नाय विष्णोस्त्रिकालपूजाविधिकथनं । ९मे,—आचार्य्यलक्षणकथनं । १०मे,—११शे, च विष्णुपञ्चोपचारादिकथनं । १२शे.—वारतिथिनक्षत्रविशेषेषु पूजाविशेषकथनं । १३शे,—महा

स्नानविधिः। १४शे.—स्नानोत्सववर्णनं। १५शे,—स्नानोत्सवान्ते पूजाप्रकारकथनं। १६शे,—आषाढस्य शुक्लद्वितीयायां पुरुषोत्तमस्य घोषयात्राकथनं। १७शे,—शयनयात्राविधिः। १८शे,—दक्षिणायनयात्राकथनं। १९शे,—श्रावणमासामावस्यादिने पुरुषोत्तमस्य अरुणोदय-कालपूजाविधिकथनं। २०शे,—प्रासादपूर्व्वस्यां दिशि नारायणरूपेणावस्थितस्य वटवृक्षस्य पूजाविधिकथनं। २१, २२, २३, २४शे,—भाद्रकृष्णाष्टम्यां श्रीपुरुषोत्तमपूजादिकथनं। २५शे,—हरेः पार्श्वपरिवर्त्तनं। २६शे,—वामनजन्मोत्सववर्णनं। २७शे,—शक्रध्वजोत्सववर्णनं। २८शे,—पुरुषोत्तमस्य आश्विनमासपूजाविधिः। २९शे,—कार्त्तिकमासपूजाविधिः। ३०शे,—पुरुषोत्तमदर्शनविधिः। ३१शे,—प्रावरणोत्सवविधिः। ३२शे,—पौषमासपूजाविधिकथनं। ३३शे,—उत्तरायणपूजाविधिकथनं। ३४शे,—दोलयात्राकथनं। ३५शे,—दमनकयात्राकथनं। ३६शे,—वैशाखमासपूजाविधिकथनं। ३७शे,—पुरुषोत्तमयात्रादिकं ये नराः कुर्व्वन्ति तेषां पुण्यादिकथन। ३८शे,—दारुब्रह्मघटनाविधिः। ३९शे,—दारुब्रह्मप्रतिष्ठाविधिः। ४०शे,—प्रतिष्ठान्ते पूजाविधिः॥

---

**No. 2013.** अन्योक्तिशतकम्। Substance, country-made paper, 14 × 3 inches. Folia, 12. Lines, 8 on a page. Extent, 330 s'lokas. Character, Maithilí. Date, ? Place of deposit, Lagmá, Post Vaherá, Darbhángá, Paṇḍit Raghunátha Jhá. Appearance, old. Verse. Correct.

**Anyokti-śataka** Miscellaneous verses in illustration of particular figures of rhetoric. By Mohana S'armá, son of Aniruddha Surí. The subjects of the verses are lions, elephants, sheep, ocean, moon, lotus, bee, kokila, crow, geese, desert, well, river, town, Deva, and S'eshanága.

**Beginning.** तरलाङ्गुलिदलशीलित-शुषिराम्बधराधरे धृतां मुरलीम्।
कलमालापयदतुलं गोपकुलं तन्महः कथये॥
अनिरुद्धसूरितनयो मोहनशर्म्मा विदेहदेशीयः।
अन्योक्तिशतकमेतत् कुरुते कमलापतिं नत्वा॥
तत्रादौ सिंहान्योक्तयः।
आतङ्केन मदोत्कटैः करटिभिस्त्यक्तैव भूभृत्तटी
क्रीडद्भिः क्षपणैः करेणुकलभैः क्रान्तः कियत्पौरुषं।
को वेद क्व वसन्ति हन्त शरभाः स्पर्द्धालवो येऽमुना।
कः पारीन्द्रपराक्रमस्य विषयो यस्मिन्नसौ जृम्भताम्॥ इत्यादि।

**End.** तूष्णीमुद्वह नागराज वसुधामाधाय धैर्य्ये मनः
स्वच्छन्दं विहरस्व मा पुनरहिष्वन्येष्वसूयां कृथाः॥

एतस्मिन् विषये स केवलमुपालभ्यः स्वतन्त्रो विधि-
र्यस्त्वामेव जगत्त्रयेऽपि विदधे धौरेयमेतादृशम् ॥
सिंहदन्तिघनवारिधिचन्द्राः पद्मभृङ्गपिककाकमरालाः ॥
मारवावटनदीतरुदेवा-वर्णिता इह हि नागगणेशः ॥

विषयः । अन्योक्त्यलङ्कारध्वनिना प्रास्ताविकाः श्लोका निर्म्मिताः । तत्र सिंह-गज-मेघ-समुद्र-चन्द्र-पद्म-भ्रमर कोकिल-काक-मराल-मरुकूप-नदी-वृक्ष-देव-शेषनागोक्तयः वर्णिताः ।

---

**No 2014.** **सरोजकलिका ।** Substance, country-made paper, 10 × 3 inches. Folia, 18. Lines, 7 on a page. Extent, 316 s'lokas. Character, Maithilí. Date, ? Place of deposit, Lagmá, Post Vaherá, Darghángá, Pandit Raghunátha Jhá. Appearance, old. Prose and verse. Correct.

**Saroja-kaliká.** Dissertations on various Smriti topics. By Bhásvat Kaviratna. Contents: On the necessity of S'ráddhas. Duties of performers of S'ráddhas. Persons fit to perform S'ráddhas. S'raddhas during the first year after death. S'ráddhas before marriages and other auspicious occasions. 'Enquiry about death.' Collection of bones after cremation. Offering of Pindas. Mourning. Mourning of adopted sons. Merging of mourning. Mourning for infants &c. Enquiry about Sapindas.' Purification by bathing. Purification of ground. Ditto of water. Ditto of dressed rice. Ditto from extreme pollution. Ditto of character. Cause of the extension of sin. Injury to life. Expiation for killing cattle. Ditto for great enemies. Ditto for eating food from washermen and others. Ditto for marrying in one's own Gotra. Ditto for incest. Rituals for consecrating cattle. Rules for offering water to the manes. Duties of the twice-born classes. Rules regarding borrowing. Chándráyana and other expiatory rites. Duties of faithful wives. The compilation is obviously a very old one, as its does not quote from, or refer to, any mediæval digest.

**Beginning.** भास्वता कविरत्नेन प्रयत्नेन स्फुटीकृता ।
सरोजकलिका भाति श्रुतिस्त्रीकर्णभूषणा ॥
अथ श्राद्धधर्म्मव्यवस्था । हारीतः ।
न तत्र वीरा जायन्ते नारोगा न शतायुषः ।
न च श्रेयोऽधिगच्छन्ति यत्र श्राद्धं विवर्ज्जितं ॥ इत्यादि ।

End. विश्वायोरपि सा शुद्धा प्रविष्टोऽज्ञातवेदनं ।
आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते विमनास्तु या ॥

Colophon. इति सरोजकलिका समाप्ता । इति शुभं भूयात् ।

विषयः । श्राद्धावश्यकताकथनं । श्राद्धकर्त्तृधर्मनिरूपणं । श्राद्धाधिकारिणः । आद्यैको-द्दिष्ट-सपिण्डनादिविधिः । आभ्युदयिकश्राद्धनिर्णयः । मरणजिज्ञासा । अस्थिसञ्चयविधिः । पिण्डदानविधिः । अशौचनिरूपणं । क्षत्रियप्रभृत्यशौचं । सन्निपाताशौचं । बालाद्यशौचं । सपिण्डादिलक्षणं । स्नानशुद्धिनिरूपणं । भूमिशुद्धिनिरूपणं । उदकशुद्धिः । पक्वान्नशुद्धिः । अन्त्यजोपस्पर्शनशुद्धिः । स्वभावशुद्धिः । पापक्षयहेतुनिरूपणं । हिंसानिरूपणं । गोवधादिप्रायश्चि-त्तकथनं । महापातकादिप्रायश्चित्तं । रजकाद्यन्नभक्षणादिप्रायश्चित्तं । सगोत्रादिपरिणयप्राय-श्चित्तं । अगम्यागमनादिप्रायश्चित्तं । वृषोत्सर्गविधिः । तर्पणविधिः । द्विजातीनां विहिताविहि-तविधिः । ऋणदानादिविधिकथनं । चान्द्रायणव्रतादिकथनं । अशौचव्यतिपतितव्रताधर्मनिरू-पणं । (स्मृतिसङ्ग्रहोऽयमतीव प्राचीनतम इति प्रतिभाति । यतो न कस्यापि निबन्धकारस्य नामाप्युल्लिखितं दृश्यते ) ।

---

**No. 2015.** दिव्यनिर्णयः । Substance, palm-leaf, 13×2 inches. Folia 35. Lines, 4 on a page. Extent, 493 s'lokas. Character, Maithilí. Date, ? Place of deposit, Lagmá, Post Vaherá, Darbhángá, Paṇdit Raghunátha Jhá. Appearance, old. Prose and verse. Correct.

**Divya-nirṇaya.** A digest of the rules regarding oaths and ordeals. By Dámodara Ṭhakkura. Compiled under the auspices of king Saṅgrám Sháh.

Beginning. सङ्ग्रामसाहभूपालाज्ञासम्मानेन सर्वदा ।
दामोदरेण क्रियते दिव्यानामथ निर्णयः ।
तत्र याज्ञवल्क्यः ।
तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥ इत्यादि ।

End. तप्तमाषकदण्डे च क्रमादुक्तं प्रकल्पयेत् ॥

Colophon. इति महामहोपाध्यायठक्कुरश्रीदामोदरकृतो दिव्यनिर्णयः समाप्तः ॥

विषयः । धर्माधर्मपरीक्षार्थं तुलाग्निजलादिरूपदिव्यप्रयोगकथनं । तत्र पातकविशेष-सम्बन्धे तप्तमाषादिविधिकथनं । ऋतुविशेषे जलादिपरीक्षाविधानकथनं । तत्र शिशिर-हेमन्त-वर्षासु अग्निपरीक्षा । शरद्ग्रीष्मयोः सलिलपरीक्षा । हेमन्तशिशिरयोर्विषपरीक्षा । मार्गशीर्ष-

चैत्रवैशाखेषु साधारणपरीक्षाविधिः। कोष्ठपरीक्षायाः सार्व्वकालिकत्वकथनं। परीक्षायां निषिद्धकालकथनं। अथ स्त्रीबालवृद्धातुराणां तुलापरीक्षाविधानं। शूद्रस्य अग्निजलपरीक्षाविधिः। एवं क्षत्रियादिषु विशेषकथनं। कालविशेषे कचिद्दनिकल्पकथनञ्च। लोष्टमाषमाद्दिर्वैलक्षण्येन दिव्यविधिनिरूपणं। तत्र तुलादिपरीक्षासु प्रत्येकमितिकर्त्तव्यताकथनं। धर्म्माद्यद्दिव्यविधिकथनं। फलविधिकथनञ्च।

---

No. 2016. नाड़ीपरीक्षादिचिकित्साकथनं। Substance, country-made yellow paper, 12 × 4 inches. Folia, 34. Lines, 6 on a page. Extent, 552 s'lokas. Character, Maithilí. Date, ? Place of deposit, Navání, Post Mádhepur, Darbhángá, Paṇḍit Vañsamaṇi Jhá. Appearance, new. Prose. Generally correct.

**Náḍíparíkshádi-chikitsá-kathana.** Dissertations on the examination of the pulse, and on the treatment of various diseases. By Ratnapáṇi S'armá, son of Gaṅgolí Sañjívesvara S'armá.

**Beginning.** वन्दे सदानन्दमरन्दसुन्दरं द्विपास्यपादाम्बुजयुग्ममुन्नतम्।
परागपतीक्षतभक्तमानसं विपत्तमोहारि पुरारिलालितम्॥
अथायुर्वेदे नाड़ीपरीक्षादयः।
करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी।
तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः॥ इत्यादि।

**End.** नारायणं भजत रे जठरेण युक्ता नारायणं भजत रे पवनेन युक्ताः।
नारायणं भजत रे भवभीतिभीता नारायणात् परतरं किमपीह नास्ति॥
इति रोगप्रतीकारः पञ्चमो विलासः।

**Colophon.** इति श्रीगङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसंगृहीतनाड़ीपरीक्षादिचिकित्साकथनं समाप्तम्।

विषयः। नाड़ीपरीक्षाविधिः। वातादिप्रभेदनिरूपणं। असाध्यलक्षणं। वातज्वरस्वभावः। एवं पैत्तिकज्वरादिप्रकृतिकथनं चिकित्साकथनं। तत्र ज्वराधिकारे,—द्राक्षादियोगः। दुरालभादियोगः। अर्कादियोगः। कट्फलादियोगः। गुड़पिप्पलीयोगः। नवाङ्गयोगः। नागरादियोगाः। पटोलपञ्चकं। अष्टाङ्गधूपकथनञ्च। ज्वरातीसारे,—धान्यपञ्चकादियोगः। हस्तकपाध्वचूर्णं। गुड़विल्वयोगः। श्वासाधिकारे, विभीतकावलेहः। आर्द्रपाकादियोगाः। आमवातप्रतीकारकथनं। कामलापाण्डुप्रतीकारः। व्रणप्रतीकारः। प्रमेहप्रतीकारः। मूत्राघातप्रतीकारः। प्रदरप्रतीकारः। अर्शःप्रतीकारः। स्फुटचरणप्रतीकारः। गण्डमालाप्रतीकारः। कण्ठरोगप्रतीकारः। अम्लपित्तप्रतीकारः। वातगुल्मप्रतीकारः। अग्निमान्द्यप्रतीकारः। हृद्रोगप्रतीकारः। कम्पप्रतीकारः। रक्तपित्त-हिक्काधमोहशुभाध्मरीदषिकादिप्रतीकारः। रसप्रकरणकीर्त्तनञ्च।

6

---

**No 2017.** आचारसङ्ग्रहः । Substance, country-made paper, 12 × 4 inches. Folia, 64. Lines, 10 on page. Extent, 2,480 ślokas. Character, Maithilí. Date, ? Place of deposit, Navání, Post Mádhepur, Darbhángá, Pandit Vañsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

**A'chára-saṅgraha.** A compilation of rules regarding the religious duties of householders. By Ratnapáṇi S'armá, son of Gaṅgolí Sanjiveśvara S'armá.

**Beginning.** नत्वा यच्चरणौ सृजत्यविरतं विश्वं विधिः कञ्जजो-
भिश्चुर्योगचयेऽप्यविघ्नमखिलं पात्यच्युतो वामनः ।
चोभं वा + मथाधिपः पशुपतिः स्थाणुर्नयत्यस्तु मे
वाणीसिद्धिकरो विपद्भ्रमहरो लम्बोदरः सुन्दरः ॥
आकलय्य बहून् ग्रन्थान् मुनीनां वचनानि च ।
आचारसङ्ग्रहो यत्नात् क्रियते रत्नपाणिना ॥
तथाचाद्यपोद्वातमाह । हारीतः ।
अज्ञानतमसान्धानां भ्रमितानां कुदृष्टिभिः ।
धर्म्मशास्त्रप्रदीपोऽयं धर्म्ममार्गोपदेशकः ॥ इत्यादि ।

**End.** गर्भे पुंसः शुक्रपाताद् यदुक्तं मरणावधि ।
तदेतस्य महाव्याधेर्मत्तो नान्योऽस्ति भेषजम् ॥

**Colophon.** इति गङ्गोलीसञ्जीवशर्म्मसूनुश्रीरत्नपाणिशर्म्मकृत आचारसङ्ग्रहः समाप्तः ।
बहवः सन्ति च ग्रन्था आचारप्रतिपादकाः ।
एकत्र तत्त्वलाभाय मयाऽयं सङ्ग्रहः कृतः ॥

विषयः । आचारस्वरूपकथनं । धर्म्मस्वरूपनिरूपणं । प्रातःकृत्यनिरूपणं । मूत्रपुरीषाद्युत्सर्गविधिः । शौचविधिः । आचमनविधिः । दन्तधावनविधिः । तत्र काष्ठनियमः । प्रातःस्नानविधिः । नैमित्तिकादिस्नानविधिः । सन्ध्योपासनविधिः । प्राणायामविधिः । हविष्यान्ननिरूपणं । तिलकादिविधिः । तर्पणविधिः । स्नानप्रयोगः । सामगवाजसनेयादीनां स्नानप्रयोगः । वाजसनेयिनां सन्ध्याप्रयोगः । सामगानां सन्ध्याप्रयोगः । वाजसनेयिनां तर्पणप्रयोगः । एवं सामगानां तर्पणादिप्रयोगकथनं । ब्रह्मयज्ञनिरूपणं । पूजाधारादिनिरूपणं । शिवदुर्गासूर्य्यनारायणादिपूजाविधानं । पुष्पादिविवेचनं । शिवलिङ्गशालग्रामादिमाहात्म्य । गोमयादिलिङ्गपूजाविधिः । पिण्डस्थप्रकारकीर्त्तनं । वैश्वदेवप्रयोगः । नित्यश्राद्धप्रयोगः । गोग्रासदानविधिः । अतिथिपूजनविधिः । भोजनविधिः । मत्स्यमांसादिभक्षणविधिः । अत्र विविधमतविवेचनं । विविधपक्षिपशुप्रभृतिभोजनादौ दोषाभावकथनं । शयनविधिः । सुगन्धिद्रव्यव्यवहारविधिः । गर्भाधानादिविधिः । भूणलक्षणादिकथनञ्च ।

**No. 2018. पार्व्वणचन्द्रिका ।** Substance, country-made yellow paper, 11 × 4 inches. Folia, 74. Lines, 8 on a page. Extent, 1,752 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhánga, Pandit Vaṅsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

**Párvaṇa-chandriká.** On various kinds of S'ráddhas, their peculiarites, and times and modes of performing them. By Ratnapáṇi S'armá, son of Gaṅgolí Sanjívas'vara S'armá.

**Beginning.** श्रीलम्बोदरपादपद्मयुगलं स्वान्ते निशान्ते दधत्
कुर्व्वे पार्व्वणचन्द्रिकामहमिमां श्रीरत्नपाणिः कृती ।
सन्तोषाय सतां कृपां कलयतां लोकामयाकार्थदा-
मागच्छन्नथ पूर्व्वतोऽधिनरणिश्चैव्यातपन्थोद्धताम् ॥
अथ श्राद्धकालाः । तत्र याज्ञवल्क्यः ।
अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसङ्क्रमः ॥ इत्यादि ।

**End.** ततः पुरोहितं, ब्राह्मणमन्यं वा प्रतिपाद्य स्वाच्छन्द्यं गृहीत्वा पिण्डिकाकोणं
विभाज्य श्राद्धीयद्रव्याणि ब्राह्मणाय प्रतिपादयेत् ॥
छन्दोगपार्व्वणविधिरयमलेखि श्रीरत्नपाणिशर्म्मणा नाथि सुरसरिति ॥

**Colophon.** इति गङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीता पार्व्वणचन्द्रिका
समाप्ता ।

विषयः । श्राद्धकालकथनं । श्राद्धावश्यकता । नवोदकश्राद्धादेर्नित्यत्वकथनं । मलमासेऽपि नवोदकश्राद्धस्य कर्त्तव्यतानिरूपणं । व्रीहिपाकश्राद्धं । हैमन्तिकनवान्नश्राद्धं । अत्र नानाग्रन्थकारमतकथनं । श्रीष्म्यादिपार्व्वणकथनं । अपरपक्षश्राद्धविधिः । मन्वादियोर्दशीविषये मतभेदविवेचनं । कार्त्तिकामावस्यायां विशेषकथन । उल्कादानविधिः । दीपदानविधिः । लक्ष्म्यादिपूजाविधिः । पार्व्वणपदार्थविवेचनं । अमावस्याश्राद्धकालविवेचनं । अनुपनीतादिकृतश्राद्धनिरूपणं । अपाचकपार्व्वणविधिः । महालयादिव्युत्पत्तिकथनं । सामान्यतः श्राद्धकरणवेलानिरूपणं । अत्र मतभेदविवेचनं । काम्यश्राद्धविधानं । मन्वन्तरायुगाद्यादिनिरूपणं । तर्पणप्रशंसा । कृष्णत्रयोदशीश्राद्धनिषेधकीर्त्तनं । तीर्थश्राद्धविधिः । पितॄणां ध्यानविधिकथनं । श्राद्धक्रियाविवेचनम् । तत्र सङ्कल्पवाक्याचमनमार्ज्जनासनपरिवेषणपात्रवस्त्रदीपादिनिरूपणं । परकीयगृहे श्राद्धकरणविधिः । श्राद्धनिषिद्धानि । अपुत्रस्य न पार्व्वणश्राद्धमिति निरूपणं । उपवीतविचारः । द्रव्यपरिभाषाकीर्त्तनं । श्राद्धेऽभिवर्ज्जनीयानि । पार्व्वणप्रयोगकथनं । श्राद्धीयद्रव्यप्रतिपत्तिकथनञ्च ।

---

**No. 2019.** क्षयमासादिविवेकः । Substance, country-made paper, 12 × 3½ inches. Folia, 32. Lines, 8 on a page. Extent, 604 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbháñgá, Paṇḍit Vañsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

**Kshayamásádi-viveka.** On intercallary and elided months, the mode of reckoning the same, and duties appertaining to, and prohibited at, such times. By Ratnapáni S'armá, son of Gañgolí Sanjíves'vara S'armá. The work was compiled during the reign of Chhatra Siñha, of Mithilá. The author, in his introduction, gives a long list of the digests he had consulted.

**Beginning** वन्दे सदानन्दमरन्दसुन्दरं द्विपास्यपादाम्बुजयुग्ममुत्तमम् ।
परागपूतीकृतभक्तमानसं विपत्तमोहारि पुरारिलालितम् ॥
स जयति बाहादुरोऽयं मिथिलेशः श्रीछत्रसिंहनामा ।
जितरिपुरथो महौजा दानन्यक्कृतकर्णकीर्त्तिः ॥
अवाप्य यस्य स्वरसं जीविकां विदेहदेशागतकृत्यनुज्ञया ।
द्विसंक्रमस्यापि दिन+जः क्रमात् तनोमि सिद्धान्तविचारसञ्चयम् ॥
आलोचनीयः सुधिया धियाऽसावेकीकृतः सम्प्रति रत्नपाणेः ।
वाचस्पतीत्यादिकृतानुपूर्व्वी गुर्व्वीकृतात्मा सविशेष एषः ॥
कुर्व्वन्तु राज्ञाक्षमनन्तपण्डिता मिलं निन्दं खिद्यति वा न मे भयः ।
अनक्रुशा ये तु दिवौकसां प्रियाः पुरे पुर दीदिवगन्ति वागभरैः ॥

अथ कृतकतिविधचिन्तामणिकृत्यमहार्णवादिग्रन्थापरवाचस्पतिवाचस्पतिमिश्रकृतद्वैतपरिशिष्टादितुष्टकंसवकेशवमिश्रवर्द्धविधटीकापटुतरीकृतन्यायपरिकरापरकल्पिततिथितत्त्वचिन्तामणिमलमाससारिण्यादिग्रन्थसम्भवगौरवगुरुतरनिजकल्पितसर्व्वविधाचारगीयमानयशःसारश्रीमन्महेशचरितवर्णितमिथिलेशमहामहोपाध्यायसद्गुरुमहेशकृतस्मृतिविवेकवर्द्धमानवर्द्धमानोपाध्यायतर्कपुण्डरीकप्रकाशमार्त्तण्डकृतव्यवहाराद्वैतनिर्णयातिभक्तिमुक्तितोषितश्रीनरहरिमहर्ष्युपाध्यायविविधग्रन्थकारदृढीकृतनिजकल्पितमासमीमांसाप्रकृतविचारतर्कापरगोतरगोकुलनाथोपाध्यायप्रभृतिमहाजनदर्शितमार्ग्गवत् समीकृतमनुहाय पथं कापथ गन्तुमुत्सुका वहवः क्षयमासपदार्थरव्याख्यातत्परपरदेशीयपञ्चं सम्यक् कारं कारं महान्तो भ्रान्ताः कियन्तो विवदन्ते तत्न+ततेनेति विज्ञो वयम् । इत्यादि ।

**End.** जानन्तोऽपि वाचस्कृता विवदन्ते बहवोऽन्यदेशीयाश्चेत् का नो हानिरिति स्वदेशीयाः केऽपि नैवं भूता भवन्त्वित्येव तात्पर्य्यमिति कृतमतिविस्तरेण ॥

**Colophon.** इति गङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्कलितमलमासादिविवेकः समाप्त इति ।

विषयः । अधिमासपदार्थविवेचनं । मलमासकीर्त्तनञ्च । अत्र विविधमतखण्डनं । मलमास-स्वरूपविवेचनम् । अथजातमृतानां कृत्यादिनिरूपणं । अधिमाससम्भावनाकालादिनिरूपणं । मासमलिम्लुतमासनिरूपणं । मलमासकृत्यनिरूपणं । अत्र विविधनयसम्वादकीर्त्तनं । मलमासमां-सादिभक्षणविधानकीर्त्तनं ।

---

**No. 2020. एकोद्दिष्टसारिणी** । Substance, country-made yellow paper, 11 × 3 inches. Folia, 35. Lines, 8 on a page. Extent, 782 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváṇí Post Mádhepur, Darbháṅgá, Paṇdit Vañsamaṇí Jha. Appearance, fresh. Prose and verse. Correct.

**Ekoddishṭa-sáriṇí.** On the first annual śráddha and the rules and rituals appertaining thereto. By Ratnapáṇí S'armá, son of Gañgolí Sanjívesvara S'armá..

**Beginning.** श्रीहेरम्बपदारविन्दयुगलध्यानात्मभानुप्रभा-
प्रद्योताश्रयमन्दिरो नतकरो धीरे कृपासागरे ।
वैदेहाधिपसम्मुदे हि विविधग्रन्थावलोक + +
मेकोद्दिष्टविचारणं प्रकुरुते श्रीरत्नपाणिः सुधीः ॥

अथ व्यासः । मासपक्षतिथिस्पृष्टे यो यत्र म्रियतेऽहनि ।
प्रत्यब्दन्तु तथाभूतं क्षयाहं तस्य तद्विदुरिति ।

अतएव मासपक्षतिथ्याद्युल्लिखितं सङ्कल्पवाक्यमवायाति । न तु पार्व्वणे अस्य क्षयाहप्रकर-णीयत्वात् । इत्यादि ।

**End.** कृतैषा सारिणी यत्नादेकोद्दिष्टविधायिनी ।
श्रीरत्नपाणिकृतिना गच्छता मावि पूर्व्वतः ॥
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ।

**Colophon.** इति गङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसंग्रहीता एकोद्दिष्टसा-रिणी समाप्ता ।

विषयः । क्षयाहनिरूपणं । तत्र श्राद्धाकरणे प्रत्यवायकथनं । अमावस्यादौ मृतस्य क्षयाहे एकोद्दिष्टमेव कर्त्तव्यं न तु पार्व्वणमितिनिर्णयः । श्राद्धदिने अशौचपाते विधानं । अत्राशौचवि-वेचनञ्च । एकभक्तादिनियमकीर्त्तनं । मृताहाम्नानादौ विधिः । एकोद्दिष्टं पाकेनैव कर्त्तव्यमिति-निरूपणं । प्रातर्मुहूर्त्तकुतपरौहिणादिकालनिरूपणं । मरणाद्यशौचपतितश्राद्धं मलमासेऽपि कर्त्तव्य-

मितिनिरूपणं । एकस्मिन् दिने त्रयाणामिमितानां चादिप्रतिरूढश्राद्धयोः कर्त्तव्यत्वे विधिनिरूपणं । एवमेकस्मिन् दिने मृतयोः पित्रोः श्राद्धविधिकीर्त्तनञ्च । सौरचान्द्रमासविवेचनं । मलमासेऽपि नित्यनैमित्तिकश्राद्धकरणावश्यकतानिरूपणं । अत्र विविधमतकीर्त्तनञ्च । पाकस्य श्राद्धाङ्गतादि-निरूपणं । एकोद्दिष्टे प्रतिनिधिनैमित्तिकनिरूपणं । शूद्रेण तु सर्व्वेषामामेन श्राद्धकर्त्तव्यता । श्राद्धदिननिषिद्धानि । सर्व्वैरेव भ्रातृभिरेकोद्दिष्टं कार्य्यमितिकथनं । अमावास्यादिमृतस्यापि पितुर्मध्याह्ने एकोद्दिष्टं विधायापराह्णे पार्व्वणं कर्त्तव्यमितिनिरूपणं । दक्षिणावामदेवगानादिवि-धिकथनञ्च ।

---

**No. 2021.** ज्योतिःसारसमुच्चयम् । Substance, country-made paper, 12 × 3 inches. Folia, 62. Lines, 7 on a page. Extent, 1,494 ślokas. Character, Maithilí. Date, ? Place of Deposit, Naváni, Post Mádhepur, Darbhángá, Paṇḍit Lála Jhá. Appearance, fresh. Prose and verse. Correct.

**Jyotihsára-samuchchaya:** On auspicious and inauspicious conjunctions of stars and planets with reference to the performance of civil rights, such as marriages &c. By Viśveśvara Daivajna.

**Beginning.** ज्योतिर्निबन्धानालोक्य व्यवहारोपपत्तये ।
तदुद्धारेण क्रियते ज्योतिःसारसमुच्चयः ॥
यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्द्धि वर्त्तते ॥
विफलान्यन्यशास्त्राणि विवादस्तेषु केवलम् ।
प्रमाणं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥
तत्र लग्नादिभावनिरूपणं । इत्यादि ।

**End.** यानं परो निपतितं हसती च कन्या गर्भेण चातिमहती पुरतः स्थिता स्त्री ।
आगच्छति प्रविश गच्छसि वा किमर्थं शब्दाः स्थिराश्च गमनं प्रतिषेधयन्ति ॥

**Colophon.** इति गणककुलनलिनदिनेशश्रीविश्वेश्वरदैवज्ञकृतो ज्योतिःसारसमुच्चयः समाप्तः ।

विषयः । लग्नादिभावनिरूपणं । पञ्चविवेचनं । चन्द्रतारादिशुद्धिः । देशाचारादिशुद्धिः । समयाशुद्धिविवेचनं । ऋतौचारादिप्रतिप्रसवः । कन्याया वर्षशुद्धिः । कन्यालक्षणादिकथनं । वरलक्षणादिकथनं । परिवेदनविचारः । विवाहसमयादिनिरूपणं । द्विरागमनं । जातकर्म । नामकरणान्नप्राशनचूडाकरणकर्णवेधविद्यारम्भोपनयनादिकथनं । पुनर्विवाहः । पञ्चशान्तिः । गण्डजातकादिशान्तिः । जलाशयादिप्रतिष्ठा । बीजवपनं । नवान्नं । मन्त्रस्नानविधिः । वास्तु-विधिः । यात्राचिन्ता । मङ्गलनिरूपणञ्च ।

---

**No. 2022.** सुबोधिनी । Substance, country-made paper, 13 × 5 inches. Folia, 250. Lines 9 on a page. Extent, 4,562 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváṇi, Post Mádhepur, Darbháñgá, Paṇḍit Vañśamaṇi Jhá. Appearance, fresh. Prose and verse. Generally correct.

**Subodhiní.** A Smṛiti digest, containing dissertations on the ten Sañskáras, marriages of daughters, śráddhas of various kinds, and domestic duties. By Ratnapáṇi S'armá, son of Gañgoli Sanjívesvara S'armá. The work was compiled by order of king Ru.. a Siñha of Mithilá.

**Beginning.** अन्वयेन जगतां हि कारकं तारकं विपदि विघ्नहारकम् ।
सन्निधाय हृदि तन्यते कृते रत्नपाणिकृतिना सुबोधिनी ॥
देशे देशे च दातुर्विलसति अयशःस्तोमसोमातपत्रं
यस्याखण्डप्रतापो दहति रिपुकुलारण्यमेवानलोऽसौ ।
यत्पार्श्वं वेदपादैर्निवसति सुकृतं पार्व्वतीशाङ्घ्रिभक्त्या
वीरः श्रीरुद्रसिंहो जयति नृपमणिर्क्षीरभुक्तैकभूपः ॥
कुर्व्वे तस्य निदेशतो नृपमणेः कल्याणमूर्त्तेरिमाम्
पारम्पर्य्यसमागतव्यवहृतिप्रज्ञामभाज्ञादरीम् ।
सन्त्वन्यत्र निरङ्कुशा हि कवयो नैक्यं ततस्तेन किं
वैदेहस्थितपण्डितौघकरुणादृष्टिस्तदा चेत् परम् ॥
पूरयन्तु सन्तो विनयं मदीयं कुर्व्वन्तु + + मम लोलतायाः ।
कृतार्थता सज्जनुषो यथा स्यात् पश्यन्तु मात्सर्य्यमपास्य चैताम् ॥
अथाश्रमावश्यकतायां दक्षः ।
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः । इत्यादि ।

**End.** आश्विनकृष्णचतुर्दश्यां तिथौ अमुकगोत्रस्य पत्युरमुकदेवशर्म्मण एकोद्दिष्टश्राद्धमहं करिष्ये । इति सङ्कल्पं कुर्य्यात् । अद्यामुकगोत्र पते इदमासनं ते नम इत्येवमादिना-सनादिदानं । एवमेव शूद्रकर्त्तृकैकोद्दिष्टश्राद्धप्रयोगो ज्ञेयः ।

**Colophon.** इति गाङ्गोलीश्रीसञ्जीवेश्वरसूनुश्रीरत्नपाणिसङ्गृहीता सुबोधिनी समाप्ता ।

**विषयः ।..** आश्रमस्यावश्यकताकथनं । गार्हस्थ्याश्रमस्य श्रेष्ठत्वकथनं । कीदृशी कन्या विवाह्येतितन्निरूपणं । कन्यादानविवेचनं । परिवेत्रादिविवेचनं । कन्यादानाधिकार्य्यादिनिरूपणं । वाग्दानादिविवेचनं । गान्धर्व्वविवाहविधिकथनं । कन्यादानप्रयोगादिकथनं । स्त्रीशुद्धिनिरूपणं । एवं क्रमेण दशसंस्कारविधिकथनं । प्रयोगकथनञ्च । मुमूर्षुकृत्यनिरूपणं । तत्र वैतरणीदानादिप्रयोगकथनं । एवं परत्र सर्व्वत्र प्रयोगकथनमिति ज्ञेयं । दाहादिविधिकथनं । ततः स्नान-

गमकथनं। शूद्रप्रवेशविवेचनं। पर्णमरदाहविधिः। दशपिण्डदानविधिः। प्रेततर्पणविधिः। नीरक्षीरदानविधिः। आद्यश्राद्धविधिः। अस्थिसञ्चयविचारः। अत्र श्राद्धविधिः। अशौचान्तिमदिनकृत्यविधिः। क्षौरविधिः। वृषोत्सर्गविधिः। श्राद्धादौ मांसादिदानविवेचनं। तत्र भक्ष्याभक्ष्यमांसादिविवेचनञ्च। द्विजदम्पतीदानादिविधिः। कपिलादिदानविधिः। मासिकश्राद्धविवेचनं। षोड़शश्राद्धानि। सपिण्डीकरणविवेचनं। चतुर्थीश्राद्धविधिः। पार्व्वणश्राद्धविधिः। स्त्रीकर्तृकश्राद्धविधिकथनञ्च।

---

**No. 2023. मिथिलेशचरितम्।** Substance, country-made yellow paper, 12 × 4 inches. Folia, 36. Lines 10—12 on a page. Extent, 1,264 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváṇí, Post Mádhepur, Darbháṅgá, Paṇḍit Vañsamaṇi Jhá. Appearance, new. Verse. Incorrect.

**Mithileśa-charita.** Mithilá, its extent, character, history, sovereigns, and the manners, customs, and habits of its people. The history comprises the reigns of nine rájás beginning with Mahesvara Ṭhakkura, who obtained the rájáship of the district from an emperor of Delhi. By Ratnapáṇí S'armá, son of Gaṅgoli Sanjívesvara S'armá. The author was a Drávida Bráhmaṇ, and wrote the work under the instruction of Rámachandra Miśra, at Calcutta. Nos. 2009, 2016, to 2020, 2022, 2029 and 2032 are also due to him.

**Beginning.** वन्द्यं वेद्यं गणेशानां प्रधानं जगतामजं।
विघ्नहारं दयोदारं मारं मारं भजे मदः॥
द्रविड़देशी सुखवासी निगमविलासी रामचन्द्रमिश्रः।
तत् प्रश्नोत्तरसारं लिखति विचारं रत्नपाणिः॥
कलिकत्ताभिधनगरे स्थित एवैष प्रयासराशिवद्दितः।
वंशावली च रीतिर्नीतिरपीह मिथिलेशानां॥
मिथिलादेशो यत्रोऽस्ति कीदृशः कोऽवधिस्ततः।
आचारः कीदृशो धीर कीदृशा मनुजा अपि॥
कोऽस्ति सम्प्रतिभूपस्तु कीदृशं तत्कुलं वद।
इत्थमन्यच्च यच्छ्राव्यं रत्नपाणे निगद्यतां॥
रामचन्द्र शृणु त्वं हि यथाप्रश्नं तदुत्तरं।
मिथिनामाऽत्र भूपोऽभूत् पालितस्तेन यत् पुरा॥
तन्नाम्ना चिह्नितस्तस्मान्मिथिलादेश उच्यते। इत्यादि।

**End.** एवं विधानि वृत्तानि स्वर्व्वमोक्षप्रदानि वै ।
कति चासन्नृपतेः सर्व्वत्र विदितानि वै ॥
कथितानि च तुभ्यं भो कानिचित् प्रश्नवाक्यतः ।
अतः परन्तु वक्तुं मे संशयो नास्ति सम्प्रति ॥
कालान्तरे रामभिश्र श्रोतव्यं पुनरागमे ।
ततः कृतार्थोऽरामोऽसौ वदन्निति ययौ गृहं ॥
एतावदपि श्रुत्वा मे जन्मसाफल्यमाययौ ।
सुधापाने न कस्यापि तृप्तिर्भवति कुत्रचित् ॥

**Colophon.** इति गाङ्गोलीमञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मकलिते श्रीमिथिलेशचरिते + + + + + + + + प्रकरणम् ॥

विषयः ।· मिथिलामाहात्म्यकथनं । मैथिलानामाचारादिकथनं । अधुनातनमहाराजस्य पूर्व्वजानां प्रत्येकं जीवनीकथनं । तत्र प्रथमतः महेश्वरठक्कुरो दिल्लीश्वरात् यथा मिथिलाराज्यं लब्धवान् तद्वृत्तान्तकथनं । महेश्वरादारभ्य नवमपुरुषपर्य्यन्तं राज्ञां वृत्तान्तकीर्त्तनं ।

---

**No. 2024. ग्रहलाघवं वा सिद्धान्तरहस्यम् ।** Substance, country-made paper, 11 × 5 inches. Folia, 31. Lines, 6 on a page. Extent, 165 ślokas. Character, Nágara. Date, Sm. 1850. Place of deposit, Calcutta, Government of India. Another copy at Kanhaulí, Post Madhuvaní, Darbhángá. Paṇḍit Lalita Jhá. Appearance, old. Verse. Correct.

**Grahalághava** *alias* **Siddhánta-rahasya.** Astronomical calculations, regarding all the leading subjects of the science as known to the Hindus. By Gaṇeśa Daivajna, son of Keśava Sámvatsara.

**Beginning.** ज्योतिःप्रबोधजननी परिशोध्य चित्तं
तत् सूक्ष्मकर्म्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायै-
र्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥
परिभग्नमहीर्व्विकेशचापं दृढगुणचारलसत्सुवृत्तवाक्यम् ।
सुफलप्रदमात्मतन्त्रमभं तत् स्मर रामं करणञ्च विष्णुरूपम् ॥
यद्यप्यकार्षु बरवः करणानि धीरास्तेषु + + धनुरपास्य न सिद्धिरस्मात् ।
ज्याचापकर्म्मरहितं सुलघुप्रकारं कर्त्तुं ग्रहप्रकरणं स्फुटमुद्यतोऽस्मि ॥
द्व्यब्धीन्द्रोनितशक ईशहृत् फलं स्याच्चक्राख्यं रविहृतशेषकश्च युक्तम् ।
चैत्रादैः पृथगुरुतः सहद्युचक्रादिग्युक्तादमरफलाधिमासयुक्तम् ॥ इत्यादि

End. पूर्व्वे प्रौढतराः क्वचित् किमपि यच्चक्रुर्धनुर्ज्यैर्विना
ते तेनैव महातिगर्व्वकुमुदुत्सेकेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघुमतं हित्वा धनुर्ज्ये मया
तद्गर्व्वो मयि मास्तु किं न तदहं तच्छास्त्रतो हृद्धीः ॥
नन्दिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत् कौशिकवंशजः सकलसच्छास्त्रार्थवित् केशवः ।
सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धावबोधांशकः
स्पष्टं हन्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत् ॥

Colophon. इति श्रीसकलागमाचार्य्यवर्य्यश्रीकेशवसांवत्सरात्मजश्रीगणेशदैवज्ञविरचितं ग्रहलाघवाख्यं सिद्धान्तरहस्यं समाप्तम् । संवत् १८५० ।

विषयः । अहर्गणानयनप्रकारकीर्त्तनं । सूर्य्यचन्द्रतुङ्गादीनां ध्रुवककथनं । सूर्य्यादीनां क्षेपककथनं । ध्रुवक्षेपकसंस्कारकथनं । मध्यमरविबुधशुक्रचन्द्रसाधनं । चन्द्रानयनं । चन्द्रतुङ्गपातानयनं । राहोरानयनं । भौमबुधकेन्द्रसाधनं । गुरुभृगुकेन्द्रसाधनं । शुक्रकेन्द्रानयनं । शनेरानयनं । रविचन्द्राद्यगतिकथनं, राहुभौमादीनां गतिकलानिरूपणं । इष्टगणितैक्यसंस्थापनं । भुजसाधनविधिः । चरसाधनं । चरानयनं । चन्द्रस्फुटीकरणं । चन्द्रमन्दफलसाधनं । चन्द्रगतिसाधनं । तिथिनक्षत्रयोगकरणसाधनं । भौमादीनां शीघ्रफलाङ्ककथनं । एषां मन्दफलसाधनञ्च । मन्दस्पष्टगतिसाधनं । कुजबुधशुक्राणां गतौ विशेषकथनं । भौमादीनां वक्रस्य शीघ्रकेन्द्रभागकथनं । कुजगुरुशनीनामुदयभागकथनं । बुधशुक्रयोरुदयास्तभागकथनं । वक्रमार्गादिदिनज्ञानकथनं । मेषादिराशीनां लङ्कोदयकथनं । लग्नसाधनं । गोलानयनप्रकारः । पलांशसाधनं । नतोन्नतसाधनं । अक्षकर्णसाधनं । इष्टच्छायासाधनार्थं हारकथनं । भाज्यसाधनं । कर्णाद्यानयनं । क्रान्तिसाधनं । क्रान्तिभागेभ्यो भुजभागानयनं । रवेरज्ञाने दिनमानादेव क्रान्तिसाधनं । दिनार्द्धे नतांशोन्नतांशसाधनं । नष्टकर्णसाधनं घटीज्ञानसाधनं । नलिकादिबन्धार्थं दिक्साधनकथनं । भुजकोटिकर्णनलिकासंस्थानकथनं । चन्द्रग्रहणनिरूपणं । खण्डग्रासादिनिरूपणं ग्रहणस्थितिसाधनं । स्पर्शमोक्षस्थितिसाधनं । जालग्रहदर्शनार्थं नलिकानिवेशविधिः । भूच्छायासाधनादिकं । मध्यग्रहणस्पर्शकालमोक्षसम्मीलनोन्मीलनकालसाधनं । ग्रस्तोदयादौ ग्रास-साधनं । सूर्य्यग्रहणं । लम्बसाधनं । वर्णज्ञानादिकथनं । ग्रहणद्वयसिद्धिः । इत्यादिसाधनं । तिथिसाधनं । छन्नानयनं । चन्द्रविम्बभूभासाधनं । गुरुशुक्रादीनामुदयास्तसाधनं । मन्दस्पष्टग्रहसाधनं । नतांशसाधनं । दृक्कर्म्मसाधनं । नक्षत्रध्रुवककथनं । अक्षदृक्कर्म्मकथनं । खमध्यस्थनक्षत्राद् रात्रिज्ञानकथनं । नक्षत्राणां छायायन्त्रेण रात्रिज्ञानं । शृङ्गोन्नतिदिग्ज्ञानसाधनं । ग्रहयुतिज्ञानं । पातसमयादिज्ञानसाधनं । पिण्डसाधनं । मचनसाधनं । योगसाधनादिकं । सूर्य्यसाधनं । ग्राससाधनं । अहर्गणग्रहादिसाधनञ्च ।

**No. 2025.** ग्रहलाघवटीका । Substance, country-made paper, 12 × 5 inches. Folia, 96. Lines, 13—14 on a page. Extent, 3,030 ślokas. Character, Nágara. Date, Sm. 1853. Place of deposit, Kanhauli, Post Madhubaní, Darbhangá, Pandit Lalita Jhá. Another copy at Calcutta, Government of India. Appearance, old. Prose. Generally correct.

**Grahalághava-ṭiká.** A commentary on Gaṇeśa Daivajna's *Grahalághava* alias *Siddhánta-rahasya* (*ante*, No. 2021). By Mallári Daivajna, son of Divákara Daivajna.

**Beginning.** नाके नाकेशमुख्याः सुरवरनिवहाः सन्ति येऽनन्तसंख्या-
नाख्यामाख्यात्यमीषां कथमपि च मनःपूर्व्वकं वाङ्मदीया ।
एकं हित्वैकदन्तं सकलसुरशिरःसङ्घसंघर्षिताङ्घ्रिं
शीघ्रं भक्तेष्टसिद्धिप्रदमिह चि एवं सादरं तं नमामि ॥
मल्लारिं कुलनायकं रविमुखान् + + ; च नत्वा गुरोः
स्मृत्वा पादयुगं स्ववाप्य च ततः किञ्चित्सुबोधात्मकं ।
मल्लारिर्ग्रहलाघवस्य कुरुते टीकां लसद्वासनां
यस्मादल्पमतिश्च कुण्ठितमतिः स्यात् पूर्णविचारतः ॥
मध्यस्फुटास्तोदयवक्रपूर्व्वं कर्म्माखिलं यद्गणिते खगोत्थं ।
जीवा धनुःसंश्रयकं विना तैर्न स्यादयं निश्चय एव गोले ॥

— — — — — — — — — — — — — अथ श्रीमज्जलधितटनिकटस्थितमानोपवनविराजितनन्दिग्रामाभिधनगरनिवासिसकलभूपतिसेवितचरणयुगलकमलगणिताटवीविघटनपटुतराखिलदैवविन्मौलिकुम्भपीठलुठमीत्कण्ठकण्ठीरवश्रीमदुमारमणचरणद्वयपङ्कजावाप्तसमस्तमतिविभवदैवविद् केशवदैवज्ञात्मजाः गणेशदैवज्ञवर्य्यवर्य्याः ग्रहलाघवाख्यं ग्रहप्रकरणं चिकीर्षवस्तत्रादौ निर्विघ्नेन ग्रन्थसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च — — — — — — — वस्तुनिर्देशरूपमङ्गलमाचरितं ग्रन्थारम्भं वसन्ततिलकावृत्तेनाह, ज्योतिरिति ।

**End.** अकरोत् कृतवानित्यर्थः । इति पूर्व्वशाकाशाद्वानयनप्रकारः । ग्रन्थालङ्कारस्य कृतः ॥

**Colophon.** इति श्रीमद्गणकचक्रचूडामणिदिवाकरदैवज्ञसुतमल्लारिदैवज्ञविरचितायां ग्रहलाघवटीकायां ग्रन्थसमाप्त्यलङ्कारव्याख्यानं समाप्तं ।
दैवी पार्थसमाश्रयेऽतिरुचिरे तीरे च गोदान्तरे
गोलग्रामपुरे मुरारिचरणार्च्चासक्तविद्वद्युते ।
आसीत्तत्र दिवाकरोऽतिचतुरो + दैवज्ञसङ्घाग्रणी-
र्विघ्नेशे सततं यदीयहृदयं यस्त[illegible]ऽकरोत् ॥

मखारिगणकाग्रणीर्गुरुपदद्वन्द्वाब्जभक्तो रतो
लब्ध्वा बोधमयं ममो हि विहृतिं स्वार्थापरां स्फुटां।
वर्ण्यस्य ग्रहलाघवस्य गणकश्रीमद्गणेशाभिध-
प्रोक्तस्याथ कृपालवो हि सुधियैः पश्यन्तु तुष्यन्त्विमां ॥
बाणानाच्छकतः कुमारविहतात्मूलं हि मासः मयुग-
बाणैर्भेदगोनितादिनमिति(?) तस्मादलं(?) स्यात्तिथिः।
पक्षः स्यात्तिथिसंमितोऽखिलयुतिः मन्नात्विमिथ्युक्तिता
होनाख्यो गणको लिलेख च सदा टीकां परार्थात्विमां ॥
संवत् १८५१। भाद्रमासशुक्लपक्षतिथि ६ शनिवासरे। शुभम्।

विषयः। गणेशदैवज्ञकृतसिद्धान्तरहस्यापराभिधानग्रहलाघवस्य व्याख्यानम्।

---

**No. 2026. श्राद्धरत्नम्।** Substance, country-made paper, 14 x 4 inches, Folia, 72. Lines, 8 on a page. Extent, 1,916 ślokas. Character, Maithilí. Date, ? Place of deposit, Vehat, Post Mádhepura, Darbhángá, Paṇḍit Phanidhara Miśra. Appearance, fresh. Prose and verse. Generally correct.

**S'ráddha-ratna.** A summary of the rules regarding śráddhas. By Lakshmípati, disciple of Indrapati.

**Beginning.** वदनविनिर्जितचन्द्रं गर्जितशक्रं नगोद्धरणात्।
गोपीहृत्प्रवियोगं बालमुकुन्दमहं कलये ॥
प्रणम्य भारतीकान्तं श्रीमदिन्द्रपतिं गुरुम्।
श्रीलक्ष्मीपतिधीरेण श्राद्धरत्नं विधीयते ॥

अथेदानीन्तना जनाः क्रिया + + यावदेवं कुर्व्वन्ति तावदेव छन्दोगानां वाजसनेयि-नाञ्च प्रति + + होक्तः श्रीदक्षोक्तश्च प्रयोगो लिख्यते। तत्र प्रथमं भूसंस्कारः। इत्यादि।

**End.** श्राद्धशेषमन्नमिष्टैः सह भुञ्जीत इति। वाजसनेयिनां पार्व्वणप्रकारोऽन्त्र विशेषो याह्य इति ॥

**Colophon.** इति समाप्तोऽयं ग्रन्थः।

**विषयः।** भूसंस्कारविधिः। मासक्रियाकथनं। श्राद्धवेला। पूरकपिण्डदानविधिः। पर्णनरदाहविधिः। उदकदानविधिः। पिण्डदानविधिः। अस्थिसञ्चयविधिः। अशौचान्तकृत्यं। एकादशाहकृत्यं। वृषोत्सर्गविधिः। वराध्यायकथनं। कपिलादानविधिः। शय्यादिदानविधिः। एकादशाहप्रयोगकीर्त्तनं। सपिण्डनविधिः। अवीराकल्पकथनं। एकोद्दिष्टविधिः। स्त्रीकर्त्तृकश्राद्ध-

प्रयोगीकथनं । शस्त्रादिहतानां श्राद्धविधिः । पार्व्वणविधिः। तत्प्रयोगकथनं । वल्जिते वृद्देवविधिः । श्रामश्राद्धविधिः । तीर्थश्राद्धविधिः । नित्यश्राद्धविधिः । सपात्रकविधिकथनञ्च ।

---

**No. 2027.** वृत्तिदीपिका । Substance, country-made paper, 12 × 4 inches. Folia, 28. Lines, 9 on a page. Extent, 1,039 Ślokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Pandit Viśveśvara Jhá. Appearance, old. Prose. Correct

**Vritti-dípiká.** A dissertation on the philosophy of grammar. By Krishna Bhatta.

**Beginning.** सजलजलदकालं सर्व्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाव्यक्तभालम् ।
विगतदुरितजालं विश्वराजीवजालं
विलसितवनमालं नौमि गोपालबालम् ।
ध्यात्वा श्यामं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
मौनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥

इह सकलज्ञानाभिलषितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्त्वमस्यादिमहावाक्यार्थबोधजन्यत्वात् शाब्दबोधे च वृत्तिग्रहणोपस्थितेर्हेतुत्वात् —— इत्यादि ।

**End.** तथा च वर्णजातिस्फोटः पदजातिस्फोटः वाक्यजातिस्फोट इति तन्मते स्फोटत्रयम ॥

**Colophon.** इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ।

विषयः । वृत्तिस्वरूपनिरूपणं । शक्तिस्वरूपनिरूपणं । वृत्तेः शाब्दबोधहेतुत्वनिरूपणं । शक्तिलक्षणाभेदेन तस्या द्वैविध्यनिरूपणं । शक्तिग्रहनिरूपणं । तत्र गवादिपदानां गोत्वे शक्तिरिति मीमांसकमतनिरूपणं । जातौ व्यक्तौ विशिष्टे च शक्तिरिति नैयायिकानां नयनिर्णयः । कार्य्यान्विते पदानां शक्तिरिति प्राभाकरमतकीर्त्तनं । रूढयोगिकादौ शक्तिविवेचनं । लक्षणास्वरूपनिरूपणं । गौनीशुद्धाभेदेन तस्या द्विविधत्वकथनं । व्यञ्जनादिनिरूपणं । व्यञ्जनावृत्तिखण्डनं । अत्र नैयायिकमतखण्डनपूर्व्वकं तस्याः स्थापनं । धात्वर्थनिरूपणं । तत्र प्राभाकरवैयाकरणादिमतकीर्त्तनं । नैयायिकमतखण्डनं । तिङर्थनिरूपणं । अपूर्व्ववादकथनं । समासार्थनिरूपणं । समासशक्तिनिरूपणं । नञर्थनिरूपणं । वीप्सादिनिरूपणं । स्त्रीप्रत्ययार्थनिरूपणं । तद्धितार्थनिरूपणं । स्फोटनिरूपणञ्च ।

---

**No 2028.** वृत्तदर्पणम्। Substance, country-made paper, 11 × 4 inches. Folia, 31. Lines, 7 on a page. Extent, 833 ślokas. Character, Maithilí Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Paṇḍit Viśveśvara Jhá. Appearance, fresh. Verse. Correct.

**Vritta-darpaṇa.** A treatise on versification, giving details of all the different metres used in Sanskrit poetry. By Bhíshma Miśra.

**Beginning.** स जयति सततं पिङ्गलनामा नागरकविवरमविघ्नः।
लोकोत्तरचमत्कृतं कल्पयितुमिव सङ्गृहीतपरजिह्वः॥
गौरीमननखरेखा शिरसि प्रतिविम्बितेव चन्द्रकला।
यस्य विभाति स देवः सन्तापं नाशयत्वखिलम्॥
सन्ति यद्यप्यनेकानि वृत्तशास्त्राणि भूतले।
तथाप्यतिशयो ह्यत्र समासातिशयो महान्॥
यदि सद्वृत्तवृत्तानि ज्ञातुमाकाङ्क्षसि स्फुटम्।
श्रीभीष्ममिश्रचरितं पश्य तद्वृत्तदर्पणम्॥

अथ गणाः। मगणो यगणो रगणः सगणस्तगणश्च जगणो भगणो नगणः। इत्यादि।

**End.** दीर्घास्तदग्रे लघवश्च वर्णाः श्रेणी भवेद्वर्णकृता तदेयम॥

**Colophon.** इति श्रीभीष्ममिश्रविरचिते वृत्तदर्पणे वर्णवृत्तनिदर्शनं नाम द्वितीयप्रकाशः। समाप्तश्चायं ग्रन्थः।

**विषयः।** (ग्रन्थेऽस्मिन सोदाहरणच्छन्दोलक्षणकीर्त्तनं)। तत्र प्रथमप्रकाशे मादिगणनिरूपणं। गणदेवताकथनं। मित्रामित्रनिरूपणं। आर्य्यावृत्तं। गीतिः। उपगीतिः। गाथिनी। सिंहिनी। स्कन्धकं। दोहा। ललितं। रोला। चौपैया। घत्ता। वृत्तावृत्तं। नवपदं। पज्झटिका। अनिला। पादाकुलकं। षट्पदं। पद्मावती। कुण्डलिका। रोला। गगनाङ्गनं। द्विपदं। खञ्जकं। उणियाला। सोरट्ठा। मधुभारं। शाकलिका। वरवृत्तं। आभीरकं। दुर्म्मिलिका। रुचिरा। दीपकं। सिंहावलोकितं। प्लवङ्गमः। लीलावती। हरिगीतं। त्रिभङ्गी। चौरकं। जनहरणं। मदनहरा। मरहट्ठावृत्तञ्च। एतानि सर्व्वाणि मात्रावृत्तानि।

द्वितीये प्रकाशे,—वर्णवृत्तकथनं। तत्र श्रीः। कामः। मधु। मही। चारु। ताली। प्रिया। शशी। मृगेन्द्रः। मन्दरः। कमलं। कीर्णा। धारि। नगाणिका। हारी। हंसः। यमकं। शेषा। तिलका। विज्जोहा। चतुरंशा। मन्थानं। शङ्खधारी। सुमालतिका। मदनकं। समानिका। सवासकं। करहञ्च। शीर्षा। विद्युन्माला। मल्लिका। प्रमाणिका। तुरङ्ग। कमलं। माणवकक्रीडं। अनुष्टुप्। महालक्ष्मीः। सारङ्गिका। पाथिता। कमलकं। बिम्बं। तोमरः। रूपामाली। संयुतिका। चम्पकमाला। सारवती। सुखमा। अमृतलता। बन्धः। सुमखी। दोधकं। शालिनी।

मदनकं । सेनिका । मालती । इन्द्रवज्रा । उपेन्द्रवज्रा । उपजाति । रथोद्धता । स्वागता । भुजङ्ग प्रयातं । लक्ष्मीधरः । तोटकं । सारङ्गं । मौक्तिकदाम । मोदकवृत्तं । मालिनी । तरलनयनी । सुन्दरी । प्रमिताक्षरा । विद्याधारः । मालावृत्तं । तारकं । स्कन्धवृत्तं । पुष्पिताग्रा । वसन्ततिलका । चक्रं । सारङ्गी । चामरः । मालिनी । भ्रमरावलिका । मनोहंसः । सरभः । निशिपालः । नाराचं । नीलवृत्तं । चञ्चला । ब्रह्म । पृथ्वी । मालाधरः । शिखरिणी । मन्दाक्रान्ता । हरिणी । मञ्जीरा । चर्चरी । क्रीडाचन्द्रः । शार्दूलविक्रीडितं । नवचन्द्रः । धवलं । शम्भुः । गीतिका । गण्डकी । स्रग्धरा । राजसुखकरः । राजभवः । रमन्ती । स्फोतादंसी । सुन्दरिका । दुर्मिलिका । किरीटं । हीरमुकुटं । मन्थानयोग्यं । देवशरणम् । शानूरवृत्तञ्च । प्रस्तारमूलकरणं । प्रस्तारप्रकारकीर्त्तनं । तत्र मात्राप्रस्तारः । वर्णप्रस्तारः । मात्रोद्दिष्टकथनं । वर्णोद्दिष्टकथनं । मात्रानष्टं । वर्णनष्टं । मात्रामेरुकथनं । वर्णमेरुकथनं । मात्रापताका । वर्णपताका । मात्रामर्कटी । वर्णमर्कटी । मात्राश्रेणीकथनञ्च ।

---

**No. 2029** व्रताचारः । Substance, country-made paper, 11 × 4 inches, Folia, 155. Lines, 9 on a page. Extent, 3,638 Ślokas. Character, Maithilí Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Pandit Viśveśvara Jhá Appearance, new. Prose and verse. Generally correct.

**Vratáchára.** Disquisition and rules regarding the optional fasts called Vratas. By Ratnapáṇi Śarmá, son of Gángolí Sañjíveśvara Śarmá. Several works of this author have been noticed under Nos. 2016 to 2020, 2022, 2023, and 2032.

**Beginning** सुरादीनामन्तःकरणसरसां मण्डनकरं
पर स्फूर्तिस्थानप्रलयवन्नधामक्रमनमः ।
इखण्डं ब्रह्माण्डं विलसति यदन्तर्गतमहो
सदालम्ब लम्बोदर तव पदाम्भोजयुगलम् ॥
कर्त्री कान्त्या कला सा कलिकलुषहरी + + कन्या कृतार्था
कालाङ्गी कालरात्रिः कलितकलरवा कामदा कञ्जनेत्रा
कल्पद्रु कोमलाङ्गी कमलकुलकरीकज्जलाभा कुचोग्रा
काली काली कराली कलयतु कुशलं कालिका कालिका मे ॥
खण्डवलान्वयजन्मा मिथिलेशो भूच्छत्रसिंहनामा ।
हरिहरविलसितचरितो मित्रो महसा महोदारः ॥
तदौरसो दानिषु कर्णजेता यो रुद्रसिंहोऽभवदुग्रचेताः ।
धर्म्मावतारो धृतनीतिभारो वेदान्तसिद्धान्तगृहीतसारः ॥
तत्पुत्रो भूपतिलकः श्रीमान् महेश्वरसिंह उदितकलः ।

विलसति यस्य चरित्रं स्वच्छे वयसि यथा हरितः ॥
आज्ञां तस्य निधाय मङ्गलवतः श्रीयद्व्रताचारकम्
श्रीदत्तप्रभृतिप्रयासबलितग्रन्थौघभूषोदितम् ।
विद्वद्वृन्दकृपाकलापशरणः श्रीरत्नपाणिः कृती
कुर्व्वेऽहं गुणमङ्गुह बुधमुदे जीवेश्वरस्यात्मजः ॥
प्रामाण्यहेतोश्च मया व्यलेखि महाजनानां रचितानुपूर्व्वी ।
बहुस्थलेष्वत्र ततोऽभिमानं ग्रन्थो ममैवेति न मङ्गुहोऽयं ॥
मालसा ये च विद्वांसो धर्म्मशास्त्रावलोकने ।
पश्यन्तु ते महात्मानो व्रताचारममत्सराः ॥
उक्तस्यैवार्थस्य कथा मतभेदव्यवस्थिता ।
पौनरुक्त्यं ततो नेह दृढसंस्कारकारिका ॥

अत्रादौ व्रतसमयविचारः। ज्योतिर्निबन्धे—इत्यादि ।

**End.** तद्दिने तिलैरुद्वर्त्तनं तिलभक्षणञ्च कार्य्यमिति।

**Colophon.** इति गाङ्गोलीयश्रीजीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीतो व्रताचारः। समाप्तः।

**विषयः।** व्रतकालनिरूपणं। तत्र समयशुद्धिविवेचनं। व्रतसामान्यधर्म्मकथनं। व्रताधिकारिकथनं। व्रतिनो नियमादिकथनं। अत्र विविधमतकथनं। सङ्कल्पवाक्यविवेचनं। व्रतभङ्गव्यवस्थाकथनं। प्रतिनिधिविधिः। नक्तव्रतनिरूपणं। हविष्यनिरूपणं। नक्तव्रतेतिकर्त्तव्यता। नित्योपवासादिनिरूपणं। देवपूजाविधिः। मासादिविवेचनं। तिथिद्वैधादिविवेचनं। पूर्व्वाङ्गादिविवेचनं। प्रतिपदादिषु सर्व्वासु तिथिषु व्रतकथनं। तत्र विशेषेण महालक्ष्मीव्रतकथनं। महाष्टमीव्रतं। भीष्माष्टमीव्रतं। भीष्मतर्पणविवेचनं। अशोकाष्टमीव्रतं। जन्माष्टमीव्रतं। दुर्व्वाष्टमीव्रतकथनञ्च। श्रीरामनवमीव्रतं। एकादशीव्रतनिरूपणं। तत्र विविधमतकथनं। व्यवस्थाकथनञ्च। पारणविवेचनं। श्रवणद्वादश्यादिनिरूपणं। हरिवासरव्रतनिरूपणं। महावारुण्यादिनिरूपणं। गङ्गास्नानसमयादिनिरूपणं। महानिशानिरूपणं। रागस्नानादिनिरूपणं। गजच्छायाविवेचनं। पार्व्वणादिविधिः। अनन्तव्रतविधिः। रटन्तीचतुर्दशीविधिः। शिवरात्रिविधिः। कोजागरादिपूर्णिमाविधिः। करतोयास्नानविधिः। चयाहतिथ्यादिविवेचनं। एकोद्दिष्टादिश्राद्धलक्षणं। आमश्राद्धादिविधिः। अशौचेऽप्येकभक्तादिव्रतविधानं। व्रणाशौचकर्त्तव्यता। मलमासविवेचनादिकं। श्राद्धे पश्वालम्भनविधिकथनं। सामान्यतः श्राद्धकालादिनिरूपणं। व्रीहिश्राद्धादिविधिः। नवान्नविधिः। अत्र विविधमतकथनं। प्रत्येकं चैत्रादिद्वादशमासकृत्यनिरूपण विधानञ्च। अथ दशहराविधिः। हरिशयनविधिः। चातुर्म्मास्यविधिः। नागपञ्चमीविधिः। उपाकर्म्मादिविधिकीर्त्तनञ्च। विविधदानविधिकथनं। देवपूजादिविधिकीर्त्तनञ्च। अत्र सर्व्वत्र प्रयोगकथनमिति ज्ञेयम्।

---

**No. 2030.** तत्त्वामृतसारोद्धारे व्यवहारकोषः । Substance, country-made paper, 12 × 3½ inches. Folia, 79. Lines, 11 on a page. Extent, 2,698 ślokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Pandit Viśveśvara Jhá. Appearance, new. Prose and verse. Generally correct.

**Tattvámṛita-sároddhára.** An elaborate Smṛiti digest. The text contains only that portion of the work which is devoted to Judicature and Civil and Criminal law. It is called *Vyavahárakosha*. By Vardhamána Mis'ra.

**Beginning.** सारोद्धारे यथोद्देशमाचारश्राद्धशुद्धयः ।
उदाहृता अथेदानीं व्यवहारोऽभिधीयते ॥
तत्र मनुः । ब्राह्मं प्राप्ते च संस्कारं क्षत्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणं ।
ब्राह्मं श्रुतिस्मृतिपुराणोक्तं तत्संस्कारम् अभिषेकलक्षणं क्षत्रियेणेति भूपतिमात्रोपलक्षणं । इत्यादि ।

**End.** अस्माभिर्दण्डविवेके स्तेयप्रकरणे प्रपञ्चितमतो न वितन्यते ॥ इति व्यवहाराख्यो विवादपदकोषः ।

**Colophon.** इति श्रीवर्द्धमानकृतौ तत्त्वामृतसारोद्धारे चतुर्थो व्यवहारकोषः ॥
इत्थं धर्म्मामृतादिभ्यश्चतुर्भ्यस्तत्त्वमुद्धृतम् ।
धात्रा चतुर्भ्यो वेदेभ्योऽनाद्यवेदो यथोद्धृतः ॥
\+ + + + + कृतीनामेव भागैश्चतुर्भि-
स्तदपि पृथगमीभ्यो भासतेऽसौ निबन्धः ।
स्फुरति हि कुसुमानां केशवे योजितानां
सुघटितसमुदायद्योतितान्येव लक्ष्मीः ॥
दैनन्दिनसमाचारं श्राद्धं शुद्धिं विवादपदं ।
प्रायः प्रत्यक्षमेतत् प्राज्ञो जिज्ञासते सर्व्वः ॥
तस्माच्चतुर्भिरेभिः कुसुमैरिव गुम्फितो गुणोपहितैः ।
मालेवैष निबन्धो रामपतेः कण्ठभूषणं भवतु ॥
सज्जनैः शोध्यतां सोऽयमल्पज्ञैरुपजीव्यताम् ।
दुर्ज्जनैर्दुष्यतां कामं सज्जनैरनुगृह्यताम् ॥
नास्तूयन्ति गुणगन्धान् नोद्विजते दोषसम्बन्धात् ।
अविदितगुणदोषोऽपि परकृतिरित्येव दुर्ज्जनो ज्वलति ॥
इति वर्द्धमानकृतौ तत्त्वामृतसारोद्धारः समाप्तः ।

विषयः। राज्ञा प्रजाभ्यः करग्रहणविधिः। प्रजारक्षणविधिः। व्यवहारदर्शनविधिः। दूताय भृतिदानविधिः। प्राड्विवाकनिरूपणं। सभ्योपदेशकथनं। दण्डविधिकीर्त्तनं। अदण्ड्यदण्डने दोषनिरूपणं। दण्डभेदकथनं। क्वचित् क्षमाविधिनिरूपणं। दण्डव्यवस्थाकथनं। महापातकदण्डकथनं। दण्डापकर्षकथनं। दण्डसाम्यविधिः। दण्डपरिनिष्ठाकथनं। दण्डकारनियमकथनं। दण्डसमुच्चयनिर्णयः। एकत्र दण्डे दण्डान्तरसङ्कलनं। चतुष्पाद्व्यवहारनिर्णयः। अप्राप्तव्यवहारनिरूपणं। भाषालेखनविधिकथनं। पाण्डुलेखादिविधानं। उत्तरविधिनिरूपणं। उत्तराभासादिनिरूपणं। साक्षिनिरूपणं। क्रियानिरूपणं। शपथविधिः। द्वादशविधसाक्षिकीर्त्तनं। त्रिविधलेख्यनिरूपणं। पुनर्लौकिकलेख्यस्य सप्तविधत्वकथनं। भागपत्रादीनां लक्षणकथनं। त्रिविधानुमानप्रमाणनिरूपणं। आगमप्रमाणनिरूपणं। भोगनिरूपणं। प्रत्ययनिरूपणं। दण्डपारुष्यकारिनिरूपणं। ग्राह्यक्रियानिरूपणं। उत्तरभेदेन क्रियाव्यवस्थाकथनं। चतुर्व्विधनिर्णयनिरूपणं। व्यवहारलक्षणतद्भेदकथनं। निर्णयेषु बलाबलनिरूपणं। निर्णीतकृत्यनिरूपणं। तत्र मिथ्याभियोगादौ दण्डकथनञ्च। पुनर्न्यायविधिः। अष्टादशव्यवहारपदनिरूपणं। तत्र ऋणादानविधिः। भागलाभनिरूपणं। वृद्ध्यादिनिरूपणं। ऋणशोधनप्रकारकथनं। निक्षेपविधिः। अस्वामिविक्रयविधिः। सम्भूयसमुत्थानविधिः। दत्ताप्रदानिकनिरूपणं। तत्र देयनिरूपणं। तस्य सप्तविधत्वकथनादिकं। अष्टविधदत्तस्वरूपकीर्त्तनं। अदत्तनिर्णयः। उत्कोचग्रहणादिदण्डकथनं। भृतिविधिकथनं। तत्र अधिकर्म्मादिनिरूपणं। दास्यानधिकारकथनं। दास्यमोचनविधिः। तत्प्रकारादिकथनञ्च। दासीनिरूपणादिकं। वेतनस्यानपाकर्म्मनिरूपणं। पण्यस्त्रीविधिः। स्वामिपालविवादनिरूपणं। सम्विद्व्यतिक्रमनिरूपणं। क्रयविक्रयानुशयः। सीमाविवादः। वाक्पारुष्यविधिः। दण्डपारुष्यविधिः। स्तेयविधिकथनं। तत्र द्विपदापहारदण्डकथनं। चतुष्पादापहारादौ दण्डः। धान्याद्यपहारे दण्डकथनञ्च। सामान्यापहारदण्डः। साहसदण्डकथनं। तत्र प्रेरकादिदण्डकथनञ्च। स्त्रीसङ्ग्रहणदण्डकथनं। तत्र गोपनादिकृते विशेषकथनं। कन्यादूषणदण्डकथनं। अस्वाभाविकदण्डकथनं। स्त्रीपुंधर्म्मनिरूपणं। दायभागनिरूपणं। तत्र संसृष्टिविभागः। अन्तर्लुप्तविभागः। विभक्तागतविभागः। विभक्तजविभागः। अपुत्रादिधनविभागः। वानप्रस्थादीनां धनाधिकारिनिरूपणं। स्त्रीधनाधिकारिणः। विभागनिर्णयः। विभक्तकृत्यनिरूपणञ्च। द्यूतसमाह्वयविधिः। तत्र दण्डादिनिरूपणञ्च।

---

No. 2031. धर्म्मकोषः। Substance, country-made paper, 9 × 3 inches. Folia, 50. Lines, 9 on a page. Extent, 1,212 ślokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhepura, Darbháṅgá, Paṇḍit Phaṇidhara Miśra. Appearance, old. Prose and verse. Correct.

**Dharma-kosha.** A digest of the laws relating to civil actions, debts, interest, gifts, rules regarding servants, artizans, dancers &c., sale

and barter, wages, boundaries, and inheritance. By Trilochana Misra, Mahámahopádhyáya.

**Beginning.** मीमांसायुग्मजीवी तु मिश्रः श्रीमान् त्रिलोचनः ।
विवादपदवाक्यानां व्यवस्थामकरोत् स्फुटाम् ॥
ऋणादानं । तत्र नारदः ।
ऋणं देयमदेयं वा येन यत्र यथा च यत् ।
दानग्रहणधर्म्माश्च ऋणादानमिति स्मृतम् । इत्यादि ।

**End.** अतोऽन्यथा निर्वीजेषु इतरानियमात् । अन्यथा यत्र न तथा प्रतिभिज्ञायते तद्विभज्य ग्राह्यमित्यर्थः ।

**Colophon.** इति महामहोपाध्यायमिश्रत्रिलोचनव्यवस्थापितधर्म्मकोषपुस्तकं समाप्तम् ।

**विषयः ।** ऋणादानादिविधिः । निक्षेपविधिः । तत्र सन्दिग्धलक्षणादिकथनं । वृद्धिनियमादिकथनं । पुत्रदेयादेयनिरूपणं । तत्र पितृऋणदाने समयादिकथन । स्त्रीणां देयादेयनिरूपणं । आधिविधिकथनं । उद्ग्रहणविधिकथनं । निक्षेपप्रकारकथनं । अस्वामिविक्रयविधिः । सम्भूयसमुत्थानविधिकथनं । तत्र शिल्पिनर्तकानां विशेषकथन । भृत्यविधिकथनं । वेतनस्यानपाक्रियानिर्णयः । स्वामिपालविधिः । संविद्व्यतिक्रमविधिः । विक्रीयासम्प्रदानविधिः । क्रीत्वानुशयविधिः । सीमाविवादनिरूपणं । सम्यरक्षादिविधिः । दण्डपारुष्यविधिः । दायभागविधिकथन । तत्र स्त्रीधनादिविभागकथनं । वर्णसमवायविभागकथनं । अपुत्रधनाधिकारिनिरूपणं । संसृष्टधनविभागकथनञ्च ।

---

**No. 2032.** महादानवाक्यावली । Substance, country-made paper, 11 × 5 inches. Folia, 108. Lines, 7 on a page. Extent, 2,216 slokas. Character, Maithilí. Date, ? Place of deposit, Vehat, Post Málhepura, Darbhángá, Pandit Phanidhara Misra. Appearance, fresh. Prose and verse. Correct.

**Mahádána-vákyávalí.** A summary of the rules regarding various kinds of religious and quasi-religious gifts. By Ratnapáni S'armá, son of Gángolí Sanjíves'vara S'armá.

**Beginning.** श्रीलक्ष्मीवरपत्पयोजयुगलं विघ्नौघविध्वंसनं
ध्यात्वा मानसमानसे भवभवस्थित्यन्तसन्तानकम् ।
प्रोद्यत्पद्धतिदानपद्धतिरियं सङ्गृह्य संलिख्यते
जीवेशात्मजरत्नपाणिकृतिना विद्वद्वदान्यादिका ॥
इति नामसमन्वये,—

तपः कृते प्रशंसन्ति त्रेतायां ज्ञानमेव च ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ इत्यादि ।

**End.** ऐहलौकिकमन्वायशोलाभमहत्वरसुखवञ्छलोकप्राप्तिकाम इदमात्मीयमुमधनं विष्णुदैवतमित्यादि दक्षिणास्पर्शात्मम्.।

**Colophon.** इति गाङ्गोलीश्रीसञ्जीवेश्वरसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीता महादानवाक्यावली परिपूर्णा ।

**विषयः।** दानप्रशंसा । दानस्वरूपकथनं । तत्कालनिरूपणं । धर्म्मलक्षणादिकीर्त्तनं । पूण्यदेशकथनं । द्रव्यदैवतनिरूपणं । अतः सर्व्वत्र दानेषु प्रयोगकथनं । तत्र नानापुराणोक्तस्वर्णदानविधिकथनं । हिरण्यकृष्णदानविधिः । पुराणाद्युक्तरजतदानविधिः । अलङ्करणदानविधिः हैमरौप्यपात्रादिदानविधिः । ताम्रभाजनादिदानविधिः । सतैलमधुतैजसपात्रदानविधिः । जलपात्रादिदानविधिः । पुराणाद्युक्तजलदानविधिः । मणिहीरकादिरत्नदानविधिः । विविधरत्नदानविधिः । नगरग्रामादिदानविधिः । पुराणाद्युक्तगोदानविधिः । तत्र वर्णविशेषेण फलविशेषकथनञ्च । महिषीदानविधिः । अश्वादिदानविधिः । छागहरिणादिदानविधिः । गुडधेनुतिलधेन्वादिदानविधिः । लवणादिदानविधिः । कृष्णाजिनादिदानविधिः । पूर्णहेमपद्मघटदानविधिः । नानापुराणोक्तभूमिदानविधिः । उद्यानादिदानविधिः । विविधशस्यदानविधिः । विविधान्नदानविधिः । शक्तुदानविधिः । दधिगुड़-शर्करादिदानविधिः । पानककर्पूरादिदानविधिः । चन्दनमृगनाभिकुङ्कुमादिदानविधिः । धूपदीपादिदानविधिः । सुगन्धिद्रव्यदानविधिः । विविधशाकफलादिदानविधिः । शय्यासनपीठादिदानविधिः । पादुकाच्छत्रादिदानविधिः । दास्यादिदानविधिः । शालग्रामशिलादिदानविधिः । सीसलौहादिधातुदानविधिः । पुस्तकदानविधिः । विविधवस्त्रदानविधिः । द्वादशमासकर्त्तव्यदानविधिकथनं । सर्व्वत्र संक्रान्तिषु दानविधिः । कम्बलादिदानविधिकीर्त्तनञ्च ।

---

**No. 2033.** तिथिनिर्णयः । Substance, country-made yellow paper, 11 × 3 inches. Folia, 24 Lines, 6 on a page. Extent, 278 ślokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhepura, Darbhángá, Paṇḍit Phaṇidhara Jhá. Appearance, new. Prose and verse. Generally correct.

**Tithi-nirṇaya.** On lunar days and the religious duties appertaining thereto—a brief calendar of feasts and fasts. By Sudarsana.

**Beginning.** नत्वा सीतापतिं रामं सच्चिदानन्दरूपकं ।
बालानां बोधसिद्ध्यर्थं क्रियते तिथिनिर्णयः ॥

अथ विशेषतिथीनां निर्णयो लिख्यते। चैत्रशुक्लप्रतिपदि वर्षारम्भः। सोदयव्यापिनी ग्राह्या। तत्र ब्रह्मपुराणवचनं। चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि। इत्यादि।

**End.** कर्कः संक्रान्तिः प्रातःकाले अर्द्धरात्रे वा स्यात् तदा पुण्यकालः पूर्व्वदिने भवति इति संक्रान्तिनिर्णयः।

**Colophon.** इति सुदर्शनकृतौ तिथिनिर्णयः समाप्तः।

विषयः। वत्सरारम्भतिथिनिरूपणं। अत्र तैलाभ्यङ्गाकरणे दोषकीर्त्तनं। श्रीरामनवमी-निरूपणं। वारुणीनिरूपणं। अक्षयतृतीयानिरूपणं। नृसिंहचतुर्द्दशीकथनं। दशहराकथनं। हरिशयनकथनं। नागपञ्चमीकथनं। उपाकर्म्मकथनं। जन्माष्टमीनिर्णयः। हरितालिकानिरू-पणं। अनन्तचतुर्द्दशीकथनं। आश्विनकृष्णपक्षे षोड़शश्राद्धविधिकथनं। नवरात्रविधिः। विजय-दशमीनिर्णयः। दीपान्वितकथनं। भ्रातृद्वितीयाकथनं। अर्द्धोदययोगनिरूपणं। वरदाचतुर्थी-कथनं। श्रीपञ्चमीकथनं। माघसप्तमीविधिः। भीष्माष्टमी। भीमद्वादशी। शिवरात्रिः। होलिका-विधिः। इति विशेषतिथिनिरूपणानन्तरं सामान्यतः प्रतिपदादिपञ्चदशतिथिनिरूपणं। सङ्क्रान्तिपुण्यकालविवेचनञ्च। इति।

---

**No. 2034 हयशीर्षपञ्चरात्रं।** Substance, country-made yellow paper, 17 × 4 inches. Folia, 121. Lines, 6 on a page. Extent, 3,514 ślokas. Character, Bengali. Date, ? Place of deposit, Subhaṅkarapura, Post Vaherá, Darbhángá, Paṇdit, S'rínátha Jhá. Another copy at Calcutta, Government of India. Appearance, new. Prose. Generally correct.

**Hayaśírshá-pancharátra.** A Vaishṇavite work on building temples and on carving and consecration of images. It belongs to the class called *Pancharátra,* and bears close resemblance to the Tantras. Like the original Tantras, this class of works does not acknowledge the names of their authors, but represent themselves to be reports of dialogues between gods and renowned personages. In the Hayaśírsha the sage Márkaṇḍa asks questions, and his brother sage Bhṛigu answers them. The work opens with the query, why did Vishṇu appear in the form of Hayas'írsha or equine-headed? The first 18 chapters are numbered, and then follow a great many others without any numbering. Contents: Origin of Brahmá from the navel of Vishṇu. Origin of the Vedas and their study by Brahmá. The perspiration resulting from the study produced the demons Madhu and Kaiṭabha, who robbed the Vedas. Hayas'írsha born to rescue the Vedas. Twenty-five original Tantras of former ages, and the *Hayaśírsha-pancharátra* was first thereof. Other Pancharátras, such as

*Trailokyamohana, Vaibhava, Paushkara, Nárada, Prábláda, Gárgya, Gálava, S'ríprasna, S'ásya* &c. Characteristics of teachers. Ditto of spiritual guides. Heretic doctrines of Jaimini, Sugata, Chárváka, Nagna, Kapila, Akshapáda, and other sects. Placing of images in temples. Examination of earth for building. Different kinds of earth. Measures of length &c. Setting up of Gnomons for ascertaining of quarters. Division of areas. Rules for sacrifices before commencing a building. Removing of bones from the ground selected for building. Bricks. Stones. The Yajna of Pátála. Characters of temples for particular gods. Selection of stones for sculpture. Particular mountains yielding statuary stones. Auspicious conjunctions for beginning the carving of images. Rites to be performed on such occasions. Measures of images. Pacification of the regents of the quarters. Characteristics of images of Lakshmí, Garuda, Kes'ava, the ten incarnations, groups of Kes'ava and others, Vis'varúpa, the nine planets, the Mátris, Indra and other Lokapálas, the eleven Rudras, the Androgynous Ardhanárí, Gaurí, lingams. Rules regarding the consecration of images of various gods and goddesses. Ditto of books, houses, tanks, wells, public halls &c. Repairs of images. Rejoicings on such occasions. Marriage of S'rí and Vishnu, and Gaurí and S'iva.

**Beginning.** मार्कण्डेय उवाच । कथं हयशिरा विष्णुः प्रादुर्भूतः पुरा विभुः ।
किं निमित्तञ्च देवेशो दधार रुचिरं वपुः ॥
हयशीर्षं जगत्स्वामी पुरा नारायणः प्रभुः ।
श्रुतमासीच्च भवता यदुक्तं परमेष्ठिना ॥
आद्यं यत् पञ्चरात्राणां तन्ममाचक्ष्व पूर्व्वतः ।
भृगुरुवाच । शृणु वत्स प्रवक्ष्यामि पञ्चरात्रं पुरातनम् ॥ इत्यादि ।

**End.** कुम्भकारमृदा कृत्वा शक्राणीं पूर्व्ववद्यजेत् ।
स्वरूपेण प्रमदास्तद्वद्बलिं दद्युर्यथाविधि ॥
सौमानकं यावकञ्च दद्यादिन्द्राणीतुष्टये ॥

**Colophon.** इति (हयशीर्षपञ्चरात्रे) गौरीविवाहपटलं ॥ समाप्तोऽयं ग्रन्थः ।

विषयः । १प्रथमे पटले,—भृगुणा सह मार्कण्डेयस्य संवादकथनेन नारायणस्य नाभिपद्माद् ब्रह्मण उत्पत्तिकथनं । वेदानामाविर्भावकथनं । वेदाभ्यासरतस्य ब्रह्मणः स्वेदबिन्दुतः मधुकैटभयोरुत्पत्तिकथनं । ताभ्यां वेदहरणकथनं । हयशीर्षस्याविर्भावकथनञ्च ।

२—४पटले,—पूर्व्वपूर्व्वकल्पोक्तपञ्चविंशतितन्त्राणां नामकथनं । तत्र हयशीर्षपञ्चरात्रस्य प्राथम्यकथनं । एवं क्रमेण त्रैलोक्यमोहन-वैभव-पौष्कर-नारद-प्राह्लाद-गार्ग्य-गालव-श्रीप्रश्न-शाण्डिल्यादिपञ्चरात्राणामुद्देशकीर्त्तनं । आचार्य्यलक्षणं । गुरुलक्षणादिकथनञ्च ।

५—८पटले—जैमिनि-सुगत-चार्व्वाक-नग्न-कपिलाक्षपादानां हेतुवादिनां मतानुसारेण वर्त्तमानानां नराधमत्वादिकथनं। देवतास्थापनदिङ्नियमादिकथनं। भूमिपरीक्षाविधिकथनं। भूमेश्चातुर्व्विध्यनिरूपणं। तत्र सुपद्मा, भद्रिका पूर्णा, धूम्रा चेति। ब्राह्मणादिवर्णभेदेन मृत्तिकावर्णानां शुभाशुभनिरूपणं। मानपरिभाषाकीर्त्तनं। शङ्कुलक्षणादिकथनं। वास्तुनिरूपणप्रसङ्गेन क्षेत्रव्यवहारकथनं।

९—१४पटले,—भूतादिबलिदानविधिः। शल्योद्धारकथनं। इष्टकादिलक्षणं। तन्न्यासविधिकथनञ्च। शिलाधिवासविधिः। पातालयागविधिकथनं। प्रासादलक्षणं। तन्न्यासविधिकथनञ्च। पञ्चायतनादिप्रासादविशेषे वासुदेववामनादिमूर्त्तिस्थापनादिकथनं।

१५—१८पटले,—प्रतिमाघटनार्थं शिलादिलक्षणकथनं। प्रस्तरग्रहणार्थं पर्व्वतविशेषनिरूपणं। प्रतिमानिर्म्माणे तिथिनक्षत्रादिनिरूपणं। यागविधानञ्च। घटनाविधिकथनं। तत्र परिमाणादिकथनञ्च। दिक्शान्तिकथन। प्रतिमालक्षणकथनञ्च।

(अतः परं पटलसंख्या नास्तीति ज्ञेयं। पिण्डिकालक्षणकथनं। लक्ष्मीलक्षणं। गरुडलक्षणं। केशवादिप्रतिमालक्षणं। दशावतारप्रतिमालक्षणं। वासुदेव-सङ्कर्षण-प्रद्युम्नादिनवव्यूहप्रतिमालक्षणं। विश्वरूपादिप्रतिमालक्षणं। नवग्रहप्रतिमालक्षणं। मातृणां प्रतिमालक्षणं। इन्द्रादिलोकपालप्रतिमालक्षणं। एकादशरुद्रप्रतिमालक्षणं। अर्द्धनारीश्वरलक्षणञ्च।

गौरीप्रतिमालक्षणं। शिवलिङ्गलक्षणं। सामान्यतः पिण्डिकालक्षणं। प्रतिष्ठाकालनिरूपण। दिक्पालपूजाविधिः। कलसाधिवासविधिः। भगवत्प्रतिष्ठायां स्नपनादिविधिः। अधिवासनविधिः। रत्नन्यासविधिः। प्रतिष्ठाविधिकीर्त्तनञ्च।

अवभृतस्नानविधिः। बलिदानविधिः। द्वारप्रतिष्ठाविधिः। हनूप्रतिष्ठाविधिः। ध्वजारोपणविधिः। लक्ष्मीप्रतिष्ठाविधिः। गरुडस्थापनविधिः। चक्रस्थापनविधिः। शेषप्रतिष्ठाविधिः। चतुर्म्मुखस्थापनविधिः। नृसिंहप्रतिष्ठाविधिः। वराहप्रतिष्ठाविधिः। पुरुषोत्तमप्रतिष्ठाविधिः। वामनप्रतिष्ठाविधिकथनञ्च।

वैकुण्ठप्रतिष्ठाविधिः। हयशीर्षप्रतिष्ठाविधिः। अनिरुद्धप्रतिष्ठाविधिः। जलशायिप्रतिष्ठाविधिः। मत्स्यादिदशावतारस्थापनविधिः। अनन्तप्रतिष्ठाविधिः। विश्वरूपप्रतिष्ठाविधिः। शिवलिङ्गप्रतिष्ठाविधिः। रुद्रमूर्त्तिप्रतिष्ठाविधिः। अर्द्धनारीश्वरप्रतिष्ठाविधिः। हरिहरप्रतिष्ठाविधिः मातृणां प्रतिष्ठाविधिः। भैरवप्रतिष्ठाविधिकथनञ्च।

सूर्य्यप्रतिष्ठाविधिः गणेशप्रतिष्ठाविधिः। गौरीप्रतिष्ठाविधिः। नवग्रहप्रतिष्ठाविधिः। चलविष्णुमूर्त्तिप्रतिष्ठाविधिः। चलशिवलिङ्गप्रतिष्ठाविधिः। चित्रार्च्चादिप्रतिष्ठाविधिः। पुस्तकप्रतिष्ठादिविधिः। कूप-वापी-तड़ागादिप्रतिष्ठाविधिः। सभाप्रतिष्ठाविधिः। सामान्यतः सर्व्वदेवादिप्रतिष्ठाकथनं। जीर्णोद्धारविधिकथनं। महोत्सवविधिकथनं। यज्ञावभृतविधिकथनं। श्रीविवाहविधिकथनं। गौरीविवाहविधिकीर्त्तनञ्च।

---

**No 2035.** कुवलयाश्वीयं नाम नाटकम्। Substance, country-made paper, 12 × 4 inches. Folia, 85. Lines, 7 on a page. Extent, 2,219 ślokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Ujána, Post Mádhepura, Darbhángá, Paṇḍit Harshanátha Jhá. Appearance, fresh. Prose and verse. Correct.

**Kuvalayáśvíya.** A drama. By Krishṇadatta. It is founded on a story of a Vedic student named Kuvalayáśva, falling in love with a maiden named Madálasá. The maiden is carried away to the nether regions, whence she is rescued by a king of Káśí and restored to her lover.

**Beginning.** भालप्रज्वलनाच्चिकैतवमतीविश्लेषवैश्वानर-
ज्वालावर्त्तितसैारस्रैणवपयःफेनैकलेखेव या।
सा गैारी मिलने पुनः पुरिपोः प्रेमप्रदीपे रसं
दातुं शक्तिवपाच्छितेव कलिता चान्द्री कला पातु वः॥
अपि च। श्रुत्वा दूत्याद्वलीकं प्रियकलुषमतिव्यस्तया सद्य एव
त्यक्ते सत्या स्वदेहे प्रभुरपि न वपुं स्वीचकारापरं यः।
तामेव प्राप्य भूयो नगजननमितामर्द्धनारीश्वरोऽभूत्
स प्रेमाद्वैतवादी कलयतु भवतामस्थिमर्द्धेन्दुमौलिः॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। परोऽवलोक्य। कथमयमुदित एव मधुमयचित-समुदितमदनमालवकामिनीकापालफलककोमलकमनीयमण्डलः कनककुण्डलमाखण्डलदिगङ्ग-नाया अखण्डलावण्यरत्नाकरः अखिलजगदानन्दकन्दलश्चन्द्रमसमनमभ्युदीयमानमवमभ्यर्थये। सु-प्रश्रयमञ्जलिं बद्धा भगवन्।

कलयसि सकलाः कलाः सुधानां निधिरसि मौलिमलङ्करोषि शम्भोः।
शमयसि जगतामतीव तापं तव तुलमास्तु कुतस्त्य + हिमांशो॥
— — — — — — — — — सूत्र। — — — — —
छयादन इति मैथिलः कविर्वालभावसुलभात् कुतूहलात्।
नाटकं यदभिनव्यमातनोत् कोऽत्र सम्प्रति गुणागुणग्रहः॥
सदनुग्रहादेव सर्व्वं सोष्ठवम्पतूत्स्वते। — — — — पारि।
किन्नाम कीदृशं तत्?। सूत्र। कुवलयाश्वीयं नाम नाटकं॥ इत्यादि।

**End.** तथापीदमस्तु। काले काले तडिल्वानस्ततरसमयीं दृष्टिमिष्टां विधत्तां
पृथ्वी सम्पन्नशस्या भवतु, विजयिनः पान्तु लोकं नरेन्द्राः।
सर्व्वः सर्व्वत्र नन्दत्वखिलगुणगुरौ विन्दतु प्रेमभक्तिं

तद्विश्वेशे दयार्द्रे प्रसरतु परितः सत्कवेः सूक्तिरत्नम् ॥

भरद्वाजः । एवमस्तु । इति निष्क्रान्ताः सर्व्वे ।

**Colophon.** कुवलयाश्वसाम्राज्याभिषेकमहोदयो नाम सप्तमोऽङ्कः ॥ समाप्तञ्चेदं कुवलयाश्वीयं नाम नाटकम् ।

**विषयः ।** प्रथमाङ्के, काशीराजप्रतीहारयोरभिनयेन प्रजानां सौख्यवर्णनं । अत्रान्तरे भरद्वाजस्य ऋषेरादेशज्ञापनार्थं सोमशर्म्मणः प्रावेशिकी ध्रुवा । ततश्चैकेन शिष्येण कुवलयनामानमश्वमनुकर्षतानुगम्यमानस्यापरेण च दत्तहस्तावलम्बस्य महर्षेर्गालवस्य प्रवेशेन पातालाधिवासिनः पातालकेतोस्तपोवनोपरोधसूचनं । अथ मुनिना कुवलयाश्वेति कृतनामधेयः काशीराजकुमार ऋतध्वजः सादरमश्वमिममारुह्य तमनुससार ।

द्वितीयाङ्के,—समिदाहरणाय नियुक्तस्य पुण्यशीलस्य प्राभातिकतपोवनरमणीयतां वर्णयतो वात्स्यायनेन सह संलापेन विश्वावसोर्गन्धर्व्वराजस्यापहृत्य कुमारीनाम्ना मदालसा समानीता पातालपुरं पातालकेतुनेति सूचनं । कङ्कालककरालकयोः प्रवेशेन कुमारप्रभाववर्णनं, मन्त्राक्षवर्णनञ्च । अथ कङ्कालकेन वन्यजनकौपिकोमलप्रदर्शनव्याजेन तपोवनप्रान्तदेशं समानीतोऽसौ कुमारः सान्ध्यसौन्दर्य्यदर्शनसुखमनुभवन्नेव सूकररूपेण समुपस्थितं पातालकेतुमुद्दिश्य निष्क्रान्त इति ।

तृतीयाङ्के,—मन्दारिका-वृन्दारिकयोः संवादेन मदालसायाः कातर्य्यादिवर्णनं । मदालसायाः प्रवृत्तिमाकलयितुं पातालमुद्दिश्य प्रचलितायाः कुण्डलायाः कुवलयाश्वेन सह संलापकथनं । कुमारसौन्दर्य्यामृतं निपीय पूर्व्वमनुरक्ताया मदालसाया वैचित्र्यवर्णनं । अथ गन्धर्व्वकुलगुरोस्तुम्बुरोः प्रवेशेन तयोः परिणयवर्णनञ्च ।

चतुर्थाङ्के,—पुण्यशीलस्य प्रावेशिकी ध्रुवा । अत्रान्तरे सपरिजनस्य काशीराजस्य कुमारकृतपातालकेतुविजयादिवृत्तान्तश्रवणमहोत्सवः । कुमारस्य यौवराज्याभिषेकवर्णनञ्च ।

पञ्चमाङ्के,—देवब्राह्मणकार्पटिकयोरभिनयेन प्रियासहायस्य युवराजस्य वन्दनार्थं विश्वेश्वरस्य मन्दिरप्रदेशसूचनं । अथ मित्रतामुपागतयोर्नागकुमारयोः सपर्य्यां विधाय नितरां परितुष्टस्य तस्य प्रियायै चित्रनैपुण्यप्रदर्शनार्थं चित्रशालिकाप्रवेशः । अत्रान्तरे मदालसाया उत्स्वप्नायितं । समनन्तरञ्च कञ्चुकिप्रवेशेन मुनिगणरक्षणविधये विधातव्यं क्षोणीपर्य्यटनं कुमारेणेति सूचना ।

षष्ठाङ्के,—पातालकेतुसहोदरस्य सहचरसहायस्य धूमकेतोर्मुनिवेशेन प्रवेशः । कालिन्दीपरिसरे परिभ्रमता युवराजेन सह कपटतापसस्य संवादः । अथ तापसच्छद्मना प्रविष्टस्य धूमकेतोः प्रमुखात् युवराजप्राणत्यागवार्त्तामुपलभ्य जीवनत्यागोद्यतायाः मदालसायाः भरद्वाजवाक्येन चन्द्रबिम्बे प्रवेशकथनं ।

षष्ठमाङ्के.—नागकुमारयोरभिनयेन प्रियाविरहविधुरस्य कुवलयाश्वस्य परिदेवनादिकीर्त्तनं। वटुवेशधारिभ्यां ताभ्यां सह तस्य नागलोकगमनसूचना। अथ विस्मापयितुं तस्मै नागराजस्य मायामहालयप्रदर्शनं। नागराजप्रभावात् तस्य प्रकृतमहालयसम्मेलनं। अथ काशीमुद्दिश्य चलितस्य कुवलयाश्वस्य प्रियायै विविधजनपदप्रदर्शनं। तस्य राज्याभिषेकमहोत्सववर्णनञ्च।

---

**No. 2036.** व्यवहाररत्नाकरः। Substance, country-made paper, 14×5 inches. Folia, 107. Lines, 8 on a page. Extent, 2,756 ślokas. Character, Maithilí Date, ? Place of deposit, Navani, Post Mádhepura, Darbhángá, Paṇḍit Vañsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

**Vyavahára-ratnákara.** A digest of the laws and rules regarding Judicature. By Chaṇḍeśvara Ṭhakkura, son of Viśveśvara Ṭhakkura. The author calls himself a minister (*Mantri*) and describes his father as a minister of war, but does not name the king whom they served.

**Beginning.** श्रीगणाधिपः सर्व्वं साधयतु।

साक्षान्निर्णयतें विवादविषयं न्यायामृतैर्येक्षणाद्-
यो वादार्थपथप्रवर्त्तनकृती धर्म्मेन्दुसन्तर्पयन्।
स श्रीमान् व्यवहारसङ्ग्रहमयं चण्डेश्वरो मन्त्रिणा-
मर्च्यः कीर्त्तिसुरापगाम्बुदपरं प्रस्तौति रत्नाकरम्॥
यन्न्यायामृतसेचनात् सफलतां पुष्णाति कल्पद्रुमः
सद्यः पल्लवमातनोति नितरां श्रीपारिजातोऽपि यः।
गोपालस्य च कामधेनुरमणं काम्यार्थदुग्धं स्वयं
सन्दुग्धे ध्रुवमेष कस्य भवने सेव्यो न रत्नाकरः॥
प्रथमं तावदेवोक्तं व्यवहारनिरूपणम्।
प्राड्विवाकमताः सभ्योपदेशाश्च ततः क्रमात्॥ इत्यादि।

**End.** विक्रयेण वसिष्ठमिति तदनुमतिसम्मतेन अन्यत्र दानविधानात्। विसर्गश्चैवेति नारदवाक्याच्च॥

**Colophon.** इति सप्रक्रियमहासान्धिविग्रहिकठक्कुरवीरेश्वरात्मजश्रीचण्डेश्वरविरचिते व्यवहाररत्नाकरे निर्णयादितरङ्गः।

निर्णीयव्यवहारसागमहसा यः प्राड्विवाकः स्फुरन्-
++++ विचारचारुधिषणो धर्म्मं नयत्युन्नतिम्।

तेनायं गुरुसन्धिविग्रहधुरां धौरेयसम्प्रीतिना
श्रीचण्डेश्वरमन्त्रिणा विरचितः प्राज्ञेषु रत्नाकरः ॥
समाप्तोऽयं व्यवहाररत्नाकरः ।

**विषयः ।** व्यवहारस्वरूपनिरूपणं । देशाचारादिप्रामाण्यनिरूपणं । प्राड्विवाकादिलक्षण-कथनं । चतुर्विधसभानिरूपणं । सभ्योपदेशकीर्त्तनं । विचारविधिकथनं । भाषाविधिकथनं । तत्र चतुर्विधपूर्व्वपक्षनिरूपणादिकं । उत्तरविधिकथनं । तत्र कालादिव्यवस्थापनं । उत्तरे विशेषक-थनञ्च । प्रतिनिधिविधिकथनं । प्रत्याकलितनिरूपणं । सन्धिविधिकथनं । क्रियादाननिरूपणं । क्रियानिरूपणं । तत्र साक्ष्यादिस्वरूपकथनं । साक्षिणः । साक्षिप्रत्युद्धारविधिः । साक्षिदूषणविधिः साक्षिप्रश्नविधिः । तत्र शपथविधिकीर्त्तनञ्च । साक्षिपरीक्षाविधिः । साक्षिदण्डनिरूपणं । तत्र सत्यापवादनिरूपणं । साक्षिबलाबलनिरूपणं । साक्षिनिगदकथनं । लिखितनिरूपणं । तत्र लौ-किकलेख्यस्य सप्तविधत्वनिरूपणं । राजशासनलेख्यस्य त्रिविधत्वकथनञ्च । शासनस्वरूपादिकथ-नं । दुष्टलेख्यनिरूपणं । लेख्यदौर्बल्यनिर्णयः । भुक्तिनिरूपणं । तत्र अनुपभोगेन असिद्धिकथनं । विच्छिन्नभोगनिर्णयः । युक्तिकथनं । दिव्यनिरूपणं । द्रव्यसंख्यादितो दिव्यविशेषकथनं । तत्र घटा-ग्निजलादिपरीक्षाविधिकथनञ्च । समयुवर्णादितो दिव्यविशेषकथनं । दिव्यदेशविध्यादिनिरूप-णञ्च । धर्म्मजन्मविधिकथनं । शपथविधिः । अष्टविधनिर्णयः । निर्णयबलाबलनिरूपणं । निर्णी-तकृत्यनिरूपणं । जयप्रतिपत्तिकथनं । पुनर्न्यायविधिकथनं । कृतनिवृत्तिविधिकथनं । स्वतन्त्रा-स्वतन्त्रनिरूपणञ्च ।

---

**No 2037.** **विभागसारः ।** Substance, country-made paper, 13 × 4 inches. Folia, 10. Lines, 6 on a page. Extent, 585 Ślokas. Character, Maithilí. Date, ? Place of deposit, Navâni, Post Mádhepura, Darbhángá, Paṇḍit Vañsamaṇi Jhá. Appearance, fresh. Prose and verse. Generally correct.

**Vibhágasára.** A summary of the Law of inheritence. By Vidyápati Mahámahopádhyáya. Contents: Inheritance defined, its nature. Partition of paternal property. Rules regarding partition. Unfitness for partition. Nature of partible property. Indivisible property. Woman's property—its partition. Partition of secreted property. Partition with reference to castes. Partition of partitioned property. Twelve kinds of sons and their shares. Heirs of childless people. Partition of joint property. Mode of partition.

**Beginning.** गङ्गा मेऽसौ समापि प्रा++ कथमचो वैष्णवीति प्रसिद्धेः
किन्नाम्ना मेऽस्ति भोगः स तु भवतु तथा भेदभाजः प्रमाणम् ।

भिन्नोऽहं कोऽत्र साक्षी विधिरिति विधिना सम्मितं वीक्ष्यमाणौ
पायास्तां निर्व्विषादौ सपदि हरिहरौ व्यक्तमाचोत्तराङ्गः ॥
राज्ञो भवेशाद्धरिसिंह आसीत्तत्सूनुना दर्पनरायणेन ।
राज्ञा नियुक्तोऽत्र विभागसारं विचार्य्य विद्यापतिरातनोति ॥

अथ विभागः । विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥

पुत्रैरित्युपलक्षणं । पूर्व्वस्वामिसम्बन्धादेव निमित्ताद् यत्र स्वत्वं स दायः । इत्यादि ।

**End.** स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्याद् यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥

**Colophon.** इति महामहोपाध्यायश्रीविद्यापतिविरचितो विभागसारः ।

विषयः । दायलक्षणकथनं । विभागस्वरूपकीर्त्तनं । तत्र मृतपितृकविभागकथनं । विभागव्यवस्थाकथनं । भागानर्हनिरूपणं । विभाज्यस्वरूपादिनिरूपणं । अविभाज्यनिर्णयः । स्त्रीधनादिनिरूपणं । स्त्रीधनविभागकथनं । गुप्तधनविभागकथनं । वर्णसमवाये विभागकथनं । विभक्तजविभागकथनं । द्वादशविधपुत्रलक्षणकथनपूर्व्वकं तत्र विभागविधिकीर्त्तनं । अपुत्रधनाधिकारिनिरूपणं । संसृष्टधनविभागः । विभागनिरूपणञ्च ।

---

**No. 2038** वृत्तदर्पणः । Substance, country-made paper, 14 × 3 inches. Folia, 10. Lines, 8 on a page. Extent, 1,200 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepura, Darbhángá, Paṇḍit Vaṅsamaṇi Jhá. Appearance, new. Verse and prose. Generally correct.

**Vṛitta-darpaṇa.** On the laws of versification and the different metres used in Sanskrit poetry. By Kavíndra, son of Ramánánda.

**Beginning.** अगणितवाङ्मयवारिधिसुष्टमणिलाभनिष्टाः कवयः ।
जीवन्ति यत्प्रसादात् स पिङ्गलो मङ्गलं तनुताम् ॥
अर्कस्तर्कसरोरुहस्य कविताभासन्तिकाषट्पदः
स + भाकरकल्पनाशतगुरुर्मन्याब्धिमन्थाचलः ।
गोपालः सुकृती कणादभणितिव्याख्याकरोऽजायत
व्याचक्रे किल कोविदोत्सवकरीं काव्येषु यः कौमुदीम् ॥
आसीन्नासीरगन्ता सकलसुख + नां + + + + नियन्ता
संसत्सन्तापहन्ता हरिचरणरतोभक्तिभावानमन्ता ।

तत्पुत्रः कीर्त्तिधाराधवलितहरित्प्रान्तविश्रान्तनामा
रामानन्दो गुणीन्द्रः कविकुलकुमुदश्रेणिशुभ्रांशुबिम्बः ॥
तत्पुत्रस्तु कृपा + + गुणवतां श्रीजानकीनन्दन-
श्चक्रे यं किल कोकमाहवधरणीकान्तः कवीन्द्राभिधम् ।
सोऽहं सम्प्रति वृत्तदर्पणममुं निर्म्मातुमीहेतरां
सन्तः सन्तु सकौतुकाः शुकगिरः केषां न मे दोर्द्धिरः ॥
रामानन्दतनूजन्मा कवीन्द्रपदभूषितः ।
कुतुकी जानकीनन्दः कुरुते वृत्तदर्पणम् ॥
सानुस्वारो विसर्गान्तो दीर्घः संयुक्तपूर्व्वगः । इत्यादि ।

**End.** अथ दोषाः । निर्म्मात्री निरनुप्रासः स्थानभङ्गं कलाहतिः ।
दौर्बल्यं च + चित्यं नित्यदोषाः प्रकीर्त्तिताः ॥

**Colophon.** इति श्रीकवीन्द्रकृतौ वृत्तदर्पणः समाप्तः ।

**विषयः ।** छन्दसां लक्षणोदाहरणकथनं । तत्र गणभेदः । गणदेवता । गणमित्रादिकथनञ्च । प्रस्तारकथनं । तत्र मात्रोद्दिष्टं । वर्णोद्दिष्टं । मात्रानष्टं । वर्णनष्टं । वर्णमेरुः । मात्रामेरुः । वर्णपताका । मात्रापताका । आर्य्यावृत्तं । गीतिः । (गाहा, उग्गाहु) । गाहू । विग्गाहा । गाहिनी । परिगीतिः । सिंहिनी । अर्द्धविपुलादिकथनञ्च । वैतालीयप्रकरणं । दोहा । सौराष्ट्री । पादाकुलकं । चित्रा । पज्झटिका । अडिल्ला । मधुभारः । आभीरः । दीपकः । कलिका । गणनाङ्गं । हाकलिः । चौपैया । पद्मावती । दण्डकलं । विभङ्गी । लीलावती । जलहरणा । दिक्पाली । दुर्म्मिलिका । मदनहरा । मरहट्टा । हरिगीतिका । हीरक । प्लवङ्ग । वामना । रोला । सिंहावलोकनं । चौरोला । द्विपदं । झुलना । घत्ता । घत्तानन्दं । आषाढं । मत्ता । रसमाला । अवलम्बकं । षट्पदी । द्विपदं । मुण्डलिया । रसिका । माला । खञ्जा । शिखा । गलितकं । उद्गलितकं । (अत्र सेतुकाव्यादुदाहरणमुद्धृतम् ) मालागलितकं । मुग्धानकं । नवपदं । चारुसेना इति मात्रावृत्तकथनपूर्व्वकमेकाक्षरादिषड्विंशत्यक्षरपर्य्यन्तं वर्णवृत्तानां लक्षणोदाहरणकथनं । अथ अर्द्धसमादिवृत्तकथनं । तत्र सुन्दरी । हंसवती । केतुमती । विपरीतपूर्व्वा । सुखदा हरिणप्लुता । शिशुलीला । पुष्पिताग्रा । दोधकं । उद्गतादिविषमभेदकथनञ्च । अथ मुदितासुरभिद्-षड्कीनरशोल्लरादिसामान्यच्छन्दोनिरूपणं । अथ गद्यभेदनिरूपणं । तत्र मुक्तकलक्षणादिकथनं । उत्कलिकाप्रायं । चूर्णकं । कलिका । मादिका । मैत्रीवादः । अन्तराकलिकादिकथनं । हरिणप्लुतादिविविधगद्यभेदकथनं । अथ विरुदलक्षणादिकं । चण्डवृत्तानि । त्रिरुदकं । अस्य एकादशविधप्रभेदनिरूपणञ्च । छन्दोदोषकथनञ्च ।

**No. 2039.** पुण्यचन्द्रोदयपुराणम् । Substance, country-made paper, 9 × 5 inches. Folia, 134. Lines, 13 on a page. Extent, 3,484 ślokas. Character, Nágara. Date, Sm. 1850. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

**Puṇya-chandrodaya Puráṇa.** A Jain version of the Rámáyaṇa, prefaced by an account of some Jinas; alleged to have been related by Mahávíra, on the Vaibhára Hill, at the request of S'reṇika sometimes, but probably incorrectly, called Koṇika, a king of Magadha. The work is divided into 23 cantos. The first is devoted to an introduction. The second gives a brief account of S'reṇika, king of Magadha, and of his wife Chiliní who bore him 7 sons. The king goes to the Vaibhára Hill to pay his respects to Mahávíra, and requests the sage to relate to him the Puráṇa. The third is devoted to descriptions of Jambudvípa, Bháratavarsha, the town of Champá, and its king Harivarma. Then follows (4 to 8) an account of the king of Dhammilla and his adventures with Apsarases, his wars, his abdication of the pleasures of the world for the life of a hermit (*munivrata*) his austerities, and his translation to heaven. In the family of this king (9) Jina took his birth, and assumed the name of Munisuvratanátha. The story of his early life forms the subject of the next canto (10). His hermitage and teachings and conversions follow in the two next cantos and his nirváṇa in canto 13. Then comes the conversion of Yaśodhara, king of Mathurá, by Anantanátha, the 14th Jina, the installation of Harivena as an emperor, and the attainment by him of his *summum bonum* (15). Birth and family of Rishabha Deva, the first Jina, his descendants the Bharatas and the Sagaras. (16). Account of S'ruta. Ditto Vasurája, his sojourn and recreations on the Nárada Hill. Fruits of cruelty and benevolence. (17—18). Dilípa's reign in Báráṇasí. Origin of the Raghus. Account of Ráma and Lakshmaṇa, the metropolis of Daśaratha. Naradeva of Nágapura, Sahasragríva, king of Meghakúṭa; expelled by his nephew S'ítakaṇṭha, who established dominion in Laṅká. His descendants. (19). Births of Rávaṇa, Báli, Sugríva &c. Sitá born as a daughter of Rávaṇa by Mandodarí, made over to Janaka. Marriage of Ráma with Sítá. Ráma appointed vice-king, and deputed to govern Váránásí; Nárada visits him there. (20—21). A vernal festival celebrated by Ráma, in course of which Sitá is abducted by Rávaṇa. Ráma's brothers and relatives come to him and devise means for the rescue of S'ítá. Hanumán assumes the form of a black bee

to go in search of Sítá. Mandodarí offers protection to Sítá. (22, 23). Interview of Hanumán with Rávaṇa. Vibhíshaṇa sides with Ráma. Lakshmaṇa kills Báli, mistaking him for an elephant. Ráma's march to Laṅká. His victory over Rávaṇa. The conquest by Ráma and Lakshmaṇa of different parts of the earth. Their return to Ayodhyá. Daśaratha instals Ráma as the king of the country. Rules regarding the worship of Jina on the 2nd of the waxing moon in Kártika. Ráma worships Jina. Sítá bears eight sons. In grief for the death of Lakshmaṇa Ráma abdicates in favour of his son Lava, becomes an ascetic, and dies.

The work is a most curious one, and is worthy of careful examination. It departs from the Rámáyaṇa account of Ráma in many essential particulars.

**Beginning** देवेन्द्रार्च्चितसत्पादपङ्कजं प्रणमाम्यहम् ।
आदीश्वरं जगन्नाथं दृष्टिधर्म्मकरं भुवि ॥
कनककर्च्चूरसच्छाय वृषभाङ्कं वृषोद्धरम् ।
वृषभं जगतां भोक्तारं कर्म्मणोऽनन्तसिद्धय ॥
युग्मम् ।
अजितं जितकर्म्माणमनन्तमहसं जिनम् ।
गजाङ्कं दर्पकन्दर्पसर्प-सर्पारिविक्रमम् ॥
अष्टापदसमच्छायं जातं श्रीवृषभाम्बर ।
पञ्चाशत्कोटिवार्द्धीनां भजके (?) भुवनेश्वरम् ॥
युग्मम् ।
अश्वाङ्कं शं भव चा ये (?) सप्तजन्मनदल्लिषम् ।
सुरासुरैर्नमस्कारपरैः शतप्रजार्च्चितम् ॥
त्रिंशल्लक्षादिकोटीनामम्बुधीनां तदन्तरे ।
प्रादुर्भूतं स्फुरत्कान्तिं स्फुरदंशुमिवापरम् ॥
युग्मम् ।
अभिनन्दननामानं नराणामभिनन्दनम् ।
शुद्धहाटकसङ्काशं सङ्काशं शुद्धहाटकम् ॥
दशलक्षप्रकोटीनामब्धीनामन्तरे भवम् ।
निपतामस्याशु संसारशतसन्ततिहानये ॥
— — — — — — — ।
सिद्धान् साधूंस्तथा नत्वा पद्मचेतोः करोम्यहम् ।
पद्मचन्द्रोदयं नाम पुराणं मौनिसुव्रतम् ॥ इत्यादि ।

**End.** इन्द्रष्टष्टचन्द्रमितेऽथ वर्षे (१६८१) श्रीकार्त्तिकाख्ये धवले च पक्षे
जीवे चयोदश्यपराह्णयामे कृष्णेन सौख्याय विनिर्म्मितोऽयम् ॥
लोहपत्तनमिवासमहेभ्यो हर्ष एव वणिजामिव हर्षः ।
तत्सुतः कविविधिः कमनीयो भाति मङ्गलमहोदरकृष्णः ॥
श्रीकल्पवल्लीनगरे गरिष्ठे श्रीब्रह्मचारीश्वर एव कृष्णः ।
कण्ठावलम्ब्यूर्ज्जितपूरमङ्गः प्रवर्द्धमानो हितमाततान ॥
पञ्चविंशतिसंयुक्तं सहस्रत्रयमुत्तमम् ।
श्लोकसंख्येति निर्द्दिष्टा कृष्णेन कविवेधसा ॥

**Colophon.** इति पुण्यचन्द्रोदये मुनिसुव्रतपुराणे श्रीपूरमल्लाङ्के हर्षवीरिकादेहजब्रह्मचारिश्रीमङ्गलदासाग्रजब्रह्मचारीश्वरकृष्णदासविरचिते रामदेवशिवगमनं नाम चयोविंशतितमः सर्गः समाप्तः। संवत्। १८५०।

विषयः। १म सर्ग,—दुर्ज्जननिन्दा-सज्जनस्तुतिकथनं। कवेः सामर्थ्यासामर्थ्यनिरूपणं। वक्तृलक्षणकथनं। श्रुतलक्षणं। एतच्छास्त्रमाहात्म्यकथनं।

२य सर्ग,—मगधविषयेषु राजगृहनगरे श्रेणिकाभिधानो नरपतिरासीत्। जैनधर्म्मधुरन्धरस्य तस्य चेलिनी नाम महिषी रूपविद्यासम्पन्नान् सप्त पुत्रान् सुषुवे। अथैकदा वैभारगिरिशिरसि समागतं महावीराभिधानं जिनेन्द्रं द्रष्टुकामोऽसौ राजा तत्र गत्वा प्रणम्य च पुराणमिदं विस्तरेण वक्तुं प्रार्थयामास।

३य सर्ग,—जम्बूद्वीपवर्णनं। भारतवर्षवर्णनं। चम्पानगरीवर्णनं। तन्नगराधिपस्य हरिवर्म्मणो वृत्तान्तकथनं।

४र्थ,—सर्ग,—धर्म्मिल्लनगराधिपतेः भानोः वृत्तान्तकथनं। तस्य नागपुरगमनपूर्व्वकं नागकामिनीदर्शनादिविवरणकथनं। तत्र युद्धादिवर्णनं। कैलासगिरिरामनाथयोगीन्द्रस्य विवरणकथनं। तेन च विदेहाधिपतेः महासेनस्य वृत्तान्तकथनं। अथ रम्यकदेशाधिपतनयाय चित्रविक्रमाय तस्य कन्यासम्प्रदानादिविवरणकथनञ्च।

५—६ सर्ग,—चम्पानगरीपुरन्दरस्य हरिवर्म्मणः नागकन्यया सह समागमवर्णनं। अथ हरिवर्म्मणोऽनन्तवीर्य्याभिधानजिनयोगीन्द्रात् उपदेशप्राप्तिकथनं। तत्र ब्रह्मचर्य्यादिचतुराश्रमधर्म्मवर्णनं। ततश्च तदुक्तधर्म्मदेशनश्रवणेन जातनिर्व्वेदोऽसौ राजा स्वसुते राज्यं समर्प्य मुनिव्रतं गृहीत्वा तपश्चचार इति विवरणकथनञ्च।

७—८ सर्ग,—हरिवर्म्मणो ध्यानप्रकारवर्णनं। अथ स्वर्गगतस्य तस्य वैभववर्णनं। आर्य्यावर्त्ताधिवसतेः शोभाभारभृतो मागधस्य विवरणकथनं। हरिवंशस्य राज्ञो वृत्तान्तकथनं। तत्कुले नभस्तलात् रत्नराशिपतनविवरणकथनञ्च।

९—१० सर्ग,—जिनदेवस्य हरिवंशपुत्रत्वेन जन्मकथनं। तस्य मुनिसुव्रतनामेति नामक-

रणकथनं। तस्य अभिषेकसमये इन्द्रादिदेवकृतस्तोत्रवर्णनं। बाल्यलीलावर्णनं। राज्यप्राप्तिवर्णनं। तद्राज्ये ... स्य पूर्व्वजन्मनि तालपुरे नरपतित्वमासीदिति विवरणकथनं। गार्हस्थ्यधर्म्मकथनं।

११—१ सर्गे,—मुनिसुव्रतस्य दीक्षाग्रहणकथनं। केवलोत्पत्तिकथनं। अर्हदतिशयगुणवर्णनञ्च। मथुराधि ... सहस्राख्यस्य भूपतेः विवरणकथनं। रुक्मिनगराधिपतेर्वृत्तान्तकथनं। सक्मीपतिं प्रति मुनिसुव्रतस्य उपदेशकथनं। तत्र संक्षेपेण जैनधर्म्मतात्पर्य्यकथनं। अर्हदर्चनायाः मन्त्रादिकीर्त्तनं। चतुर्थाश्रमधर्म्मकीर्त्तनञ्च।

१३—१४ सर्गे,—मुनिसुव्रतस्य निर्व्वाणप्राप्तिविवरणकथनं। मथुरानाथस्य यशोधरस्य अनन्तनाथनामकचतुर्दशजिनाद्दीक्षादिप्राप्तिवर्णनं। हरिषेणस्य चक्रवर्त्तित्वप्राप्तिवर्णनं। सर्व्वार्थसिद्धिप्राप्तिकीर्त्तनञ्च।

१५—सर्गे,—कालपरिमाणसङ्ख्यादिकथनं। कुलकराणां विवरणकथनं। तद्वंशे ऋषभदेवस्य आदिजिनस्य जन्मकथनं। तत्पुत्रादीनां भरतादीनां वृत्तान्तकीर्त्तनं। क्रमेण सगरादीनां वंशवर्णनं। सुयोधनदुहितुर्भार्य्यायाः स्वयम्वरे सगरस्य गमनवृत्तान्तकथनं।

१६ सर्गे,—श्रुतनामकस्य मुनेरुपाख्यानं। वसुराजस्य उपाख्यानकथनं। नारदपर्व्वताभिधानयोस्तपस्विनोः समित्पुष्पाहरणाद्यर्थं रमणीयवनप्रवेशपूर्व्वकं सप्त(?)... स्त्रीभिः सह रममाणं मयूरमेकं पश्यतोः विवरणकथनं। सगरानुष्ठितपशुयागे केवलं पर्व्वतस्य मुनेरार्त्तिज्यग्रहणविवरणकथनं। हिंसाया दोषावहत्वकथनं। अहिंसायाः परमधर्म्मत्वकथनं।

१७—१८ सर्गे,—वाराणस्यां दिलीपस्य राज्यकरणविवरणं। रघोरुत्पत्तिकथनपूर्व्वकं रघुवंशवर्णनं। रामलक्ष्मणादीनामुत्पत्तिकथनं। पुनरेव अयोध्यायां दशरथस्य राजधानीस्थापनविवरणकथनं। नागपुराधिपतेः नरदेवस्य विवरणकथनं। मेघकूटाधिपतेः सहस्रग्रीवस्य नृपतेः विवरणकथनं। तद्भ्रातुष्पुत्रेण सितकण्ठेन युद्धे पराजितस्य सहस्रग्रीवस्य निर्व्वासनवृत्तान्तकथनं। अथ सितकण्ठस्य लङ्कायां राजधानीकरणविवरणं। क्रमेण तत्पुत्रपौत्रादीनां शतकण्ठ-पञ्चाशत्कण्ठपुलस्त्यादीनां वृत्तान्तकथनं।

१९—सर्गे,—मेघश्रीगर्भजातस्य पुलस्त्यपुत्रस्य रावणेति नामकथनं। बालिसुग्रीवादीनां जन्मकथनं। बालिनः समीपात् सप्तकृत्वः रावणस्य पराजयप्राप्तिकथनं। कण्ठे हारधारणेन तस्य दशकण्ठत्वप्राप्तिकथनं। रावणकृतनन्दीश्वरव्रतानुष्ठानकथनं। अथ मन्दोदरी-मनोवेगा-मन्त्रघोषा-मञ्जुघोषाप्रभृतीनां रावणमहिषीणां विवरणं। मन्दोदरीगर्भे सीतायाः जन्मवृत्तान्तकथनं। भूमिखननकाले जनकेन मञ्जूषास्थितकन्याप्राप्तिविवरणं। रामस्य सीतापरिणयादिकथनं। अथ दशरथानुज्ञया यौवराज्याभिषिक्तस्य रामस्य सह सीतया लक्ष्मणेन च वाराणसीगमनपूर्व्वकं तद्राज्यशासनविवरणकथनं। रावणसभायां नारदस्य आगमनवृत्तान्तवर्णनञ्च।

२०—२१—सर्गे,—एकदा वसन्तकाले वाराणसीस्थचित्रकूटोद्याने स्त्रीभिः सार्द्धं रामलक्ष्मणयोः वसन्तोत्सवकरणविवरणं। नारदवाक्येन शूर्पणखामारीचसहायस्य रावणस्य सीताहरण-

हृत्तान्तकथनं। सीताहरणवृत्तान्तं श्रुत्वा जनक-भरत-शत्रुघ्नानां रामसमीपागमनविवरणं। अत्रावसरे अञ्जनानन्दन-सुग्रीवयोः स्वयमेव रामान्तिकागमनकथनं। अञ्जनापुत्रस्य हनुमानिति नामकारणकथनं। हनुमतो सीतादर्शनार्थं भ्रमररूपेण लङ्काप्रवेशवर्णनं। मन्दोदरीकृतसीतासमाश्वासनं।

१२—२१—सर्गे,—रावणस्य हनुमता सह संवादकथनं। विभीषणस्य रामपक्षपातित्वकथनं। गजमेकं निमित्तीकृत्य लक्ष्मणेन सह युद्धस्थले वालिनो मृत्युपुरगमनकथनं। वानरबलेन सह लङ्कां प्रविष्टस्य रामस्य रावणवधादिवृत्तान्तकथनं। रामलक्ष्मणयोर्दिग्विजयवर्णनं। पुनरयोध्यायां गमनकथनं। दशरथकृतरामराज्याभिषेकवर्णनं। कार्त्तिकशुक्लद्वितीयायां जिनपूजाविधिकथनं। रामस्य जिनमन्दिरे पूजादिकरणकथनं। सीताया अष्टौ पुत्रा जाताः। तेषु लघुना मकाय यौवराज्यं दत्त्वा रामस्य लक्ष्मणवियोगविधुरस्य वृषभस्य जिनदेवस्य समीपं गत्वा केवलदीक्षाग्रहणकथनं। अन्यासु तिथिषु जिनपूजाविधिकथनं। रामस्य शिवप्राप्तिकथनञ्च।

---

**No. 2040** हरिवंशः। Substance, country-made paper, 9 × 3½ inches Folia, 488. Lines, 9—10 on a page Extent, 9,314 ślokas. Character, Nágara, Date, Sm. 1841. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

**Harivanśa Purána.** An imitation of the Hindu Harivanśa, giving accounts of several Jinas, abstracts of many Jain legends, details of Jain rites and ceremonies, and histories of ancient dynasties, including the Kurus, the Pándus and the Yádavas, all cast in Jain moulds, and devoted to Jain worship. By Jinasena Áchárya.

Contents. I. II. Introduction. Birth of Jina as son of Samudra, chief of Kundapura, in the Videha country. He is named Vardhamána. On the 30th year of his life he retires from home, and for twelve years afterwards performs penance and austerities. Thereby he attains perfect knowledge. He remains silent for 66 days, and then retires to Rájagriha. There, seated on a throne, he sojourns with Indra and other gods and Kaundinya and other sages with their disciples. Chandaná, a princess, approaches him. Nágas, Kinnaras and others repair to his presence. At the request of one Gautama he expounds the Jaina religion in all its branches. He sets the water of religion in motion at Magadha. *(Dharmatírtha-pravarttana.)*

III. The religion spread over Kásí, Kánchí, Dravida, Maháráshtra, Gándhára and other countries. The gratification of beings on

hearing the religion expounded by the sage in the Mágádhi language. His glorious career at Panchaśaila *alias* Rájagriha. The religion of Jina as given to his audience. Beings are either perfected (*siddhas*) or imperfect (*asiddha*). The perfected are those who have destroyed all the obstructions to true knowledge. They are of three kinds. The imperfect are those who are attached to falsehood, and thence they suffer pleasure and pain. Beings are again divided into Bhavya and Abhavya. Fruits of evil disposition, delusion, longings. Advantages of forbearing from wine and flesh-meat. Evil works, their fruits. Advantages of overcoming the longings of the senses. Evils of lust. True knowledge and cause of the world's sufferings, causes thereof. Brief accounts of Sanatkumára, Mahendra &c., their fall from heaven. Salvation of one from good works done in his former existence. Gautama relates the Harivaṅśa to S'renika *alias* Jitaśatru.

IV.—VI. Aloka (ákáśa) defined; its inhabitants. Loka defined. Its condition and divisions, its atomosphere, extent thereof. The lowest Loka, the hills there. The middle Loka or the region of the earth, its islands and their extent and number. The highest Loka. The distances of the planets and stars from the earth. The Siddhas live there.

VII. Time defined. Abstract and comparative time. Its divisions into three kinds, past, present and future. Various modes of reckoning time. Measures of length and bulk. Kulakara dynasty reigning between the Ganges and the Sindhu rivers,—its 14 descendants.

VIII. Birth of Rishabha, in the above named dynasty. He was son of Nábhi by Maru Deví. Maru's dream of Rishabha entering her womb. She is served by goddesses during her pregnancy. The name of the place of birth was S'aketa. Gods come to behold the new-born babe. Wife of Purandara, through the instigation of her husband, carries away the babe to Sumeru, leaving another child in his place. Gods named the babe Rishabha, bore his ears, and put earrings therein. Paulamí then brought back the child, and restored him to his parents.

IX. Childhood of Rishabha. He marries Nandá and Sunandá, each of whom bore him a son and a daughter. Division of men into Kshatríya, Vaiśya and S'údra to keep them duly employed. Rishabha's retirement from home. At Prayága he cuts off his top-knot. His companions assume garbs of bark and grass. He travels about without raiment for six months. He receives a jar of sugar-cane juice from

Somaprábha. Nine rules about gifts. He attains absolute knowledge while performing meditation under a Nyagrodha tree in the garden of the Vrishabhasena, king of Púrva-tálapura, and makes disciples.

X. He preaches his religion, comprising five duties, namely benevolence, truth, abstinence from theft, avoidance of concupiscence, and freedom from delusion. These duties and their subdivisions described in detail.

XI.—XIII. Bharata, son of Rishabha, conquers the universe and accepts in marriage daughters of Mlechchha kings. His brothers become hermits. Jaya, king of Hastinápura, a friend of Bharata, becomes a hermit. Names of Jina's 84 followers (*ganagana*). He goes with his followers to Kailása, where he is worshipped by gods and others. Bharata abdicates in favour of his son, and becomes a hermit. His descendants successively become Jaina hermits, and attain nirvána. Somajasah, son of Báhubala, and grandson of the Jina, becomes the founder of the Lunar race. Innumerable members of the Lunar race attain nirvána. His sixty thousand sons destroyed by a Nága king. Sagara becomes a Jaina, and attains salvation. His surviving son Sambhavanátha and his descendants represent the Ikshákú race.

XIV. Story of Sumukha, king of Kausámbí, and his love for a maiden of his court, by whom he got a son named Hari, whose son Mahágiri and his descendants formed the Hari race, (*Harivaṅśa*).

XV.—XVII. The wife of Sumitra, of the Hari race, sees a dream, and gives birth, on the 12th of the waxing moon in the month of Mágha when the moon was in the constellation S'ravaṇá, Jinendra in Kuśágárapura *alias* Rájagriha. Devas come to worship the child. They place him on Airávata, the elephant of Indra, anoint him, name him Munisuvrata, and then restore him to his mother. In his youth he one night saw beautiful clouds in the sky, and they were soon after dispersed by a high wind. This set him thinking. He becomes a hermit. His death. He is succeeded by his son Daksha, whose son by Ilá was Aila Daksha. Daksha being guilty of incest on his own daughter Manohari, Aila Daksha with his mother retired to the banks of the Narmadá, and established a town named Máhíshmatí. His son Kunema established the town of Kuṇḍina. His son Puloma established Indrapura. His descendants. The Vasu dynasty, its fall.

XVII.—XIX. A king of Mathurá had two sons Súra and Suvíra.

From Sura descended Andhaka-Vrishni, and from Asura, Bhojaka-Vrishnis. Andhaka-Vrishni had ten sons, of whom Vasudeva was one, and two daughters of whom Kunti was the eldest. Descendants of Bhoja Vrishni. Suvasu of the Vasu dynasty, was the founder of the family of Jarásandha whose descendants became Kálayavanas. Religious discourse at Rájagriha. Virtuous works. Animals of various kinds. Accounts of the two Vrishni families. Vasudeva cuts off the head of a hunchback woman with his bare hands. Other stories about him.

XX.—XXI. Story of Padma and his covering the three regions with three steps. Stories of Chárudatta and Vasantasaená, daughter of Kalingasena.

XXII.—XXIV. Story of Vasudeva's acceptance of the Jain asceticism at the suggestion of a dancing girl. His peregrinations, marriage with the daughter of Kapilasruti, who bore him a son named Kapila.

XXV.—XXVIII. Vasudeva kills, in a quarrel with Kártaviryáryuna, Jamadagni, whose son Parasuráma destroys the Kshatriya race seven times over. The wife of Kártaviryáryuna, on her husband's death, escapes, and takes shelter in a Jain hermitage, where she gives birth to a son, who destroys the Bráhmana race twenty-one times over. Vasudeva carried away by a she-devil named Súrpanakhá. His adventures. Account of some atheists.

XXIX.—XXXII. Origin of the temple of Kámadevagriha at S'rávasti. Story of Kámadeva. Vasudeva marries his daughter Ení, and then marries Rohiní at a Sayambara. Balaráma born of Rohiní.

XXXIII.—XXXIV. Vasudeva's journey to Rájagriha with his pupils. Account of Kañsa, who throws his father Ugrasena into prison, becomes king, and gives his sister Devakí to his tutor Vasudeva. The seventh son of Devakí kills Kañsa. Account of the other six sons of Devakí. Account of Arishtanemi, a Jina. Accounts of various fasts and penances.

XXXV.—XXXVII. Devakí gives birth to two sons. Devas carry them away, leaving two still-born children in their place. Kañsa pounds the dead children on a stone. Other sons born and protected. Birth of the seventh son holding the discus, the conch-shell, the mace, and the lotus, on the 12th of the wane in Bhádra. The child transferred to the house of Nanda, whose new-born daughter is brought and kept in its place. Kañsa clips the nose of the female child, and destroys her. Krishna's

career at Vrindávana, destroying various demons (as described in the Bhagavata Purána). Krishṇa and Balaráma return to Mathurá, destroy various demons, and then Kañsa, instal Ugrasena as king, and marry Reváti and Satyabhámá, the two daughters of Suketa, king of Rajatádri. Jarásandha avenges the murder of his relative Kañsa, and overthrows the two brothers.

XXXVIII.—XL. Birth of Arishṭanemi, (details similar to what have been given about the birth of Rishabha and other Jinas) The flight of the Yádavas from Mathurá they are chased by Jarásandha as far as the Vindhyan chain.

XLI.—XLIV. Yádavas build Dvárká and settle there. Account of Nárada, his power of travelling in the sky. Krishṇa marries Rukmiṇí, Satyabhámá and others. Balaráma's marriage with Revatí, Sitá, Varudhavatí, Rájívanetrá and others.

XLV.—XLVI. Account of the Kauravas and the Páṇḍavas as in the Mahábhárata, diversified by many new incidents, and names of places and circumstantial details changed.

XLVII.—LII. Pradyumna's amours. Sámba's birth. Account of the descendants of Balaráma and Krishṇa in great detail. Jarásandha assails Krishṇa. A great war follows, in which Jarásandha is killed by Krishṇa. Account of Durgá and her redemption by Jain worship. Conversion of the Kauravas and Karṇa to Jainism.

LIII.—LIV. Wars of Krishṇa in the southern peninsula. Rape of Draupadí by Padmanátha, a king who lived beyond the ocean. Her rescue by her husband, aided by Balaráma and Krishṇa.

LV.—VI. Marriage of Aniruddha with Ushá. Krishṇa's picnic on the Raivata Hill. Ascetic feeling of Nemí. His adoration by Indra and other gods. His departure for Giriraja for penance. His meditations. Various kinds of pain to which created beings are subject; their character, and the means of overcoming them. Meditation of Raudra. Meditation of Dharma. The waves of worldly inclinations. Pure meditation of two kinds, conscious and unconscious, their differences.

LVII. The different places fit for Jinas. Lectures of Jina to Varadatta and other Yádavas. Nine kinds of speech of the Jina. Origin of creation. Eternity, soul, delusion, self, and true knowledge. The seven conditions of beings. Sentient, and non-sentient objects—their distinctions and classification. Relation of the body to the soul. Yogas of

ous kinds. Works, their distinctions, number &c. Duties of house-ders. Do. of hermits. Mental functions—how well directed, and how verted. Virtue and vice. Penance, its distinctions. Suppression of orldly pain and destruction of bondage. Emancipation. The Yádavas ving heard these lectures retire to their homes.

LIX.—LXVI. The Vihára of Nemi. Nemi's peregrinations and eachings in different parts of India. The elders of Krishṇa become sciples of Nemi. Nemi describes to Satyabhámá, Rukmiṇí and others eir former lives. He relates to Krishṇa the history of all Jinas both st and future, their birth, career and nirváṇa. The destruction of the ádava race by the curse of Dvaipáyana. The Yádavas and Dvárká rnt down. Jarasuna, a Yádava, retires from Dvárká to the south. alaráma and Krishṇa, overwhelmed by grief, retire to south Mathurá. ere, while resting under a tree, Krishṇa is shot in the foot with an row. Account of Jarasunu *alias* Jarakumára. Balaráma's grief. ṇḍavas hear of the sad news. Funeral of Krishṇa. Baladeva comes a hermit. The Pandavas accept asceticism, their nirváṇa. e nirváṇa of Nemí.

Beginning सिद्धं ध्रौव्यव्ययोत्पादलक्षणं द्रव्यसाधनं ।
जैनं द्रव्याद्यपेक्षातः साधनाद्यथ शासनं ॥
शुद्धज्ञानप्रकाशाय लोकालोकैकभानवे ।
नमः श्रीवर्द्धमानाय वर्द्धमानजिनेशिने ।
नमः सर्व्वविदे सर्व्वव्यवस्थानां विधायिने ।
कृतादिधर्म्मतीर्थाय वृषभाय स्वयम्भुवे ॥
येन तीर्थमभिव्यक्तं द्वितीयमजितार्थितं ।
अजिताय नमस्तस्मै जिनेशाय जितद्विषे ॥
— — — — — — — — — ॥

इत्थं साधुसहायोऽहमनातङ्कमनुद्धत ।
देहं काव्यमयं लोके करोमि स्थिरमात्मनः ॥
बद्धमूलं भुवि ख्यातं बहुशाखाविभूषितं ।
पुष्पपत्रफलं पूतं कल्पवृक्षसमं परं ॥
अरिष्टनेमिनाथस्य चरितेनोद्धलीकृतं ।
पुराणं हरिवंशाख्यं ख्यापयामि मनोहरं ॥

द्युमणिद्योतनं द्योतं द्योतयन्ति यथाणवः ।
मणिप्रदीपखद्योतविद्युतोऽपि यथातथं ॥
द्योतितस्य तथा तस्य पुराणस्य महात्मभिः ।
द्योतने वर्त्ततऽस्मिन्वा मादृशोऽप्यनुरूपतः ॥
विप्रकृष्टमपि ह्यर्थं मोकुमार्य्ययुतं मनः ।
सूरिसूर्य्यकृतालोकं लोकच्चूरिवेक्षते ॥
पञ्चधा प्रविभक्तार्थं चेत्रादिप्रविभागतः ।
प्रमाणमागमाख्यं तत् प्रमाणपुरुषादितः ॥
तथा हि मूलतन्त्रस्य कर्त्ता तीर्थकरः स्मृतः ( स्वयं ) ।
ततोऽप्युत्तरतन्त्रस्य गौतमाख्यो गणाग्रणीः ॥
उत्तरोत्तरतन्त्रस्य कर्त्तारो बहवः क्रमात् ।
प्रमाणं तेऽपि नः सर्वे + सर्वोक्तानुवादिनः ॥ इत्यादि ।

**End.** जयत्यजय्या जिनधर्म्मसन्ततिः प्रजासिह क्षेमसुभिक्षमस्तु ः । .
सुखाय भूयात् प्रतिवर्षवर्षणैः सुजातसस्या वसुधा सुधीरिणाम् ॥
शाकेष्वब्दशतेषु सप्तसु दिशं पञ्चोत्तरेषूत्तरां
पातीन्द्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणां ।
पूर्व्वां श्रीमदवन्तिभूभृति नृपे वत्सादिराजेऽपरां
सौर्य्याणामधिमण्डले जययुते वीरे वराहेऽवति ॥
कल्याणैः परिवर्द्धमानविपुलश्रीवर्द्धमाने पुरे
श्रीपार्श्वालयनन्नराजवसतौ पर्य्याप्तशेषः पुरा ।
पश्चाद्दोस्तटिकाप्रजाप्रजनितप्राज्यार्च्चनावर्च्चने
शान्तेः शान्तिगृहे जिनेश्वरचितो वंशो हरीणामयं ॥
व्युत्सृष्टापरसंघसन्ततिबृहत्पुन्नाटसंघान्वये
प्राप्तः श्रीजिनसेनसूरिकविना लाभाय बोधेः पुनः ।
दृष्टोऽयं हरिवंशपुण्यचरितः श्रीपार्श्वतः सर्व्वतो-
व्याप्ताशामुखमण्डलः स्थिरतरः स्थेयात् पृथिव्यां चिरं ॥

**Colophon.** इत्यरिष्टनेमिपुराणसङ्ग्रहे हरिवंशे जिनसेनाचार्य्यस्य कृतौ गुरुपादक्रमलक्षणो नाम षट्षष्टितमः सर्गः ॥ ६६ ॥ इति श्रीहरिवंशपुराणं समाप्तं । संवत् १८४१ । पौषमासे ।

**विषयः ।** १—२ सर्गे,—शास्त्रागमकथनं । भुवसेन-लोहाचार्य्यप्रभृतीनां पूर्व्वाचार्य्याणां नामकथनं । विदेहदेशीयाकुण्डग्रामकुलपराधिपतेः सिद्धार्थश्रीमहस्य पुत्रत्वेन जिनस्य जन्मादि-

कथनं। अथ सदेवस्य वासवस्य जिनाभिषेककरणविवरणं। जिनस्य वर्द्धमान इति नामकथनं। त्रिंशद्वर्षं वर्त्तमानस्य विगतस्पृहस्य तस्य वनगमनपुरःसरं द्वादशवर्षाणि यावत् तपस्यतो घातिसंघातविनाशानन्तरं केवलज्ञानप्राप्तिकथनं। अथ, षट्षष्टिदिवसान् मौनावलम्बेन विहरतस्तस्य राजगृहगमनकीर्त्तनं। ततो रत्नसिंहासनोपविष्टस्य जिनेन्द्रस्य समन्तात् इन्द्रादीनां देवानां कौण्डिन्यादीनां पण्डितानां सन्निष्ठानां दिगम्बराणां संयमपूर्व्वकमवस्थितिकथनं। अथ चन्दनाभिधाना चेटकराजकुमार्य्यपि धौतैकाम्बरसम्वीता भगवतः पुरःसरी बभूव। अत्रान्तरे, साधूनां, व्यन्तरलोकस्थितदेवानां, नागकुमाराणां, किन्नरगन्धर्व्वादीनाञ्च तत्र समागमवर्णनं। अथ गौतमनामा कश्चिद् भगवन्तं तीर्थार्थप्रकाशनाय अनुरुरोध। भगवानपि जिनधर्म्मार्थमुदाजहार। सर्व्वोद्देशेन यथा, संस्थानव्याख्या, समवायव्याख्या, आचाराङ्गतत्त्वार्थः, सूत्रकृततत्त्वार्थः, प्रज्ञप्तिहृदयं, ज्ञातृधर्म्मकथा, श्रावकाध्ययनार्थः, अन्तकृद्दशगोचरः, अनुत्तरदशार्थः, प्रश्नव्याकरणं, विपाकसूत्रार्थः। दृष्टिवादार्थ इत्यादि। ततः सर्व्वेषां जिनोधर्म्मग्रहणपुरःसरं स्वस्वस्थानगमनकथनं। मगधेषु जिनगृहावलीनिर्म्माणादिकीर्त्तनं। धर्म्मतीर्थप्रवर्त्तनञ्च।

३य सर्गे,—काशी-काञ्ची-द्रविड़-महाराष्ट्र-गान्धारादिषु सर्व्वेषु देशेषु जैनधर्म्मप्रचारकथनं। जिनमुखोद्गता मागधीभाषां कर्णपुटेन पिवतां लोकानां शान्तिवर्णनं। पञ्चशैलपुरापरनामधेये राजगृहे स्थितस्य जिनस्य ऐश्वर्य्यादिवर्णनं। अथैकदा सुरनरतिर्य्यक्प्रभृतीनां धर्म्मशुश्रूषया परितो भगवन्तमुपविष्टानां पुरस्तात् जिनस्य धर्म्मशासनकीर्त्तनं। तत्र सिद्धासिद्धभेदेन जीवस्य द्विविधत्वकथनं। अथ ज्ञानावरणस्य पञ्चविधस्य क्षयेण, दर्शनावरणस्य नवभेदस्य भेदेन, अष्टाविंशतिविधस्य मोहनीयस्य हानात्, चतुर्व्विधस्य आयुषः शेषशोषणेन, चत्वारिंशतो नामधेयस्य गोत्रद्वयस्य च नाशेन, पञ्चविधस्य अन्तरायकर्म्मणः विध्वंसेन च जीवस्य सिद्धत्वं भवति। अपि च सिद्धानां सम्यक्त्व-परमानन्त-केवलज्ञान-केवलदर्शनादिरूपाष्टविधगुणकथनादिकं। अथ मोहस्य उदय-नाशोपशमरूपावस्थात्रितयेण असिद्धोऽपि त्रिविध इतिनिरूपणं। असिद्धस्य हि मिथ्यादृष्टि-आसादन-सम्यङ्मिथ्यादृष्टि-संयतासंयत-प्रमत्तसंयत-अप्रमत्तसंयत-उपशान्तकषाय-सम्यक्दृष्टि-क्षीणकषायादिरूपगुणस्थाननिरूपणं। तत्र तत्र सुखदुःखप्राप्तिकारणकथनञ्च। पुनः भव्याभव्यभेदेन जीवानां द्वैविध्यकथनं। कुदृष्टिमायालोभप्रभृतीनां फलकथनं। मधुमांसादिवर्ज्जनेन सुमानुष्यप्राप्तिस्तथा कुकर्म्मभिः कुमानुष्यप्रापणञ्चेतिनिरूपणं। इन्द्रियनिग्रहफलकथनं। कन्दर्पैरश्लिष्टानां कन्दर्पनामकानां देवानां अभियोग्यत्वक्लिष्टत्वादिकथनं। सम्यग्दर्शनस्य दुर्लभत्वकथनपूर्व्वकं तदभाव एव संसारसागरनिमज्जनकारणमितिनिरूपणं। पूर्व्वोक्तसम्यक्त्व-परमानन्तादीनां कारणादिकथनं। संक्षेपेण सनत्कुमार-माहेन्द्र-शुक्र-महाशुक्रादिकल्पविवरणकीर्त्तनं। तत्र दिवस्थितानां गत्यादिकथनं। केषाञ्चित् पूर्व्वजन्माभ्यस्तषोडशकारणानां तीर्थकृतां जिनशासनानुष्ठानेन निर्व्वाणप्राप्तिकथनञ्च। अथ जितशत्रुनामकस्य श्रेणिकराजस्य पुरतो गौतमस्य हरिवंशविस्तारकीर्त्तनं।

• ४—६ सर्गे,—अलोकाकाशशब्दाभिधेयवचनं यथा,—"न लोकान्ते यतस्तस्मिन् जीवाजीवात्मकाः परं"। तत्र जीवपुद्गलयोरवस्थानाभावकथनं। एवं धर्म्माधर्म्मास्तिकादीनां तत्र गतिस्थानाद्यभावकथनञ्च। अथ अलोकाकाशमध्ये लोकस्य स्थितिकथनं। लोकशब्दनिर्व्वचनञ्च। लोकस्य वेत्रासन-मृदङ्गझल्लरीसदृशाकृतित्वकथनं। तत्र चतुर्द्दशरज्जुविभागादिकथनं। लोकस्य घन-वातादित्रिविधवायुपरिवेष्टितत्वनिरूपणं। वायूनां परिमाणादिकथनं। त्रिलोकसारोक्तक्रमेण अधोलोकसंस्थानवर्णनं। तत्र नरकादिवृत्तान्तकथनञ्च। तिर्य्यक्लोकवर्णनमुखेन द्वीपसागरदेशादिनिरूपणं तेषां संस्थानपरिमाणादिकीर्त्तनञ्च। ऊर्द्ध्वलोकवर्णनं। तत्र नक्षत्रलोकस्य तदितरज्योतिष्काणाञ्च धरातलात् दूरत्वादिनिरूपणं। सिद्धानां जीवानां निवासादिकथनञ्च।

७म सर्गे,—वर्णगन्धादिहीनो वर्त्तनालक्षणः काल इति कालस्वरूपकथनं। मुख्यगौणभेदेन तस्य द्वैविध्यनिरूपणं। अथ समयवृत्तीनां त्रैविध्यात् तथाविधस्य कालस्य त्रिविधत्वनिरूपणं। निश्वासोच्छ्वास-प्राणस्तोक-लवादीनां लक्षणकथनं। परमाणुलक्षणकथनं तथाहि,—आदिमध्यान्तहीनं विभागशून्यं अतीन्द्रियं मूर्त्तमपि अप्रदेशं परमाणुं जानीयादिति। स्वल्पाकाशस्य षड्भिरंशैर्जातत्वात् तस्य षडंशत्वकथनं। तथा वर्ण-गन्ध-रस-स्पर्शैः पूरणं गलनञ्च कुर्व्वन्तीति परमाणूनां पुद्गलाभिधानत्वकथनञ्च। ततः संज्ञा-त्रुटि-रेणु-वालाग्र-यूका-यव-अङ्गुल्यादिमानलक्षणकथनं। एवं कल्पपल्यसागरोपमादीनां लक्षणादिकथनं। यत्र क्रमेण वस्तूनां शक्तिरवसर्पति सा अवसर्पिणी, तदन्यथा तु उत्सर्पिणी। तयोः लक्षणकथनपूर्व्वकं तत्र प्रत्येकं षट्कालसमत्वनिरूपणं। तत्र अवसर्पिण्यामनुलोमेन षट्समत्वनिरूपणं, यथा,—सुखमा, सुखमा, सुखमा, दुःखमा, सुखमा, सुखमा, दुःखमा, दुःखमा, अतिदुःखमा चेति। एतद्विलोमेन च उत्सर्पिण्यामूहनीयं। अथ प्रथमेषु त्रिषु सुखमासुखमादिषु कालेषु भारतभूमेः कल्पवृक्षभूषितत्व भोगभूमित्वादिकथनञ्च। ततोऽतीते सुखकारणे कालद्वये गङ्गासिन्ध्वोर्मध्ये दक्षिणभारते कुलकराणामुत्पत्तिकथनं। तत्र प्रथमतः प्रतिश्रुतिनामधेयस्य कुलकरस्य राज्यशासनविवरणकथनं। ततस्तत्पुत्रस्य सम्मतिनामकस्य कुलकरस्य विवरणकथनं। एवं क्रमेण क्षेमङ्कर-क्षमन्धर-सीमङ्कर-यथार्थ-विपुलवाहन-चक्षुष्मत्-यशस्वि-अभिचन्द्र-मरुदेव-प्रसेनजित्-नाभिकानां चतुर्द्दशकुलकराणामुत्पत्त्यादिकथनं।

८ म सर्गे,—ऋषभस्य जन्मादिकथनं। तत्र, पुरा किल दक्षिणभारते नाभिर्नाम नरपतिरासीत्। तस्य हि मरुदेवीति नाम्ना सुलक्षणा धर्म्मपत्नी बभूव। अथास्या गर्भे भगवान् ऋषभदेवो जनिष्यति तदधुना सेव्यतामेषा भवतीभिरितिपाकशासनशासनेन श्रीशचीप्रभृतिभिः सुरसुन्दरीभिः सादरं सेव्यमाना मरुदेवी 'भगवान् जिनदेवो वृषरूपेण तदुदरे मुखवर्त्मना प्रविवेशेति' शुभस्वप्नदर्शनेन नितरामानन्दिता प्राप्ते काले जिनदेवं प्रसुषुवे। अथ सुरासुरनरकिन्नरगन्धर्व्वादयः सर्व्वे तमाद्यं तीर्थङ्करमवलोकयितुकामास्तत्र समाजग्मुः। यतो हि प्रागेव सुरासुरादिजगत्त्रयं साकमितं तत्र तत आरभ्य तत्पुरं साकेतमिति समाख्यां प्राप। अथ भर्त्तारादेशेन पर-

न्द्रसुन्दरी देवमायया सूतिकागारं प्रविश्य शिशुमन्यं तत्र सुखसुप्तं निधाय च ततो जिनदेवं सुमेरुशिखरदेशं निन्ये। सुरपतिरपि सार्द्धं सुरासुरनिकरैः तत्र भगवतो जन्माभिषेकं विधाय वज्रसूचिना कर्णयोः रन्ध्रं सम्पाद्य च रत्नकुण्डलाभ्यामलञ्चकार। अथ भगवन्तं ऋषभेति नाम्ना-सम्बोधयन्तस्ते हिरण्यगर्भ-प्रजापति-स्वयम्भू-प्रभृतिभगवन्नामनिर्व्वचनमुखेन तं तुष्टुवुः। समनन्तरञ्च पौलोमी लोमाञ्चितशरीरा स्वाङ्कमारोप्य जिनदेवं पुनरेव अयोध्यानगरीमानीय च सद्य एव शिशुप्रदानेन तत्पितरौ नितरामानन्दसरसीषु निमज्जयाञ्चकार।

९ सर्ग.—अथ भगवान् शक्रेण कराङ्गुष्ठे निषक्तं पीयूषं पिबन् प्रतिदिनं बालचन्द्र इव उपचीयमानो समं समवयस्कैः बाल्यक्रीडारसमनुबभूव। अनन्तरञ्च उद्भिद्यमानयौवनकुसुमोऽसौ नन्दा-सुनन्दाभिधानस्य कन्यायुगलस्य पाणिपीडनमकरोत्। अथ नन्दा, नन्दनं भरतनामकं सुतामपि ब्राह्मीनामिकां युग्ममसूत। असूत च सुनन्दापि महाबलं सुतं सुतामपि लोकसुन्दरीं। अथ नन्दायाम् अष्टनवतिसंख्यामिताः पुत्रा वृषभसेनादयः क्रमेणाजायन्त। ततो नाभेयस्य भगवतः प्रजानां दुरवस्थादर्शनेन जातकरुणस्य क्षतत्राणेन, वाणिज्येन, शिल्पादिसम्बन्धेन च क्रमेण क्षत्रिय-वैश्यशूद्ररूपत्रिविधवर्णविभागकरणकथनं। अथैकदा नृत्यन्तीं नीलाञ्जनाभिधा-नामिन्द्रनर्त्तकीं पश्यतो नाभेयस्य वैराग्योत्पत्त्यनन्तरं देवैः प्रबोधितस्य तस्य शक्रादिवाह्यशिबिकया सिद्धार्थवनगमनकथनं। ततः प्रयागक्षेत्रगमनपूर्व्वकं केशोत्खातकरणकथनं। अथ ध्यानस्थं जिनदेवं परितः स्थितानां क्षत्रियाणां कृतसमाधितया भगवदभिप्रायमजानतामत एव नग्नानां देववाणीश्रवणेन कुश-चीरवल्कलधारणवृत्तान्तकथनं। अथ षण्मासान् यावद्-कृतानाहारस्य नग्नस्य जिनदेवस्य पृथ्वीभ्रमणवृत्तान्तकथनं। अनन्तरमेकदा राज्ञः सोमप्रभस्य गृहे समुपस्थिताय जिनाय तेन राज्ञा इक्षुरसपूर्णः कलसो दत्त इत्यनेन दानतीर्थकरोत्पत्तिकथनं। अथ प्रतिग्रहः, स्थानस्थापनं, पादप्रक्षालनं' पूजनं, प्रणतिः, मनःशुद्धिः, वाक्यशुद्धिः, कायशुद्धिः, एषणाशुद्धिश्चेति दानविधेः नवविधत्वकथनं। अथ एकदा प्रलम्बजटाभारो जिनदेवः पूर्व्वतालपुराधिपतेः वृषभसेनस्य सकटास्याभिधानके महोद्याने न्यग्रोधवृक्षस्याधः ध्यानयोगमास्थाय केवलज्ञानं लब्धवानिति वृत्तान्तकथनं। तत्र वृत्तान्तमिमसुपश्रुत्य समागतानां भरतादीनां जिनस्य आर्हन्त्यैश्वर्य्यमवलोकयतां प्रव्रज्यादिग्रहणविवरणकथनञ्च।

१० सर्ग—जिनस्य धर्म्मदेशनाकीर्त्तनं। तत्र दया, सत्यं, अस्तेयं, ब्रह्मचर्य्यं, अमोहता, पञ्चैतानि सूक्ष्मतया यतिधर्म्म इति स्थूलतया च गृहस्थधर्म्म इति निरूपणं। उक्तविधधर्म्मानुष्ठानेन च मोक्षो भवति। एतल्लक्षणो धर्म्मश्च श्रुतज्ञानात् जायते श्रुतज्ञानञ्च द्वादशाङ्गमिति-निरूपणं। तत्र अङ्गानि यथा,—पर्य्याय-अक्षर-पद-संघात-प्रतिपत्ति-अनुयोग-प्राभृतप्राभृत-प्राभृत-वस्तु-पूर्व्वाणि इत्यनेन श्रुतज्ञानविकल्पनिरूपणं। अत्र वर्णपदाद्यवान्तरभेदप्रपञ्चनञ्च। अथ पर्य्यायाङ्गे,—दृष्टिवादप्रदर्शनं। तत्र क्रियादृष्टिवादः तथाहि,—नियति-स्वभाव-काल-दैव-पौरुषैः स्पृष्टैः स्व-परनित्यानित्यैः योगे प्रत्येकं जीवाजीवादेः नवपदार्थस्य भेदाः विंशतिः। यथा,—

अस्ति स्वतो जीवो नियतितः, अस्ति परतो जीवो नियतितः, अस्ति नित्यो जीवो नियतितः, अस्ति अनित्यो जीवो नियतितः, अस्ति स्वतो जीवः स्वभावतः, अस्ति परतो जीवः स्वभावत इत्यादिना। एवमजीवाद्यष्टपदार्थेषु योज्यं। अनेन प्रकारेण १८० भेदा भवन्ति। एवं स्वतः-परयुक्तैः नियत्यादिपञ्चकैः योगे जीवादीनि सप्ततत्त्वानि ७० सप्ततिसंख्यकानि भवन्ति। पुनः स्वतः-नियतिकालाभ्यां गुणितानि तत्त्वानि १४ चतुर्दश। इत्यनेन ८४ भेदाः भवन्ति। अतो नास्तियुक्तैः पूर्व्ववदुक्तैः ८४ भेदाः। यथा,—नास्ति स्वतो जीवो नियतितः, नास्ति परतो जीवो नियतित इत्यादीनि। एवं अजीवादिषु षट्सु तत्त्वेष्वपि योज्यं। इत्यनेन क्रियावाद-दृष्टिप्रदर्शनपूर्व्वकं त्रिषष्टिविधक्रियावाददृष्टिनिरूपणं। तथाहि,—स्यादस्ति जीव, स्यान्नास्ति जीव इत्यादिसप्तभङ्गैः गुणनीया नवपदार्थाः ६३। अथ अज्ञानिकदृष्टिवादस्य त्रिषष्टिभेदकथनं। तथाहि,—सज्जीवभाववित्, असज्जीवभाववित्, सदसज्जीवभाववित्। अवक्तव्यजीववित्, सद-वक्तव्यजीववित्, असदवक्तव्यजीववित्, सदसदवक्तव्यजीवविदिति। एवमजीवादिषु ऊहनीयं। विनयदृष्टिवादस्य ३२ द्वात्रिंशद्भेदा भवन्ति यथा,—मनो-वचन-काय-दानरूपैश्चतुर्भिः प्रकारैः जनक-जननी-देव-नृपति-ज्ञाति-बाल-वृद्ध-तपस्विषु विनयः कार्य्य इति। तथा परिकर्म्म, सूत्रं, अनुयोगः, पूर्व्वगतं, चूलिका चेति परिकर्म्मादिभेदकथनपूर्व्वकं चन्द्र-सूर्य्य-जम्बूद्वीप-द्वीपसागर-व्याख्यारूपपञ्चप्रज्ञप्तिनिरूपणञ्च। एवमक्षर-पदादिनिरूपणं। सर्व्वेषां श्रोतृणां श्राव-कधर्म्मदीक्षाकथनञ्च।

११—१२ सर्गौ,—जिनपुत्रस्य भरतस्य दिग्विजयवर्णनं। तत्र गङ्गासागरप्रदेश-दाक्षिणा-त्य-सिन्धुदेश-हिमालय-वृषभगिरि-म्लेच्छदेशविजयादिकथनं। म्लेच्छराजादीनां भरताय कन्यो-पहारदानकथनं। अथ भरतस्य आदेशेन तद्भ्रातृणां स्वस्वराज्यत्यागानन्तरं प्रपन्नजिनदेवशर-णानां तेषां प्रव्रज्यादिग्रहणकथनं। भरतस्य ऐश्वर्य्यादिवर्णनञ्च। भरतमित्रस्य हास्तिनपुराधिपतेः जयाभिधानस्य सभार्य्यस्य पूर्व्वजन्मवृत्तान्तस्मरणविवरणकथनं। अथ सभार्य्यस्य जयस्य जिनशा-सनश्रवणानन्तरं प्रव्रज्याग्रहणकथनं। वृषभसेन-दृढरथ-कुम्भ-शत्रुमदन-देवशर्म्म-गणधर-धनदेव-नन्दनप्रभृतीनां चतुरशीतिसंख्यकानां गणिमनुजानां नामकथनं। तेष्वाद्यो वृषभापरनामधेयो भग-वान् जिनदेव इति कथनं। अथैकदा गणिगणवेष्टितस्य भगवतो जिनस्य कैलासगिरिगमनपू-र्व्वकं परिजनलोकं शोकसागरनिमग्नं विधाय सिद्धस्थानगमनवृत्तान्तकथनं। तत्र हि देवतादयः सर्व्वे गन्धपुष्पधूपादिभिः भगवद्देहं पूजयामासुरितिविवरणकथनञ्च। अथ भरतः स्वसुतमादित्य-यशसं राजपदे अभिषिच्य जैनदीक्षां जग्राहेतिविवरणकथनं। तत आदित्ययशाः स्वपुत्रं यशः-श्रुतिं राजपदाभिषिक्तं विधाय जैनशास्त्रमानुष्ठानेन निर्व्वृतिमधिजगामेतिकथनं। एवं क्रमेण बल-सुबल-महाबल-अतिबल-अमृतबलप्रभृतीनामादित्यवंशीयानां सुतन्यस्तराज्यभाराणां चतु-र्द्दशलक्षसंख्यकानां निर्व्वाणप्राप्तिकथनं। अथ बाहुबलनामकस्य जिनकुमारस्य सोमयशा नाम पुत्र आसीत्। स च सोमवंशस्य प्रवर्त्तको बभूव इति कथनं। तत्र सोमयशसः पुत्रो महाबलः

ततः सुबलः, ततो भुजबलः। एवमाद्याः पञ्चाशत्कोटिलक्षसंख्यकाः सोमवंशीया निर्व्वाणं ययुरितिकथनं। तथैवमृषादीनां कौरवाणां निर्व्वाणप्राप्तिकथनं। एवं नाभेयवंशीयखेचरनाथ-रत्नवज्र-रत्नरथप्रभृतीनां निर्व्वाणप्राप्तिकीर्त्तनं। अथ सगराभिधानस्य चक्रिणः षष्टिसहस्राणि पुत्राः समजायन्त। ते खलु दम्भेन क्षितिं भिन्दानाः कुपितेन नागराजेन भस्मीकृताश्चेति निशम्य सगरस्य जैनदीक्षया मोक्षप्राप्तिकथनं। सगरस्य अपरः पुत्रः सम्भवनाथो नाम, तत्पुत्रः अभिनन्दनः, ततः सुमतिनाथः, ततः पद्मप्रभः, ततः सुपार्श्वो नाम जिनेन्द्रः, ततः चन्द्रप्रभः, ततः पुष्पदन्तः, ततः शीतल इत्यनेन इक्ष्वाकुवंशवर्णनं।

१४ सर्ग,—वत्सदेशे कौशाम्बी नाम नगरी आसीत्। तत्र सुमुखो नाम नरपतिर्बभूव। अथैकदा वसन्तसमयेऽसौ करिणमारुह्य कालिन्दीपुलिनोद्यानं प्रविवेश। तत्र हि वसन्तोत्सवे कामिनीमेकां सर्व्वावयवसुन्दरीं निरीक्ष्य, अवरोधवत्त्वेऽपि सोऽयं तया विना हृदयेन शून्य इवाभूत्। अथ विदितवृत्तान्तेन मन्त्रिणा वनमालाभिधानया तया सह राज्ञः समागमः कारित इति विवरणकथनं। तयोः हरिरितिसमाख्यानः पुत्रो बभूव अस्य च महागिरिर्नाम पुत्रोऽभूत्। ततो हिमगिरिः, ततः सुनयः, इत्यादिना हरिवंशोत्पत्तिवर्णनञ्च।

१५—१७ सर्ग,—हरिवंशीयसुमित्रसमाख्यानस्य राज्ञो महिष्याः पद्मावत्याः [illegible]भस्वप्नदर्शनफलाभ्यकीर्त्तनं। अथ तद्गर्भे (माघशुक्लद्वादश्यां श्रवणानक्षत्रे) जिनेन्द्रस्य जन्म[illegible]न्तकथनं। अथ पुरन्दरप्रमुखैः वृन्दारकवृन्दैः कुशाग्रपुरापरनामधेयं राजगृहं परीत्य जिनदेवं प्रणम्य च सुरसुन्दरीभिः तं कुमारमैरावत्यां समारोप्य गिरिराजाधित्यकायां सिंहासने कृताभिषेकं पुनरेव जननीशुभाङ्कमारोप्य च मुनिसुव्रतेति नाम्ना शिशुरमावाहूत इति विवरणकथनं। अथ कुमारः सुरकुमारकनिकरैः संसेव्यमानः सुकुमारके कैशोरे वयसि वर्त्तमानोऽसौ रमणीरत्नेन समलङ्कृतोऽप्येकदा नभसि समुदितं जलधरमवलोक्य नितरामानन्दसन्दोहमधिगच्छन्नेव प्रचण्डतरमारुतवेगेन विलीयमानं तमाकलय्यैवमचिन्तयत्। अहो जलधरोऽसौ कालकवलितानां लोकानां शरीरायुरादीनां विनश्वरताम् प्रदर्शयन् उपदिशन्निव मामेवं कथमस्तमधिययाविति। अथैवं निर्व्विद्यमानोऽसौ सुव्रतनामकं स्वतनयं राज्याभिषिक्तं विधाय विगतस्पृहतया सम्यक् समाधौ निरतो बभूव। अथैकदा षष्ठदिनानि यावत् कृतोपवासोऽसौ भिक्षार्थे बहिर्जगाम। अथ राजगृहनिवासी वृषभदत्तनामा कश्चित् तस्मै भिक्षां प्रददौ। अस्मिन्नेव समये पुष्पवृष्ट्यादिरूपपञ्चकल्याणवर्णनं। मुनिसुव्रतस्य देहत्यागकथनञ्च। अथ सुव्रतस्तु दक्षनामानं स्वतनयं राज्याभिषिक्तं विधाय निर्व्वाणं प्राप। अथ दक्षः स्वपत्न्यामिलायां ऐलेयाख्यं पुत्रं मनोहरीनामिकां तनयाञ्च अजीजनत्। अनन्तरमेकदा दक्षः प्रजापतिः नवयौवनां मनोहरीं वीक्ष्य विक्षिप्तहृदयतया तामुपयेमे। इलापि रोषकषायितेक्षणा तत्क्षणमेव ऐलेयेन सह दुर्गप्रदेशाभिमुखं प्रजगाम। अथ ऐलेयेन नर्म्मदातीरे माहिष्मतीं नाम्ना नगरीं निर्म्माय कुणिमनामानं पुत्रं राजपदे प्रतिष्ठाप्य तपस्यार्थे वनं विवेश। अथ कुणिमोऽपि वरदातीरे कुण्डिनाख्यं पुरं संस्थाप्य पुलोमनामके सुते

राज्यभारं निधाय तपश्चरणार्थं वनवासी बभूव। अथ तत्पुत्राभ्यां पौलोम-चरमाख्याभ्यां रेवातीरे इन्द्रपुरसंस्थापनकथनं। पौलोमपुत्रेण महीदत्तेन कुल्लपुरसंस्थापनकथनं। ततः क्रमेण मत्स्य-अयोधन-माल-सूर्य्य-देवदत्तानां वृत्तान्तकथनं। देवदत्तपुत्रस्य मिथिलानाथस्य विदेहाधिपत्वकथनं। ततो मिथिलानाथपुत्रादीनां हरिषेण-शङ्ख-अभिचन्द्रादीनां विवरणकथनं। अथ अभिचन्द्रस्य वसुनामा पुत्रो बभूव। तत्पुत्राणां वृहद्वसु-महावसुप्रभृतीनां दशवसूनां विवरणकथनं। क्षीरकदम्बनामकस्य वेदविदुषः वसु-नारद-पर्व्वताभिधानाः त्रयः शिष्या अभवन्। तेषु पर्व्वतोऽसौ क्षीरकदम्बस्य पुत्र आसीत्। अथैकदा वसुराजसभायां नारदपर्व्वतयोः शास्त्रार्थः संवृत्तः, तत्र नारदेन कर्म्मकाण्डीयवेदभागस्य निन्दितत्वे समर्थिते पराजयं प्रापिते च पर्व्वते वसुराजस्य पर्व्वतपक्षपातित्वेन तत्क्षणमेवाधःपतनवृत्तान्तकीर्त्तनञ्च।

१८, १९ सर्गे,—अथ मथुराधिपस्य यदोरुत्पत्त्यादिकथनं। ततः सूरस्य सुवीरस्य च उत्पत्तिकथनं। अथ सूरात् अन्धकवृष्ण्यादीनामुद्भवकथनं। सुवीराच्च भोजकवृष्ण्यादीनामुत्पत्तिकथनं। अन्धकवृष्णेः समुद्रविजय-वसुदेवादिदशपुत्रकथनं। कुन्तीमद्राभिधानकन्याद्वयजन्मकथनञ्च। भोजकवृष्णेस्तु उग्रसेन-महासेनप्रभृतयः पुत्रा बभूवुरितिकथनं। अथ सुवसोर्वंशे जरासन्धस्य जन्मकथनं। तत्पुत्राणां कालयवनादीनां जन्मकथनादिकं। अथ सुप्रतिष्ठनामकेन मुनीश्वरेण राजगृहोपस्थितानां देवानां वृष्णीनाञ्च पुरतः नमिभाषितधर्म्मदेशनाकथनं। तथाहि,—अहिंसा, सत्यभाषणं, अस्तेयं, ब्रह्मचर्य्यं निर्म्मूर्च्छा चेति पञ्चधा साधूनां महाव्रतानि। कायिकादिभेदेन त्रिविधगुप्तिकथनं। सर्व्वानिष्टप्रत्याख्यानरूपसमितिकथनं। देशतो हिंसादिनिवृत्तिरूपाणुव्रतकथनं। दिग्देशानर्थदण्डेभ्यो निवृत्तिरूपगुणव्रतकथनं। अतिथिपूजादिरूपव्रतकथनं। मांस-मद्य-मधु-द्यूत-वेश्यादित्यागरूपनियमकथनं। व्रतादीन्येतानि गृहिणामभ्युदयसाधनानीति निरूपणञ्च। तथा अनन्तभेदा जीवाः कर्म्मवशात् कुयोन्यादिषु जायन्ते इति कथनं। अथ पृथिवीसलिलादिषु जीवविभागसंख्यादिनिरूपणं। एकेन्द्रियादिपञ्चेन्द्रियपर्य्यन्त जीवानां शरीरायुःप्रमाणादिकथनं। अन्धकवृष्णेः पूर्व्वजन्मवृत्तान्तकथनं। वसुदेवादीनां पूर्व्वजन्मकथनं। ततः अन्धकवृष्णिः समुद्रविजयाय राज्याभिषेकं वसुदेवञ्च समर्प्य सुप्रतिष्ठस्य अन्तेवासी बभूव। तथा-भोजकवृष्णिरपि मथुरायामुग्रसेनमभिषिच्य विधाय निर्ग्रन्थव्रत जग्राहेतिविवरणकथनं। अथैकदा वसुदेवः समुद्रविजयस्य आदेशेन रमणीयोद्याने वसन् ततोऽन्यत्र निर्गमनमभिलाषोऽसौ तत्रागतां समालम्भनहस्ताम् कुब्जामेकां खलीकृत्य जहार। अथ 'कुमारचेष्टितैरीदृशैरेव त्वं बन्धनागारमीदृशं प्राप्तोऽसीति' साधिक्षेपं कुब्जया अवधीरितोऽसौ वचनमात्मनो विज्ञाय स्वपं प्रति वीतश्रद्धतया नगरात् निष्क्रम्य श्मशाने मृतकमेकं निजालङ्करणैरलङ्कृत्य च चितामध्ये तं निक्षिप्यैवमुवाच 'आर्य्यस्तातमसौ राजा पौराः सुखं जीवन्तु अहमद्य हुताशनं प्रविशामीति'। अथासौ छद्मनैवमग्निप्रवेशनं प्रदर्श्य ततो विजयखेटाख्यं पुरं प्रययौ। तत्र च स गन्धर्व्वविद्याप्रवीणस्य सुग्रीवेतिनामधेयस्य कस्यचित् क्षत्रियस्य कन्ययोः सोमा-विजयसेनाभिधानयोः पाणिग्रहणं कृत्वा

विजयसेनायामक्रूरनामानं पुत्रं जनयित्वा च ततो कस्याञ्चित् महाटव्यां प्रविवेश। अथासौ विद्याधरकुमारयुगलप्रयत्नेन ततः कुञ्जरावर्त्तनामधेयं विद्याधरनगरमगच्छत। तत्र च स श्यामाभिधानां विद्याधरकुमारीमुपयम्य कदाचित् तया समालिङ्गितोऽसौ अङ्गारकनामकेन केनचित् विद्याधरशत्रुणा हृतोऽपि आकाशमार्गात् भूमौ निपतन्नेव रूपलुब्धाभ्यां यक्षकुमारीभ्यां चम्पानगरीं निन्ये। तस्मिंश्च चारुदत्ताभिधानेन केनचित् मञ्जातसौहार्द्दोऽसौ गान्धर्व्वविद्यारहस्योद्घाटनेन गन्धर्व्वसेनानामधेयायाः राजकुमार्य्याः पाणिपीड़नमकरोत्।

२०, २१ सर्ग,—उज्जयिनीनाथस्य श्रीधर्म्मराजस्य बलिः, बृहस्पतिः, नमुचिः, प्रह्लादश्चेति चत्वारो मन्त्रिण आसन। अथासौ राजा सार्द्धं सचिवसङ्घेन आकम्पनादीन् जैनमुनीन द्रष्टुमना नगरबहिरुद्यानमाययौ। तत्र च तेषां संसर्गेण निर्व्वेदमापन्नः पद्मनामकं स्वतनयं राजपदप्रतिष्ठितं विधाय विष्णुकुमारनामकात् जैनमुनेर्दीक्षां जग्राह। अनन्तरमेकदा राजसिंहासनस्थितस्य पद्मस्य चित्तानुवर्त्तनेन प्रसादमापन्नस्य च 'सप्ताहं यावत् त्वं राज्येश्वरो भवेति' बलये वरदानपूर्व्वकमेकान्तस्थितस्य तस्य पुरतो बलिविप्रकृतैराकम्पनाचार्य्यादिभिः संप्रार्थितो विष्णुकुमार आजगाम। आगत्य च स बलिविचेष्टितं तस्मै निवेदयन् तस्यैवादेशेन बलिं सभाजयितुं हस्तिनागपुरं प्रति प्रचचाल। तत्र हि स बहुशोऽभ्यर्थनया मुनीनामवस्थानाय बलेः सकाशात पादत्रयमितां भूमिं लब्ध्वा 'पापं पश्य मे पादत्रयं' इति व्याहरन्नेव महाकायतया ज्योतिश्चक्रमास्पृशन् पादेनैकेन मेरुं द्वितीयेन च मानुषोत्तरप्रदेशमाक्रम्य तृतीयस्यावकाशालाभात् प्रभावेणात्यर्थं क्षुभित इव बभौ। अथ सुरासुरप्रभृतिभिः सादरं प्रसाद्यमानोऽसौ शनैरेव महाकायं संहृत्य प्रकृतिमापेदे। अपि च तदनुज्ञया देवादयो बलिं बद्धा विनिगृह्य च दुरात्मानं तं देशान्निर्व्वासयामासुः। इति प्रसङ्गेन विष्णुकुमारचरित्रवर्णनपुरःसरं विस्तरेण चारुदत्तचरित्रकथनं। तत्र गणिकाकलिङ्गसेनादुहितुः वसन्तसेनाया विवरणादिकथनञ्च।

२२—२४ सर्ग,—अथैकदा फाल्गुनोत्सवे गन्धर्व्वसेनया सह वसुदेवस्य पार्श्वजिनेन्द्रप्रतिमापूजनाय तन्मन्दिरप्रवेशकाले स्तुवन्तीं कामपि नीलोत्पलदलश्यामां कन्यां पश्यतो मनोविकारदर्शनेन ईर्ष्याकलुषितहृदया गन्धर्व्वसेना त्वरितं द्वारान्तरेण तं जिनेन्द्रसन्निधिं नीत्वा तेन सह स्तोत्रावल्या भगवन्तं तुष्टाव। अथ स्वगृहमागत्य पादपतनेन प्रियां प्रसादयतो वसुदेवस्य निकटे काचित् वृद्धा धरी, विद्या आजगाम। सा च दत्ताशीर्व्वादा कृतासनपरिग्रहा सती तमेवमाह राजन् श्रूयते चैवमायुष्मता यत् पुरा किल वृषभेश्वरो निजतनये भरते विन्यस्तराज्यभारः प्रव्रज्यां जग्राह। तदा खलु उग्रसेनाद्याः बहवो राजक्षत्रियाः तपसि निरता आसन्। तेषु नमि विनमिनामानावुभौ भ्रातरो जिनभक्तस्य पादयोः निरतावभूतां तेन हि अत्यर्थं प्रसादमभ्युगच्छन् जिनभक्तोऽसौ दित्यदित्यभिधानाभ्यां तयोः पत्नीभ्यां विद्याकोष प्रददौ। तत्र मनु-मानव-कौशिक-गैरिक-गान्धार-भूमितुण्ड-आदित्य-व्योमचर-मातङ्गप्रभृतयो विद्याचार्य्या इतिकथनं। किञ्च, गौरी-प्रज्ञप्ती-रोहिणी-अङ्गारिणी महागौरी-महाश्वेता-मायूरी कालमुखीप्रभृतीनां

विद्यानां नामकथनं। तथा,—दैत्य पन्नग-मातङ्गादिभेदेन अष्टौ विद्याधराः कथिताः, तत्र विद्यानां नाम्ना तेषां नामव्यपदेश इति कथनं। तथाहि गौरीणां गौरिक, कौशिकानां कौशिक इत्यादिना स्वयमूह्यं। तत्र विनमिकुलतिलकस्य मातङ्गाभिधानस्य विद्याधरपतेः गोत्रजाहं हिरण्यवती नाम। पार्श्वजिनेन्द्रदेवस्य पूजावसरे या त्वयायुष्मता अवलोकितपूर्व्वा नीलयशा नाम नर्त्तकी, सा हि मदङ्कलालितेति तस्यां प्रीतिर्मे नितरामस्ति। अथेयं भवद्दर्शनादारभ्य शून्येव हृदयेन परित्यक्तपानाशना सततमेव पुरतः स्फुरन्तं त्वामेव पश्यन्ती मदनेनातिभूमिं नीता। तदधुना दर्शनदानेन भवतैव कृतार्थीकर्त्तव्यस्तादृशो जन इत्युक्त्वा हिरण्यवती ततो निश्चक्राम। अथैकदा निशायां वेतालकन्यया अपहारितोऽसौ वसुदेवो विद्याधरपुराधिष्ठितं श्रीमन्तं नाम गिरिवरं प्राप्य तत्र नीलयशसः पाणिग्रहणं विधाय च पौरजनप्रमुखात् तस्या जन्मादिविवरण शुश्राव। अथ नीलकण्ठरूपधारिणा नीलकण्ठाख्येन विद्याधरेण नीलयशोऽपहरणवृत्तान्तकीर्त्तन। दीनवेशेन वसुदेवस्य देशभ्रमणकथनं। अथ सोमश्रीतिनामिकया कयाचित् कन्यया सह वसुदेवस्य विवाहकथनप्रसङ्गेन सगरपुरोहितकृतमामुद्रिकशास्त्रागमविवरणकथन, तत्र विस्तरेण नराणां शुभाशुभलक्षणनिरूपण। अथ वसुदेवस्य तिलवस्तुपुरगमनपूर्व्वकं राक्षसवधानन्तरं पञ्चशत-कन्यापाणिग्रहणवृत्तान्तकथनं। ततस्तस्य वेदसामपुरगमनपुरःसरं कपिलश्रुतिनामकं राजानं निपात्य तत्कन्यायाः कपिलायाः पाणिग्रहणवर्णनं। तस्यां तस्य कपिलाभिधानपुत्रजननकथनञ्च। अथ वसुदेवस्य शाल्गुहापुरी-जयपुर भद्रिलपुर-इलावर्द्धनपुरगमनपूर्व्वकं तत्रत्याभिः राजकुमारीभिः सह विवाहवर्णनञ्च।

२५—२८, सर्ग,—अथ इलावर्द्धनपुरपुरन्दरे दधिमुखेन सह वसुदेवस्य संवादेन कौरवान्वयसम्भूतस्य कार्त्तवीर्य्यस्य कामधेनुनिमित्त जमदग्निनिपातनं, तथा परशुरामेण कार्त्तवीर्य्यनाशनादिविवरणकथनं। अथ परशुरामः (सप्तकृत्वः) निःक्षत्रियां पृथिवीमकरोदितिकथनञ्च। अत्रावसरे कार्त्तवीर्य्यार्ज्जुनसाध्वी अन्तर्व्वत्नी आसीत्, सा हि जामदग्न्यभयेन प्रपलाय्य कौशिकस्य मुनेराश्रमे सुभौमनामकं पुत्रमेकं सुषुवे। अथासौ सुभौमश्चक्रेण जामदग्न्यस्य शिरश्छित्त्वा एकविंशतिवारान्, अब्राह्मणां पृथिवीं चकारेतिवृत्तान्तकथनञ्च। मदनवेगया सह वसुदेवस्य विवाहवर्णनं। तस्यां तस्य अनाधृष्टिनामकपुत्रोत्पादनकथनं। अथ मदनवेगारूपधारिण्याः शूर्पनख्याः वसुदेवहरणपूर्व्वकमन्तरीक्षगमनं, ततो भस्त्रावतङ्कस्य तस्य परित्राणलाभानन्तरं कन्यापुरगमनपूर्व्वकं वेगवत्यभिधानया विद्याधरकुमार्य्या सह विवाहवर्णनञ्च। प्रसङ्गात् नमिवंशजातस्य विद्युद्दंष्ट्रस्य वृत्तान्तकथनं। विदेहनगरवास्तव्यस्य सञ्जयन्तमुनेश्चरितकीर्त्तनं। पुरा किल श्रावस्त्यामेणीपुत्राभिधानः क्षोणीपतिरभूत्। तस्य हि प्रियङ्गुसुन्दरीतिसमाख्याता सुलक्षणा कुमारी बभूव। अथ वसुदेवस्तस्याः पाणिग्रहणेच्छया तत्पुरीमभ्युपेत्य वाह्योद्याने अवस्थितिं चकार। तत्र हि तस्य केनचित् विप्रेण सह संवादेन मृगध्वजमहिषोपाख्यानकीर्त्तनप्रसङ्गात् अलकापुराधीशस्य चिवस्य हरिश्मश्रुनामधेयस्य नास्तिकेकाम्नवादिनो विवरणकथनञ्च।

१९—२२, सर्ग,—श्रावस्त्यां कामदेवगृहाख्यया प्रसिद्धस्य जैनमन्दिरस्य नामकारणकथनमुखेन कामदत्तनामकश्रेष्ठिस्थापितरतिकामप्रतिमावृत्तान्तकथनं। अथ कामदत्तान्वयजातस्य कामदेवनामकश्रेष्ठिनः सम्पूर्णपूर्णचन्द्रमुखी बन्धुमती नाम कन्यका आसीत्। वसुदेवोऽपि प्रत्यहं कामदेवगृहं प्रविश्य जिनेन्द्रमभ्यर्च्य सरतिं रतिवल्लभमपूपुजत्। अथ सन्तुष्टेन कामदेवेन तस्मै बन्धुमती समर्पितेतिवार्त्तां राज्ञ एणीपुत्रस्य पुत्री निशम्य वसुदेवसौन्दर्यामृतं निपीय च सितरामनुरक्तेयं तत्पित्रा वसुदेवाय प्रदत्तेतिविवरणकथनं। एणीपुत्रस्य जन्मादिवृत्तान्तकीर्त्तनञ्च। गन्धसमृद्धनगराधिपतेस्तनयया प्रभावत्या सार्द्धं वसुदेवस्य विवाहवर्णनं। अथ तस्य म्लेच्छराजसुताया जरायाः पाणिग्रहणपूर्व्वकं तस्यां जरत्कुमारनामकपुत्रोत्पादनकथनं। अथ अरिष्टपुरपुरन्दरस्य रुधिरस्य तनयाया रोहिण्याः स्वयम्बरसभां समुद्रविजयजरासन्धादयो बहवो राजानः समाजग्मुः। तत्र वसुदेवोऽपि भ्रातृलक्षितवेशस्तस्थौ। अथ रोहिणी तस्यैव कण्ठदेशे वरमाल्यं प्रददौ। अथ बहुभिः राजन्यवर्गैस्तथा समुद्रविजयेन च सह तस्य युद्धे जयलाभकथनं। ततो विजयो 'वसुदेवोऽयमिति' प्रत्यभिज्ञाय भ्रातृस्नेहात् तमालिलिङ्गेतिविवरणकथनं। अथ रोहिण्याः शरच्चन्द्रनिभपुत्र एकः समजायत, स च सुतरामभिरामतया राम इति समाख्यामाप। अथ वसुदेवस्य परिणीताभिः सर्व्वाभिः सार्द्धं साकेतनपुरीप्रत्यागमनमहोत्सववर्णनञ्च।

२३—२४,सर्ग,—अथैकदा धनुर्व्वेदविशारदैः स्वशिष्यैः कंसादिभि सह वसुदेवो जरासन्धदिदृक्षया राजगृहं जगाम। तत्र च यो हि सिंहपुरस्वामिनं सिंहरथं जीवग्राहं गृहीत्वा मां दर्शयिष्यति, तस्मै ईप्सितेन सार्द्धं देशेन सुतां मे दास्यामीति, घोषणां श्रुत्वा वसुदेवः कंसेन वीरपताकामग्राहयत्। कंसोऽपि गुरुशासनादेव सिंहरथं बद्ध्वा जरासन्धस्य पुरतस्समुपढौकयामास। अथ कंसस्य जन्मवृत्तान्तकथनं। तत्र कौशाम्बीवासिन्या मद्यकारिण्या कयाचित यमुनाप्रवाहे मञ्जूषाबद्धोऽयं प्राप्तः सुतनिर्व्विशेषेण प्रतिपालितश्चेतिकथनं। अथ जरासन्धः मञ्जूषां तामानाय्य तत्रोट्टङ्कितलिपिपाठेन पद्मावत्युग्रसेनयोः पुत्रोऽसाविति स्वभागिनेयाय तस्मै कन्यां जीवद्यशसं प्रददौ। अथ कंसोऽपि मथुरामभ्युपेत्य स्वपितरमुग्रसेनं कारागारे निक्षिप्य च राजपदप्रतिष्ठितोऽसौ वसुदेवमानीय स्वसारं देवकीं गुरुदक्षिणात्वेन तस्मै प्रायच्छत्। अथैकदा जरासन्धकुमारी जीवद्यशाः कंसमेवं प्राह मया अतिमुक्तकमुनेः प्रमुखात् श्रुतं देवक्या गर्भे यो हि भविता स खलु पत्युः पितुश्च ते मृत्युरिति। अथ निशम्यैतत् कंसेन वसुदेव प्रतार्य्य प्रसूतिसमये वासो देवक्या मद्गृहेऽस्त्विति वरः प्रार्थितः सोऽपि अविज्ञातवृत्तान्तस्तस्मै वरं प्रददौ। अथ देवकीवसुदेवाभ्यां कंसज्येष्ठस्य अतिमुक्तकमुनेराश्रमगमनपूर्व्वकं स्वावस्थानिवेदनं। तत्र उग्रसेनकंसादीनां जन्मादिविवरणकथनं। देवकीसमाश्वासनञ्च। तत्र देवक्याः सप्तमे गर्भे शङ्खपद्मगदाभिधारी जन्मग्रहणं विधाय कंसादीन् निहत्य च विशेषां क्षितिं भोक्ष्यतीतिकथनं। देवक्याः अन्येषां षण्णां पुत्राणां रामस्य च पूर्व्वजन्मवृत्तान्तकीर्त्तनं। तत्र नृपदत्त-देवपाल-अनीकदत्त अनीकपाल-शत्रुघ्न-जितशत्रुनामकदेवकीपुत्राणामकालमरणाभावकथनं। अथ जिनेन्द्रस्य अरिष्टनेमेश्चरितकथनप्रस्तावेन

महोपवासविधिकथनं। तत्र सर्व्वतोभद्रनामकतपोविधिनिरूपणं। अत्र हि उपवासाः ७५ + पारणाश्च २५एवं दिनानि मिलित्वा १००शतसंख्यकानि भवन्तीति ज्ञेयं। अथ महासर्व्वतोभद्रतपोविधिकथनं। अत्र हि उपवासाः १९६, पारणाश्च ४९। एवं दिनानि मिलित्वा १४५ पञ्चचत्वारिंशदुत्तरशतैकसंख्यकानीति। अथ त्रिलोकसारतपोविधिकथनं। अत्र उपवासाः ३०, पारणाश्च ११, एवं दिनानि मिलित्वा ४१ एकचत्वारिंशत्संख्यकानीति। एवं क्रमेण वज्रमध्यतपोविधिकथनं। मृदङ्गमध्यतपोविधिकथनं। मुरजमध्यतपोविधिकथनं। एकावलीतपोविधिः। द्विकावलीतपोविधिः। मुक्तावलीतपोविधिकथनं। रत्नावलीतपोविधिः। कनकावलीतपोविधिः। सिंहनिष्क्रीडिततपोविधानं। मेरुपंक्तिविधिः। विमानपंक्तिविधिः। (शा) शातकुम्भविधिकथनं। सप्तसप्तमतपोविधिः। तथा,—अष्टाष्टम-नवनवम-दशदशमद्वादशद्वात्रिंशत्तपोविधीनामां विधानकथनं। अथ एककल्याण-पञ्चकल्याण-पञ्चविंशतिकल्याणाभिधानानां तपसां भावनादिविधिकथनं। अथ भाद्रशुक्लसप्तम्यां परिनिर्व्वाणाख्यविधिकथनं। भाद्रकृष्णषष्ठ्यां सूर्य्यप्रभाख्यविधिः। तत्र त्रयोदश्यां चन्द्रप्रभनामकविधिकथनं। एवं कुमारसम्भव-सुकुमार-सर्व्वार्थसिद्धिप्रभृतीनां विधिकथनं। तथा,—जिनकथिते मोक्षमार्गे निःशङ्काद्यष्टगुणा श्रद्धा दर्शनविशुद्धिरित्याख्यायते. एतदनुष्ठानेन च तीर्थकरस्यैव प्रकृतिर्भवतीतिकथनं। ज्ञानादिषु ज्ञानादिवत्सु च कषायविनिवृत्त्या महान् आदरो विनयसम्पन्नतोच्यते। तथा शीलव्रतरक्षायाम् अनवद्या कायमनोवचनवृत्तिः, अनतिचाराभिधानः। तथा जन्म-जरा-मरणामय-मानस-शारीरदुःखसम्भारात् संसारात् भीरुत्वं संवेग इति कथ्यते। इत्थमेव प्रकारेण ज्ञानयोग-त्याग-मार्ग्यानुगावेश-समाधि-वैयावृत्य-वन्दनाप्रतिक्रमण-कायोत्सर्ग-मार्गप्रभावन-प्रवचनवत्सलतादिलक्षणकथनञ्च।

२५—२७,सर्गं,—अथ देवक्या युग्मपुत्रजनने देवानां तत्र मृतपुत्रयुग्मस्थापनपूर्व्वकं तत्पुत्रद्वयप्रच्छणानन्तरम् अलकागमनकथनं। कंसस्तु तन्मृतपुत्रद्वयं गृहीत्वा शिलातले ताडितवानितिकथनं। एवं वारत्रयेण देवक्याः षट्पुत्रजननं देवैश्च रक्षणं, कंसस्य तु मृतपुत्रस्य शिलातले मृतपुत्रताडनमिति विवरणकथनं। अथ देवक्याः सुस्वप्नदर्शनपूर्व्वकं गर्भधारणकथनं। भाद्रशुक्लद्वादश्यां शङ्खचक्रादिलक्षितस्य अधोक्षजस्य देवकीपुत्रत्वेन जन्मप्रपञ्चकथनं। अथ बलदेवः सपिता धृतातपत्रं कृष्णमङ्के निधाय दीप्तशृङ्गेण वृषभरूपधारिणा नगरदेवेन प्रदर्शितमार्गोऽसौ भगवत्प्रभावेण क्षीणप्रवाहां यमुनामुत्तीर्य्य नन्दालयमभ्युपेत्य च तत्कन्याप्रदानपूर्व्वकं तत्स्थाने श्रीकृष्णं संस्थाप्य त्वरितमेव मथुरामाजगामेति वृत्तान्तकीर्त्तनं। अथ कंसस्य देवक्याः सूतिकागारं प्रविश्य 'कदाचिदमुष्याः पतिररिर्मे भवे'दिति शङ्कया तां कन्यां समादाय नासिकाच्छेदनपूर्व्वकं ताडनवृत्तान्तकीर्त्तनं। अथ कृष्णस्य पूतनाशकटासुरवध-यमलार्ज्जुनभञ्जन-गोवर्द्धनधारणादिवृत्तान्तकथनं। अथैकदा देवक्या नन्दालयगमनपूर्व्वकं श्रीकृष्णदर्शनवृत्तान्तकथनं। अथ बलदेव-कृष्णाभ्यां मथुरागमनपुरःसरं केशि-गज-चाणूरमुष्टिकनिपातनवृत्तान्तकथनं। अथ कंसवधानन्तरं उग्रसेनाय राज्यदानवृत्तान्तकथनं। रजतादिनाथस्य सुकेतोः कन्याभ्यां रेवतीसत्यभामाभ्यां सह

रामकृष्णयोर्विवाहकथनं। अथ जरासन्धस्य दुहितृपरिदेवितेन अत्यर्थं सन्तप्तहृदयस्य रामकृष्ण-निधनार्थं कालयवनाभिधाननिजपुत्रप्रेरणं तथा अतुलमालावर्त्तनामकपर्व्वते रामकृष्णाभ्यां तस्य निधनवृत्तान्तकथनञ्च। अथ जरासन्धप्रेरितस्य तद्भ्रातुरपराजितस्य ताभ्यां पराजयकीर्त्तनं।

३८–४०, सर्गे,—अत्रावसरे कुबेरपत्न्याः शिवाया सुस्वप्नदर्शनादिवृत्तान्तकथनं। तद्गर्भे अरिष्टनेमिनामकस्य जिनेन्द्रस्य जन्मवृत्तान्तकथनं। पूर्व्ववत् पुरन्दरादिवृन्दारकवृन्दैरभ्यर्थितया पुरन्दरसुन्दर्य्या शिवातनयग्रहणपूर्व्वकं तेभ्यः समर्पणविवरणकथनं। अथ तेषां सुमेरुशिखरनी-तस्य शिशोरभिषेकनामकरणादिकरणविवरणकथनं। अथ गद्येन महेन्द्रकृतजिनेन्द्रस्तोत्रकथना-दिकञ्च। अथ जरासन्धः भ्रातुर्निधनवार्त्तां श्रुत्वा क्रोधेन ज्वलन्निव यदुकुलनिधनाय सार्द्धं चतु-रङ्गबलैः मथुरामुद्दिश्य प्रययौ। वृत्तान्तमिममाकलय्य तस्याजेयमिति मत्वा वृष्णिभोजयादवादयः सर्व्वे सार्द्धं प्रियजनैः वारुणीं दिशमुद्दिश्य गन्तुमारेभिरे। अथ जरासन्धोऽपि तेषामनुगामी बभूव। अथैकदा यादवादयः सर्व्वे विन्ध्यगिरिमुपान्तस्थितमासाद्य जरासन्धस्यानुवर्त्तनं निशम्य च युयुत्सया तं प्रत्यैक्षन्त। तदा खलु दैवनियोगेन भरतार्द्धनिवासिभिः दिव्यसामर्थ्यादेव बह्व्यश्चिता निर्म्मिताः। अत्रान्तरे समुपस्थितोऽसौ जरासन्धः ज्वालामालाभिर्दह्यमानमिव यादवबलं पश्यन् तत्रागतां वृद्धामेकामपृच्छत्। 'भद्रे विपुलः कस्यायं स्कन्धावारो दृश्यत इति। सा च यादवशिबि-रमेवमुवाच, देव श्रूयतां, राजगृहाधिपतेरमितप्रभावस्य जरासन्धस्य प्रभावेण सन्त्रस्तहृदयानां शान्त्यै सागरमाश्रितानामपि यादवानां तमासन्नवर्त्तिनं विज्ञाय सबलानां तेषां वह्निप्रविष्टानां चिताराजिरियं पुरतो दृश्यत इति। अथ निशम्य जरतीवाक्यमेवं विस्मितोऽसौ सह सुहृज्जनैः प्रतिनिवृत्य च राजगृहमाजगाम। अथ यादवोऽपि उपकण्ठमुदन्वतः कृतनिवेशना यथा सुखम-वतस्थिरे।

४१—४४, सर्गे,—द्वारकानिर्म्माणं। श्रीकृष्णस्य राजन्यवर्गकन्यापरिणयनकथनं। नेमिकुमार-संवर्द्धनविवरणं। नारदस्य द्वारवत्यामागमनकथनमुखेन तस्य जन्मविवरणकीर्त्तनं। तत्र शौर्य्य-पुरनिवासिन उञ्छवृत्तेः सुमित्राभिधेयस्य तापसस्य पुत्रोऽयं देवानामनुग्रहेण अष्टमे वर्षे सरहस्य-जिनागममधीत्य अधिगम्य च आकाशगामिनीं विद्यां साधुनिषेवया संयमासंयमं लेभे-इति वृत्तान्तकथनं। नारदस्योपदेशेन श्रीकृष्णस्य रुक्मिणीहरणविवरणकथनं। अथैकदा श्रीकृष्णेन रुक्मिणीमुखनिष्ठ्यूतं ताम्बूलमंशुकान्तेन संगोप्य ईर्षाकषायितायाः सत्यभामायाः शयनमन्दिरं-गतेन तेन तद्गन्धवस्त्विति' मुग्धा अपहरन्ती सेयं परिहसिता अपत्रपातिशयेन रूपिणीं देवता-मिव रुक्मिणीं निरूप्य विकीर्य्य च कुसुमाञ्जलिं पादयोस्तस्याः स्वसौभाग्यमयाचतेति वृत्तान्तक-थनं। अथ रुक्मिण्याः पुत्रजननानन्तरं धूमकेतुनामकेनासुरेणापहृतस्तनयोऽस्याः खदिराटव्याम-धस्तक्षशिलायाः स्थापितोऽसौ मेघकूटधराधिपस्य कालसम्बराख्यस्य राज्ञो महिष्या कनकमालया समधिगतः पुत्रनिर्व्विशेषेण प्रतिपालितश्चेति वृत्तान्तकीर्त्तनं। अथ नारदस्योपदेशेन पुत्रवार्त्ताजि-ज्ञासया तमेव श्रीकृष्णः प्रेरयामास इति विवरणकथनं। ततो नारदस्य विदेहवासि-सीमन्धर-

'जिनेन्द्रसमीपगमनपूर्व्वकं तन्मुखात् मधुकैटभावेव प्रद्युम्नशाम्बरूपेण जन्मान्तरं प्राप्ताविति विवरणं श्रुत्वा तदादेशेनैव मेघकूटगमनपुरःसरं प्रद्युम्नदर्शनादिवृत्तान्तकथनं। सत्यभामातनुजस्य भानोर्जन्मकथनं। अथ नारदस्योपदेशेन जम्बूपुराधिपस्य जाम्बवस्यात्मजां जाम्बवतीं नाम्ना हृत्वा तद्भ्रात्रा विष्वक्सेनेन सह श्रीकृष्णस्य द्वारकायां प्रत्यागमनकथनं। अथ कृष्णेन सिंहलेश्वरदुहितुः लक्ष्मणायाः पाणिग्रहणविवरणकथनं। अथ श्रीकृष्णस्य सौराष्ट्रगमनपूर्व्वकं नमुचिं निहत्य तद्भगिन्याः सुसीमायाः पाणिग्रहणकीर्त्तनं। एवं क्रमेण श्रीकृष्णस्य गौरी-पद्मावती-गान्धारीप्रभृतीनां पाणिग्रहणवृत्तान्तकीर्त्तनं। हलिनस्तु रेवती-बन्धुमती-सीता-राजीवनेत्राणां पाणिपीडनकथनं।

४५—४६, सर्गे,—युधिष्ठिरादीनां जन्मकथनमुखेन कुरूणां वंशावलीकथनं। तत्र नाभेयसमकालीनयोः हास्तिनपुराधिपयोः श्रेयःसोमप्रभयोः वृत्तान्तकथनं। तत्र सोमप्रभपौत्रस्य कुरोः कुरुवंशप्रवृत्तिकथनं। ततः क्रमेण तद्वंश्यानां कुरुचन्द्र-शुभंकर-धृतिकर-धृतिमित्र-धृतिदृष्टि-भ्रमरघोष-हरिघोष-सूर्य्यघोष-पृथुविजय-जयराज-सनत्कुमार-सुकुमार-नारायण-नरहरि-शान्तिचन्द्र-सुदर्शन-सुचारु-चारु-पद्ममाल-वासुकि-वसु-वासव-इन्द्रवीर्य्य विचित्रवीर्य्य-चित्ररथ-पराशर-शान्तनु-धृतकर्म्मादीनां नामादिकथनं। अथ धृतपुत्रस्य धृतराजस्य अम्बा-अम्बालिका-अम्बिकेतिसमाख्यास्तिस्रः प्रियाङ्गना आसन्निति कथनं। तासु धृतराष्ट्र-पाण्डु-विदुराणां जन्मकथनं। दुर्योधनयुधिष्ठिराश्वत्थामादीनां जन्मादिकथनं। अथ निर्व्वासितानां जतुगृहदाहमुक्तानां पाण्डवानां वेशपरिवर्त्तनपूर्व्वकं कौशिकपुरी-श्लेष्मातकवसुन्धरापुरादिगमनविवरणकथनं। तत्र युधिष्ठिरस्य वसन्तसुन्दरीसमागमलाभवर्णनञ्च। अथ सभ्रातृकस्य तस्य लक्ष्मीपुरगमनपूर्व्वकं प्रभा-सुप्रभा-पद्मादीनां राजकुमारीणां पाणिग्रहणवृत्तान्तकथनं। हिडिम्बादिसंवादकथनं। ततः पार्थानां द्रुपदराज्यगमनपूर्व्वकं द्रौपदीलाभविवरणकीर्त्तनं। द्यूते पराजितानां पाण्डवानां वनवासादिवृत्तान्तकथनं। अथ तेषां रामगिरिगमनानन्तरं रामलक्ष्मणप्रतिष्ठितजैनालयादिदर्शनविवरणकथनं। ततो विराटनगरस्थितानां तेषां वेशपरिवर्त्तनादिवृत्तान्तकथनं। द्रौपदीलुब्धस्य कीचकस्य भीमात् परित्राणलाभानन्तरं तपश्चर्य्यया निर्व्वाणकथनं। द्रौपदीकीचकयोः पूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च।

४७—५२। सर्गे,—प्रद्युम्नचरितकीर्त्तनं। तस्य विविधालङ्करण-कुसुमबाण-कुसुमशयनादिलाभविवरणकथनं। सम्बरनिग्रहकथनं। तद्गृहस्थितायाः दुर्य्योधनदुहितुः कनकलतायाः वृत्तान्तकथनं। प्रद्युम्नस्य कनकलतालाभपूर्व्वकं नारदोपदेशेन द्वारकामुद्दिश्य प्रचलतः रामकृष्णाभ्यां युद्धवर्णनं। ततः नारदप्रमुखात् लब्धपरिचयस्य तस्य द्वारकापुरीप्रवेशमहोत्सवादिवर्णनं। साम्बस्य जन्मादिविवरणकथनं। अक्रूरादीनां श्रीकृष्णपुत्राणां नामादिकथनं। तथा यदुकुलकुमाराणां प्राधान्येन प्रत्येकं नामकथनं। तेषाञ्च सार्द्धत्रिकोटिसंख्याकथनं। यशोदातनुजायाः कंसनिगृहीतायाः दुर्गायाः पूर्व्वजन्मादिविवरणकथनं। जिनसेवया तस्या निर्व्वाणप्राप्तिकीर्त्त

नञ्च। अथ कृष्णमभियोधयितुं प्रवलस्य जरासन्धस्य द्वारकागमनवृत्तान्तकथनं। यादवमागधयोः युद्धे समवेतानां तदुभयपक्षमाश्रितानां प्रत्येक नामादिकथनं। तत्र महासमरवर्णनं। कृष्णकृत-जरासन्धवधवर्णनञ्च। अथ जरासन्धस्य निधनानन्तरं द्रोणदुर्य्योधनदुःशासनादीनां निर्व्वेदमापन्नानां विदुरसमीपात् जैनदीक्षादिग्रहणकथनं। कर्णस्तु यत्र सुदर्शनोद्याने कर्णकुण्डलं विहाय दमवरसमीपात् जैनदीक्षां जग्राह, तत्स्थानं कर्णसुवर्णाख्यया सुविख्यातमितिकथनं।

५३—५४, सर्ग.—जरासन्धप्रभृतीनां यादवानामानन्दस्थानमानन्दपुरमित्याख्यं जैनमन्दिरसुन्दरं जातमितिकथनं। अथ श्रीकृष्णस्य दक्षिणदेशादिविजयवर्णनं। तेन च महदेवाय यदुवंशीयाय राजगृहपुरम्, उग्रसेनसुताय माथुरं, पाण्डवेभ्यः हास्तिनपुरं, रुक्मनाभाय कोशलपुरञ्च दत्तमितिकथनं। अथैकदा नारदस्योपदेशेन धातकीखण्डभारतान्तर्गतामरकङ्काभिधानपुराधिपस्य पद्मनाभस्य द्रौपदीहरणवृत्तान्तकथनं। अनन्तरं विदितवृत्तान्तानां पाण्डवानां सार्द्धं बलकेशवादिभिर्यदुबलैश्च दैवरथसाहाय्येन लवणाब्धिमुत्तीर्य्य तत्पुरं समुपस्थितानां तेषां द्रौपदीपुनरुद्धारविवरणकथनं। अथ भूय एव तेनोपायेन सागरमुत्तीर्य्य वेलायां समागतानां मलयभूधरशोभादर्शनेन हृतचित्तानां तेषां तत्र मथुराभिधानपुरीनिर्म्माणपूर्व्वकमवस्थानादिविवरणकथनं।

५५—५६, सर्ग,—वाणदुहित्रा उषया सह प्रद्युम्नतनयस्य अनिरुद्धस्य विवाहादिवर्णनं। श्रीकृष्णस्य रुक्मिण्यादिभिः सह रैवतकविहारवर्णनं। नेमिजिनस्य वैराग्योत्पत्तिविवरणकथनं। इन्द्रादिभिः सुरनिकरैस्तस्य अभिषेकानुष्ठानवृत्तान्तकथनं। अथ बलकेशवादिभिर्निषिध्यमानोऽपि जिननेमिस्तपश्चरणार्थं गिरिराजं जगामेतिविवरणकथन। तत्र जिनस्य ध्यानानुष्ठानकथनप्रसङ्गेन ध्यानस्वरूपकथनं। तत्र अस्थिरस्य मनसो घनसंहननतया एकाग्रचिन्ताया अन्तर्निरोधो ध्यानमितिनिरूपणं। तत्र दुःखविघाताय अनुष्ठेयं। ध्यानञ्चार्त्तं रौद्रञ्चेति द्विविधं। तत्र वाह्यमान्तरञ्चेति तद्द्वैविध्यं। वाह्यञ्च आक्रन्दनादिकं। आन्तरन्तु चतुर्भेदं यथा, अनादेयस्य विषयस्य अनुत्पत्तिचिन्तनं, उत्पन्नस्य च तस्य वियोगचेष्टा, तथा मनोज्ञवस्तुविप्रयोगस्यानुत्पत्तिचिन्तनं, उत्पन्नस्य च तद्वियोगस्य अन्तश्चिन्ता चेति। तत्र अनुपादेयदुःखस्य साधनं चेतनादिकमिति ज्ञेयं। तच्च वाह्यविषशस्त्रादिकम्। आध्यात्मिकं वातादिप्रकोपजं। शारीरं दन्तशूलादिनिबन्धनं। मानसञ्च शोकदौर्मनस्यादिकमिति चतुर्व्विधं। सर्व्वस्यास्य अमनोज्ञस्य उत्पत्तिर्माभूदितिचिन्ताप्रबन्ध आर्त्तध्यानमिति ज्ञेयं। एतत्तु मलाविलमिति समाख्यातं। संकल्पाध्यवसानरूपं द्वितीयन्तु उत्पन्नस्यामनोज्ञस्यास्य कथमभावः स्यादिति। अथ मनोज्ञस्य पुत्रकलत्रधनधान्यादेः सुखसाधनत्वं वाह्यमिति ज्ञेयं। आध्यात्मिकञ्च तत्पित्तादिसाम्येन आरोग्यादिकं। मानसं खलु सौमनस्यादिरूपमिति। अथ ऐहिकामुत्रकस्य मनोज्ञस्य वस्तुनो विप्रयोगो माभूदितिसंकल्पसन्ततीयमार्त्तध्यानं विज्ञातव्यं। अथ पूर्व्वोत्पन्नस्य मनोज्ञविप्रयोगस्य अभावे अध्यवसान चतुर्थमार्त्तध्यानमिति। अथ रौद्रस्य ध्यानस्य हिंसा-संरक्षण-स्तेय-मृषानन्दभेदेन चातुर्व्विध्यकथनं। तत्र

हिंसादिषु यथायथमभिरेषिः हिंसानन्दादय इति ज्ञेयं। अथ मुमुक्षवः परिहृत्य आर्त्त-रौद्रे द्वे पापध्याने भावशुद्धिसाधनेन योगमभ्यस्य धर्म्मध्यानं कुर्य्यादिति। धर्म्मश्च बाह्याध्यात्मिकभावानां याथात्म्येन अध्यवसाय इति तथा धर्म्मादनपेतं ध्यानं धर्म्मध्यानमिति च ज्ञेयं। तच्च बाह्याध्यात्मिकभेदेन द्विविधं। तत्र सूत्रार्थमार्गणशीलगुणादिष्वनुरागिता बाह्यं। आध्यात्मिकमपि अपायविचयादिभेदेन दशविधं। तत्र संसारहेतूनां प्रवृत्तीनां कथं वर्ज्जनं स्यादिति चिन्ताप्रबन्धसम्बन्धः अपायविचयं नाम प्रथमं। पुण्यानां प्रवृत्तीनामात्मसात्करणार्थं संकल्पसन्ततिरुपायविचयं नाम द्वितीयं। जीवानामनादिनिधनत्वस्योपयोग-स्वलक्षणत्वादिचिन्तनं जीवविचयं नाम तृतीयं। तथा स्याद्वादप्रक्रियावलम्बनेन तर्कानुसारिणः पुंसः सन्मार्गाश्रयणं हेतुविचयमिति क्रमेण अजीवविचय-विपाकविचय-विरागविचय-भवविचय-संस्थानविचय-आज्ञाविचयानां स्वरूपकथनं। अथ शुक्लध्यानञ्च शुक्लं, परमशुक्लञ्चेति द्विविधं। तत्र प्रथमं तावत् यत्र अर्थादिषु वितर्कस्य पृथक्त्वेन वीचारोऽस्ति तल्लक्षणं। वीचारश्च अर्थव्यञ्जनयोगानां क्रमेण संक्रमः। तत्रार्थो ध्येयो व्यञ्जनं शब्दो योगश्च वागादिलक्षण इति निरूपणं। तदनेन ध्यानेन अविक्षिप्तमानसो मुनिः मोहस्योपशमं कुर्व्वन् द्रव्याणुमेकमेवावलम्ब्य द्रव्याद् द्रव्यान्तरं याति। द्वितीयन्तु यत्र वीचारहीनेषु अर्थादिषु एकत्वेन वितर्कोऽस्ति तल्लक्षणं। तदनेन परमशुक्लध्यानेन योगी ज्ञानदर्शनसम्यक्त्ववीर्य्यचारित्रपूर्व्वकैः भावैः स्वकर्म्मक्षयेण अनन्तसुखावहं मोक्षं प्राप्नोतीति निरूपणं। अथ नेमिजिनः षट्पञ्चाशदहोरात्रकालं यावत् तपस्यां कृत्वा शुक्लध्यानाग्निना घातिकर्म्मसङ्घातवनं दग्ध्वा च जैनकैवल्यं प्रापेति विवरणकीर्त्तनं।

५७ सर्ग,—जिनानां समवस्थानभूमिवर्णनं। तत्र भूमिनिरूपणं। उद्यान-सरोवरप्रासादादिनिरूपणञ्च। अथ वरदत्ताभिधानेन गणिना पृष्टस्य जिनदेवस्य तस्मै उपदेशप्रदानविवरणं। तत्र भगवतो वाणी एका दिनवाग्रूपा बभूव। तथा हि,—एकात्मस्वरूपकथनात् तद्वाणी एकरूपा। एवं द्विधर्म्मकथनात् द्विरूपा। रत्नत्रयप्रकाशनात् त्रिरूपा। चतुःकषायनाशनात् चतूरूपा। पञ्चास्तिकायप्ररूपकत्वात् पञ्चरूपा। षड्द्रव्यप्रकाशकत्वात् षड्रूपा। सप्तभङ्गीप्ररूपणात् सप्तरूपा। कर्म्माष्टनाशनात् अष्टरूपा। नवनयप्ररूपणात् नवरूपा चेति। अथ जगतो भावाभावरूपत्वकथनं। निर्व्विकल्पभावत्वकथनं। अहेतुत्वकथनं। मन्वमादेः क्षित्यादिकार्य्यपरम्परायाः कर्तृत्वेन सहेतुकत्वसिद्धिः तथाहि क्षित्यादिकं सकर्तृकं कार्य्यत्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैव असिद्धेरिति। अनादित्वकथनं। अपरिणामित्वकथनञ्च। आत्मपरलोकधर्म्माधर्म्मादीनामस्तित्वकथनं। आत्मनश्च कर्तृत्वभोक्तृत्वादिकीर्त्तनञ्च। तथा आत्मनः अस्तिनास्तीतिषट्प्रकारप्रदर्शनं। अथ आत्मनः अविद्यया संसारबन्धः, विद्यया च तस्माद्विमुक्तिरितिकथनं। किञ्च सम्यग्दर्शनज्ञानचारित्रत्रितयस्यैव विद्यात्वादनेन मोक्षहेतुत्वनिरूपणञ्च। जीव-अजीव-आस्रव-बन्ध-सम्वर-निर्ज्जर-मोक्षरूपसप्ततत्त्वकथनं। अथ ज्ञानेच्छाद्वेष-प्रयत्नसुखदुःखादीनामात्मलिङ्गत्वकथनं। अथ पृथिव्यादिभूतानां संस्थानविशेषोऽयं जीवः तथा पिष्टकिण्वादिभ्यो मदशक्तिवत् चैतन्यमुत्पद्यते—

इति चेच्च शरीरस्य चैतन्यव्यभिचारित्वादित्यनेन चार्वाकमतखण्डनं। नापि संवित् मात्रमात्मा। तथा हि—क्षणिकात्मनि संवित्तौ प्रत्यभिज्ञाव्यवहारविलोपः स्यादिति क्षणिकविज्ञानवादखण्डनं। तथायमात्मा नाणुमात्रको नापि अङ्गुष्ठादिपरिमाणकः, तथात्वे सकलैः प्रदेशैः सह चक्षुरादिवत् न स्वार्थं प्रतिपद्येत। तथासौ विभुरपि भवितुं नार्हति; यतस्तस्य तथात्वे ज्ञानस्यार्थे दूरनिकटादिव्यवहाराय जलाञ्जलिर्दीयतां। अत एव देहमात्रपरिमाणोऽयमात्मेति युक्तं। किञ्च सप्तसु पदार्थेषु संक्षेपतो जीवाजीवाख्ये द्वे तत्त्वे तत्र बोधात्मको जीवः, अबोधात्मकस्त्वजीवः। तत्र अजीवस्य आकाशधर्म्माधर्म्मपुद्गलकालास्तिकायभेदेन पञ्चविधत्वं। अस्तिकायश्च,—पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया अस्तिव्यपदेशः, शरीरवदनेकप्रदेशत्वेन कायव्यपदेश इति। अथ जीवा द्विविधाः संसारिणो मुक्ताश्च। संसारिणोऽपि द्विविधाः समनस्का अमनस्काश्च। तत्र शिक्षाक्रियालापग्रहणरूपसंज्ञा येषामस्ति ते संज्ञिनः समनस्काः, एतद्विधुरास्त्वमनस्काः। तत्र नयादिभिरुपायैः प्रतिपत्तव्योऽयं जीवः। अथ अनेकात्मनि द्रव्ये नियतैकात्म्यसङ्ग्रहो नय इत्युच्यते। अयं हि द्रव्यार्थिकपर्य्यायार्थिकभेदेन द्विविधः। तयोश्च नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढाख्यया षड्विधत्वनिरूपणं। अथ पूरयन्ति गलन्तीति पुद्गलास्ते च द्विविधाः अणवः स्कन्धाश्च। अथ कायवाङ्मनसां कर्म्मयोग आस्रव इति कथ्यते, तथा हि—यथा, जलाशयागाद्वारं नद्याः स्रवणकारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकया कर्म्म आस्रवतीति स योग आस्रवः। स च सकषाय-अकषायभेदेन द्विधा। तत्र कषति हिनस्ति आत्मानं कुगतिप्रापणादिति कषायः। अथ सकषायत्वात् जीवः कर्म्मभावयोग्यपुद्गलानादत्ते—इत्यतः कर्म्मबन्धयोग्यानां सम्बन्धं यत्करोति ततः सम्बन्ध इति निगद्यते। अथ पुनरपि शुभाशुभभेदादास्रवो द्विविधः, तत्र अहिंसादिः शुभकाययोगः सत्यभाषणादिः शुभवाग्योग इत्यादिकं। अथ आस्रवयति पुरुषं विषयेष्विति इन्द्रियप्रवृत्तिरप्यास्रव इति चोच्यते। तत्र च साम्परायिकी-कायिकी-आध्यात्मिकी-प्रत्यायिकी-नैसर्गिकीभेदेन पञ्चविधक्रियानुप्रवेशकथनं। अथ ताः क्रिया अपि प्रत्येकं पञ्चविधा इति मिलित्वा पञ्चविंशतिप्रकारक्रियालक्षणकीर्त्तनं। इति सामान्येन कर्म्मास्रवाणां भेदप्रदर्शनपूर्व्वकं प्रत्येक विशेषकार्य्यनिरूपणं। अथ पूर्व्वोक्ताहिंसासुनृतास्तेय-ब्रह्मचर्य्यापरिग्रहरूपस्य महाव्रतसंज्ञाकथनं। अथ संसारकारणादात्मगोपनं गुप्तिः। सा च त्रिधा कायवाङ्मनोगुप्तिभेदात्। गुप्त्याद्युपायसंवरव्रतसाधनेन मिथ्यादर्शनविरतिप्रमादकषायाणां बन्धहेतूनां निर्जरणकामो व्रती इत्युच्यते। अथासौ सागार-अनागारभेदेन द्विविधः। अथ अहिंसाद्यनुव्रतस्य प्रत्येकं लक्षणकथनपूर्व्वकं गृहस्थस्य उत्कर्षव्रतनियमकथनं। अथ सम्यग्ज्ञानदर्शनचारित्राणां रत्नत्रयाणां प्राप्त्युपायकथनं। तत्र जीवादीनां यथावस्थं मोहसंशयादिराहित्येन अवगमं सम्यग्ज्ञानं। एतज्ज्ञानं पञ्चविधं मति-श्रुति-अवधि-मनःपर्य्याय-केवलभेदात्। संसरणकर्म्मोच्छित्त्यभ्युद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणनिवृत्तिः सम्यक्चारित्रं। तत्र अहिंसादिभेदेन पञ्चधा। येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेण अर्हदुक्तेनप्रतिपादिते अर्थे श्रद्धानं सम्यग्दर्शन-

मिति। अथ कषायनिमित्ततया प्रकृतिनिरूपणं। सा च अष्टविधा यथा,—ज्ञानावरण-दर्शनावरणवेदनीय-मोहनीय-आयुः-नाम-गोत्र-अन्तरायभेदेन। एतेषां लक्षणकथनपूर्व्वकमवान्तरभेदादिनिरूपणं। अथ गतिभेदनिरूपणं। मिथ्यादर्शनादिभेदनिरूपणं। त्रस-स्थावरनामभेदेन अमनस्कजीवस्य द्वैविध्यं तत्र द्वीन्द्रियादयश्चतुर्व्विधाः शङ्खगण्डोलकप्रभृतयस्त्रसाः। पृथिव्यादयः स्थावराः। एवं आतप-उद्योत-उच्छ्वास-शरीरसुभग-दुर्भग-सुस्वर-दुःस्वर शुभ-अशुभसूक्ष्मादिलक्षणकथनं। अथ पुण्यापुण्यप्रकृतीनां शुभाशुभानुभवनिरूपणादिकं। अथ अर्ज्जितस्य कर्म्मोऽनुभवात् तपस्यादिभिर्निर्ज्जरणं निर्ज्जरा। सा द्विविधा विपाकजा, अविपाकजा च। तत्र आम्रादिफलपाकवत् क्रमेण प्रारब्धफलकर्म्मनिवृत्तिः प्रथमा। तदितरा तु द्वितीया। अथ आस्रवस्रोतसोद्वारं संवृणोतीति सम्वरः। सोऽयं निरोधरूपो भावद्रव्यभेदेन द्विविधः। संसारहेतूनां कर्म्मणां निवृत्तिः भावसम्वरः। तत्कर्म्मपुद्गलानामादानविच्छेदो द्रव्यसम्वरः। अथ प्राणिपीड़ापरिहारेण सम्यगयनं समितिः। सा च पञ्चधा ईर्य्या-भाषा-एषणा-आदान-उत्सर्गभेदेन। समिति-गुप्तिप्रभृतीनां सम्वरकारणतानिरूपणं। अथ कर्म्मणां निर्ज्जरातो बन्धहेतूनामभावात् कार्त्स्न्येन दुःखनिवृत्तिरपवर्ग इति निरूपणं। मोक्षकारणन्तु जीवादिसप्ततत्त्वानां ज्ञानपूर्व्वकं श्रद्धानं तथा चारित्रञ्चेति। एतच्छ्रुत्वा सर्व्वेषां तेषां यादवानां तत्कामिनीनाञ्च अणुव्रतग्रहणपूर्व्वकं निजगृहगमनविवरणकथनं।

५९–६६, सर्गे,—अथ नेमिजिनस्य विहारनिर्म्माणपुरःसरं सुराष्ट्र-मत्स्य-लाट कुरु-जाङ्गल-पाञ्चाल-मागध-अङ्ग-वङ्गादिदेशेषु परिभ्रमणपूर्व्वकञ्च जैनधर्म्मप्रचारकथनं। कृष्णपूर्व्वजानां देवकीपुत्राणां नेमिजिनशिष्यताप्राप्तिकथनं। नेमिजिनस्य सत्यभामारुक्मिणीप्रभृतीनां परतस्तासां पूर्व्वजन्मवृत्तान्तकीर्त्तनं। कृष्णेन सह नेमिजिनस्य संवादेन चक्रिणामर्द्धचक्रिणामर्हतां नामादिकथनं। तथाहि, वृषभनाथ-अभिनन्दननाथ-सुमति-पद्मप्रभ-सुपार्श्वनेमिप्रभृतीनां नाम। तथा भविष्यज्जिनेश्वरयोः पार्श्व-महावीरयोर्नामादिकथनं। एषां जन्मस्थानकथनं जन्मतिथिनक्षत्रादिकीर्त्तनञ्च। यथा प्रथमस्य वृषभनाथजिनस्य विदेहेषु, चैत्रकृष्णनवम्यामुत्तराषाढ़ानक्षत्रे जन्म, अस्य पिता नाभिर्नाम, माता च मरुदेवी। तथा चास्य चैत्यवृक्षो न्यग्रोधपादपः, निर्व्वाणप्राप्तिस्थानञ्च कैलासपर्व्वत इति। क्रमेणानेन सर्व्वेषां जिनेन्द्राणां विवरणकीर्त्तनं। अथ जिनानां प्रत्येकं दीक्षाकालपारणाविधिकथनादिकं। तत्र आद्यस्य जिनस्य (वृषभस्य) वर्षेण पारणा तदितरेषान्तु तृतीयदिवसे, तथा, वृषभस्य दीक्षाकालः चैत्रकृष्णनवमीत्यादिक्रमेण ज्ञेयं। किञ्च वृषभेण पारणायामिक्षुरसो गृहीतः, अन्यैस्तु गोक्षीरनिष्पन्नं परमान्नमङ्गीकृतं। अथ तेषां देहमान-परमायुःप्रभृतिकथनं। अपि जिनानां सप्तविधः पूर्व्वधराशिक्षक-सावधि-केवलि-वादि-विक्रियायुक्त-विपुलायुतभेदात्। तत्र पूर्व्वधराणां ४७५० संख्याकथनं। एवमन्येषां द्रष्टव्यं। एषामवान्तरभेदकथनपूर्व्वकं सङ्ख्याकथनं। तथा चैषां निर्व्वाणकालादिनिरूपणं। तत्र महावीरस्य निर्व्वाणकाले पालको नाम राजा भविष्यतीतिकथनं। अथ द्वैपायनस्य मुनेः कोपात् यदुवंशध्वंसवर्णनं।

तत्र रामकृष्णाभ्यामन्तरेण सर्व्वेषां यादवानां पुरवासिनाञ्च द्वारकया सार्द्धं वह्निदाहेन विनाशप्राप्तिकथनं। पुरा किल नेमिजिनेन्द्रः कृष्णादिभिरभ्यर्थित एवमाह द्वैपायनमूनेः कोपेन सार्द्धं द्वारकया षड्मासं दाहनं, तथा कृष्णस्यैव भ्राता जरासूनुना कृष्णस्य निधनं भविष्यतीति। तदेतत् श्रुत्वा नितरां निर्व्विस्य जरासूनोः द्वारकापरित्यागपूर्व्वकं दक्षिणप्रदेशगमनकथनं। अथ यादवानां विनाशेन अत्यर्थं शोकसन्तप्तयोः रामकृष्णयोः दक्षिणमथुरामुद्दिश्य प्रयाणकथनं। तत्र वनमध्ये तरुच्छायायां शयानस्य कृष्णस्य जराकुमारनिक्षिप्तशरेण चरणवेधनादिकथनं। बलदेवविलापवर्णन। जरासूनुमुखश्रुतकृष्णवृत्तान्तानां पाण्डवानां बलदेवसमीपगमनपूर्व्वकं कृष्णस्यौर्द्धदैहिकसम्पादनं। बलदेवस्य तपश्चरणं। पाण्डवादीनां प्रव्रज्यावृत्तान्तकथनं। तेषां निर्व्वाणप्राप्तिकथनञ्च। नेमिनिर्व्वाणकीर्त्तनञ्च।

---

**No. 2041.** त्रिलोकसारः वा तिलोयसारो, सटीकः। Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 257. Lines, 9 on a page. Extent, 5,143 ślokas Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

**Triloka-sára** ALIAS **Tiloya-sáro.** A description of the three regions of the Universe. The work is in Mágadhí verse, and extends to one thousand and nine stanzas. Attached to it is a Sanskrit commentary by Mádhavachandra Traividya, who says he has followed the opinion of Nemichandra Siddhántadeva, but it is not clearly stated whether this Nemichandra was the author of the text, or an earlier commentator. CONTENTS. Various kinds of regions, such as Bhavanas, Vyantara, Jyotih, Vimána, Nara, Tiryyak and Jina. Eternity of regions. Nihilism refuted. Agency of God in their creation refuted. Action of nature. Eternity of matter. Theory of illusion refuted. Theory of impermanence refuted. Regions compared to the evanescence of musical sounds. Extent equal to 14 *rajjus.* Extent of a rajju. Various kinds of measures. Various kinds of reckoning in relation to number, extension, solidity, expansion &c. These measures applied to practical purposes in measuring areas of land and water. The seven oceans relating to the earth. Regions of the earth. Distribution of heat and cold. Countries, their subdivisons &c. Hills. The river Vaitarani in the way to hell. The dwellers of hell. The number of Jina quarters. Countries in the 14 regions of the universe, their inhabitants. Asuras dwelling there,—other spiritual beings. The army of Hara. Characteristics of Asuras. Trees. Placing of images near

the root of sacred trees. Regions of Indra and others. The census of their inhabitants.

Description of Vyántara lokas. The number of Jaina temples therein. Various kinds of kings who dwell therein—such as Kinnara, Kimpurasha, Mahoraga &c. Trees fit for Chaityas; these are Aśoka, Champaka, Nágakeśara, Tumbura, Vaṭa, Asvattha, Tulasí and Kadamba. Jambudvipa stands to the east of the Vyantara region.

Description of Jyotir loka. In this chapter are given accounts of the celestial luminaries, and casually of the 16 continents or great islands, Jambudvipa, Ghátaki-khaṇḍa-dvipa, &c. Sixteen other continents. Characters of the different oceans connected with the continents. Stars and planets, their distance from each other. Planets reckoned at 88, their names. The paths, motions, dimensions &c. of the sun and the moon. Night and day, their causes and those of their decrease and increase. Intercallary months. Equinoxes, and other details regarding the motions of the earth.

Description of Vimána loka, or the region of the Devas. Devas and Jaina worship there.

Sacred places in the Nara loka. This includes notices of a great number of sacred places on earth and their presiding divinities.

Characteristics of emperors and their belongings. Descriptions of various distinguished Jaina emperors of India.

Description of the salt ocean and its belongings, including various sacred places therein.

The Sanskrit contents given below will be found fuller and more detailed.

**Beginning** बलगोविंदसिहामणि-किरणकलावरुणचरणणहकिरणं ।
विमलयरणेमिचंद तिहुवणचंदं णमंसामि ॥ १ ॥
भवणव्वेंतरजोइस विमाणणरतिरिय लोयजिणभवणे ।
सव्वामरिन्द णरवइ संपूजियवन्दिए वंदे ॥ २ ॥
सव्वागासमनन्तं तस्सय बहुमज्झदेसभागम्हि ।
लोगोसंखपदेसो जगसेढिघणप्पमाणोहु ॥ ३ ॥

टीकायाः । त्रिभुवनचन्द्रजिनेन्द्र नत्वानत्य त्रिलोकसारस्य ।
इसिरियं किञ्चिज्जन-प्रबोधनाय प्रकाश्यते विधिना ॥
जीयादकलङ्कादिः सूरिर्गुणभूरिरनुपमधारी ।
अनवरतविनतजिममतविरोधिवाजिमतो जगति ॥

यस्मादखिलबुधानां विस्मयकृद्भूत्प्रवृत्तिरिह यस्य ।
तच्छासनमपनुदतादनघं घनकुमतितिमिरनिवहमदः ॥

श्रीमदप्रतिहताप्रतिमनिःप्रतिपक्षनिःकारणभगवन्नेमिचन्द्रसैद्धान्तदेवश्चतुरनुयोगचतुरुदधिपारगश्चामुण्डरायप्रतिबोधनव्याजेनाशेषविनेयजनप्रतिबोधनार्थं त्रिलोकसारनामानं ग्रन्थमारचयन् तदादौ निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलकुलमवलोक्य विशिष्टेष्टदेवतामभिष्टौति । 'बलगोविंद' इति । अस्यार्थो कथ्यते । णमंसामि नमस्यामि नमस्करोमि । कं, विमलयरणेमिचंदं विमलतरनेमिचन्द्रं । इत्यादि ।

End. इति णेमिचंदमुणिणा अप्पसुदेणभयणं दियच्छेण ।
रइयो तिलोयसारो खमं तु तं बहुसुदाइरिया ॥ १००९ ॥

टीकायाः । गुरुणेमिचंदसम्मद-कदिवयगाहा तहिं तहिं रइदा ।
माधवचंदतिविज्जे णिणमणुसरणिज्जमज्जभेहिं ॥

स्वकीयगुरुनेमिचन्द्रसिद्धान्तचक्रिणां सम्मताः । अथ वा ग्रन्थकर्तॄणां नेमिचन्द्रसिद्धान्तिदेवानामभिप्रायानुसारिण्यः कतिपयगाथाः । माधवचन्द्रत्रैविद्येनापि तत्र तत्र रचिताः । इदमस्माभिराचार्य्यवर्य्यैरनुसरणीयं । साम्प्रतमलङ्कारकर्ताप्यन्त्यमङ्गलं कुर्वन्नभीष्टाशंसनं करोति ।

अरहन्तसिद्धआइरिय उवज्झायासाहुपञ्चपरमेठी ।
इयपञ्चनमोकारो भवे भवे म सुहं दिंतु ॥

Colophon. इति श्रीनेमिचन्द्रसिद्धान्तिदेवानामभिप्रायानुसारिणा माधवचन्द्रत्रैविद्येन रचिता त्रैलोक्यसारटीका इत्तसमाप्ता ।

विषयः । ग्रन्थस्य भवनव्यन्तर-ज्योतिः-विमान-नरतिर्य्यक्लोक-जिनभवनरूपपञ्चाधिकारकथनं । लोकस्य अस्तित्त्वादिकथनं । तत्र शून्यवादनिराकरणं । ईश्वरकर्तृकत्वनिराकरणं । स्वभावनिर्वृत्तत्वकथनं । परमाण्वारब्धतानिराकरणं । मायावादनिराकरणं । क्षणिकमतनिरासः लोकस्य (भुवनस्य) मुरजसन्निभत्वकथनं । तत्र चतुर्द्दशरज्जुमयकल्पनं । जगत्श्रेण्याः सप्तमो भागो रज्जुरिति लक्षणकथनं । इन्द्राङ्गुलादीनां मानानां प्रतिपत्तिकथनं । मानप्रक्रियाकथनं । तत्र लौकिकलोकोत्तरभेदेन द्विविधमानकथनं । तत्र मानोन्मानावमानगणिमानप्रतिमान तत्प्रतिमानभेदेन लौकिकमानस्य षड्विधत्वकथनं । द्रव्यक्षेत्रकालभावभेदेन लोकोत्तरमानस्य चतुर्विधत्वकथनं । तत्र द्रव्यादीनां क्रमेण जघन्योत्कृष्टत्वकथनं । संख्याप्रमाणोपमाप्रमाण-भेदेन द्रव्यस्य द्वैविध्यकथनं । संख्येयमसंख्येयमनन्तमिति संख्यापि त्रिविधा । तत्र असंख्येयमनन्तञ्च प्रत्येकं त्रिविधं परीतं युक्तं द्विकवारमिति । अथ संख्येयज्ञाननिमित्तं, अनवस्था, शलाका, प्रतिशलाका, महाशलाकेति चत्वारि कुण्डानि कल्पयितव्यानि । तत्र चतुर्णां कुण्डानां व्यासादिपरिमाणकथनं क्षेत्रफलज्ञानोपायकथनं । तत्र क्षेत्रसंस्थानादिकीर्त्तनञ्च । कुण्डानां खातशिखादिफलानयनादिप्रकारकथनं । क्रमेणानेन सप्रभेदासंख्येयानन्तयोः स्वरूपकथनं । एषां विषयज्ञाननिरूपणं । तत्र

सर्व्वधारानिरूपणं। समधाराकथनं। विषमधाराकथनं। एतयोः स्थानानयनादिप्रकारकथनं। एवं परत्र ज्ञेयं। तथा कृतिधाराकथनं। अकृतिधाराकथनं। घनधाराकथनं। वर्गमातृकाधाराकथनं। घनमातृकाधारा। द्विरूपवर्गधाराकथनं। क्रमेणानेन चतुर्द्दशविधधारानिरूपणं। संख्याप्रमाणप्रपञ्चनञ्च इतमितिज्ञेयं। अधुना पूर्व्वोक्तस्य उपमाप्रमाणस्य अष्टविधत्वनिरूपणं। यथा,—पल्यं, सागरः, सूच्यङ्गुलं, प्रतराङ्गुलं घनाङ्गुलं, जगत्श्रेणिः, जगत्प्रतरः, घनलोकश्चेति। तत्र व्यवहारोद्धाराद्धापल्यानीतिपल्यत्रयेण क्रमेण संख्याद्वीपसमुद्राः कर्म्मस्थित्यादयश्च वर्णिताः। पल्यज्ञानोपायकथनं। अत्र क्षेत्रसंस्थानादिकथनं। एवं सागरोपमसूच्यङ्गुलोपमादीनां स्वरूपनिरूपणं। पूर्व्वोक्तचतुर्द्दशरज्जुपर्य्यन्तं लोकस्य आयामकथनं। रज्जुफलादिनिरूपणं। अधोलोकक्षेत्रफलानयनाय तस्य अष्टधाप्रभेदकथनं। यथा,—सामान्यं, ऊर्द्धायतं, तिर्य्यगायतं, यवमुरजं यवमध्यं, मन्दरं, दूष्यं, गिरिकटकञ्च। क्रमेणैषां क्षेत्रफलादिनिरूपणं। लोकशिखरे वायुवाहुल्यकथनं। वायुक्षेत्रफलादिकथनं। इत्थं सार्द्धम लोकमध्ये त्रसनालीस्वरूपकथनं। त्रसनाल्यधःस्थभूमिभेदकथनं। तत्र मुरजदले सप्तमह्यः, यथा,—रत्नशर्करा, वालुकाः, पङ्कं, धूमः, तमः, महातमः, प्रभा चेति। तत्र पृथिव्यादीनां भेदादिनिरूपणं। शीतोष्णादिविभागकथनञ्च। दिग्विभागकथनं। नरकादिसंख्यादिनिरूपणं। *विस्तरेण नरकवर्णनं। वैतरणीनदीवर्णनं। नरकाग्निः हतस्य जीवस्य उत्पत्तिनियमकथनं तत्र प्रथमं *तिर्य्यग्योनौ उत्पत्तिकथनं। नरकं गच्छतां जीवानां पृथिवीं प्रति नियमकथनं। अथ पूर्व्वोक्तभवनेषु सप्तकोटिद्वासप्ततिलक्षसंख्यकानि जिनभवनानि सन्तीतिकथनं। भवनवासिनां कुलभेदकथनं। तत्र असुरादिगणकथनं। भूतानन्दादिगणकथनं। हरिषेणादिगणकथनं। क्रमेणासुरादीनां चिह्नकथनं। यथा,—चूड़ामणि-फणि-गरुड़-गज-मकरस्वस्तिक-वज्र-सिंह-कलस-अश्वाश्च। अश्वत्थ-सप्तच्छद-शाल्मली जम्बू-वेतस-कदम्ब प्रियङ्गु-शिरीष-पलाश-राजद्रुमरूपचैत्यतरुकथनं। चैत्यतरूणां मूलदेशे प्रतिमास्थापनार्थं स्तम्भादिनिर्म्माणप्रकारकथनं। इन्द्रादीनां भवनसंख्यादिकथनं। अनीकभेदकथनं। तत्र हस्त्यानीकादिसंख्याकथनं। तत्र भवनेषु असुरादिदेवीनां संख्याकथनं। तथाहि,—महादेव्यः ५, परिवारदेव्यः ५,९९९९५, वल्लभिकाः, १६०००, चम्बिलियाः ५६०००, विकुर्व्वाणादेव्यः पृथगेव ४०००० । तथा अनीकवाहनादिसंख्यादिकथनञ्च ।

एवं भवनलोकनिरूपणानन्तरं व्यन्तरलोकनिरूपणं। तत्र,—जिनगेहसंख्यादिकथनञ्च। व्यन्तराणां कुलभेदनिरूपणं। अथ किन्नर-किंपुरुष-महोरग-गन्धर्व्व-यक्ष-राक्षस-भूत-पिशाचरूपाष्टविधव्यन्तरदेवताकथन। तेषां वर्णादिनिरूपणञ्च। चैत्यतरुभेदकथनं। यथा,—अशोक-चम्पक-नागकेशर-तुम्बुरु-वट-अश्वत्थ-कण्टकतरु-तुलसी-कदम्बवृक्षाश्च। अथ वृक्षमूलेषु जिनप्रतिमास्थापनार्थं स्तम्भादिनिर्म्माणविधिकथनं। किन्नरादीनां (प्रिया) वल्लभिकानिरूपणं। तेषां सेनामहत्तरनिरूपणञ्च। व्यन्तरलोकस्य पूर्व्वस्यां दिशि जम्बूद्वीपतुल्यानि पञ्चपञ्चनगराणि सन्तीति कथनपूर्व्वकं तदुपरि महाप्रासादस्वरूपकथनं। तन्नगरवाह्यवनवर्णनादिकं। भवनादिवर्णनञ्च।

अथ ज्योतिर्लोकस्वरूपनिरूपणं। तत्र जिनगेहसंख्यादिकथनं। चन्द्र-आदित्य-ग्रह-नक्षत्र-प्रकीर्णकताराभेदात् पञ्चविधज्योतिष्कभेदकथनं। एतत्कथनमुखेन षोडशद्वीपनिरूपणं यथा,—जम्बूद्वीपः, धातकीखण्डद्वीपः, पुष्करवरः, वारुणिवरः, क्षीरवरः, घृतवरः, क्षौद्रवरः, नन्दीश्वरवरः, अरुणवरः, अरुणाभासवरः, कुण्डलवरः, शङ्खवरः, रुचकवरः, भुजगवरः, कुशगवरः, क्रौञ्चवरश्चेति।

अन्यविधषोडशद्वीपकथनं यथा,—मनःशिलाद्वीपः, हरितालद्वीपः, सिन्दूरवरः, श्यामवरः, अञ्जनकवरः, हिङ्गुलिकवरः, रूप्यवरः, सुवर्णवरः, वज्रवरः, वैदूर्य्यवरः, नागवरः, भूतवरः, यक्षवरः, देववरः, अहीन्द्रवरः, स्वयम्भूरमणश्चेति। तत्र लवणाम्बुधिः, कालोदकाम्बुधिश्चेतिकथनपूर्व्वकं पूर्व्वोक्तद्वीपनामभिः प्रत्येकं समुद्रनामकथनञ्च। जम्बुद्वीपादीनां प्रत्येकं विस्तारसंस्थानादिकथनं। समुद्रेषु प्रत्येकं रसविशेषकथनं। तत्र लवणसमुद्रे, कालोदकसमुद्रे, स्वयम्भूरमणसमुद्रे च जलचराः सन्ति नान्यत्रेतिकथनं। मनुष्यक्षेत्रेतरविभागस्य कर्म्मभोगभूमिविभागस्य च पर्य्यन्तपर्य्यन्तद्वयनिरूपणं। ताराणां स्थितिस्थानादिनिरूपणं। चन्द्रादीनां स्थितिस्थानादिनिरूपणं। ज्योतिर्विमानस्वरूपकथनं। ग्रहादीनां व्यासादिनिरूपणं। तेषां किरणप्रमाणनिरूपणं। चन्द्रादीनां विमानवाहकानां रूपादिकथनं। केषाञ्चिन्नक्षत्राणां दिग्विभागकथनं। चलाचलनक्षत्रनिरूपणं। ग्रहाणामवस्थानक्रमकथनं। विष्कम्भानयनप्रकारकथनं। पूर्व्वोक्तरज्जुक्षेत्रप्रमाणादिकथनं। अल्पसन्दृष्टिप्रक्रियाकथनं। ज्योतिर्विम्बसंख्याद्यानयनादिप्रकारकथनं। चन्द्रस्य परिवारकथनं। अष्टाशीतिग्रहाणां नामानि यथा,—काल-विकाल-लोहित-कनक-कनकसंस्थान-अन्तरद-दुन्दुभि-रत्ननिभ-रूपनिर्भासप्रभृतयः। सूर्य्याचन्द्रयोरन्तरज्ञानोपायकथनं। तयोः वीथीनिरूपणादिकं। चन्द्रादीनां परिध्यानयनप्रक्रियाकथनं। दिनरात्रिहेतुकथनं। तयोः ह्रासवृद्धिकारणकथनं। अयनाद्यानयनप्रकारकथनं। सूर्य्याचन्द्रयोः गमनप्रकारकथनं। अस्तोदयानयनप्रकारकथनं। चापानयनप्रक्रियाकथनं। समुद्रचारक्षेत्रनिरूपणञ्च। वेदिकाक्षेत्रफलादिकथनं। द्वीपचारकथनं। चन्द्रादिपथव्यासप्रमाणादिकथनं। सूर्य्यतापस्य क्षेत्रविभागप्रक्रियाकथनं। चन्द्रादित्यग्रहाणां परिधिभ्रमणकालानयनप्रकारकथनं। चन्द्रादित्ययोर्नक्षत्रभुक्तिकालानयनप्रकारकथनं। राहोः नक्षत्रभुक्तिनिरूपणं। मलमासप्रकारप्रतिपादनं। दक्षिणोत्तरायणप्रारम्भे नक्षत्रायणप्रकारकथनं। विषुवे ग्रहनक्षत्रादीनामानयनप्रकारकथनं। ताराणामाकारविशेषकथनं। कृत्तिकादीनां परिवारताराकथनं। तत्संख्या तु एकादशोत्तरशताधिकसहस्र( ११११ )मितिकथनञ्च।

अथ विमानलोकनिरूपणं। तत्र च त्रयोविंशतिसहितचतुरशीतिलक्षसप्तनवतिसहस्रसंख्यामितजिनभवनकथनं। द्वादशकल्पानां नामकथनं। तत्र नामानि यथा,—सौधर्म्म ऐशान-सनत्कुमार-माहेन्द्रप्रभृतीनि। कल्पातीतविमानसंख्याकथनं। इन्द्रकसंख्याकथनं। अर्चिरर्चिर्मालिनी-वैर-वैरोचनाख्यानि चत्वारि विमानानि दिग्गतानि, सोमरूपाङ्कस्फटिकाख्यानि चत्वारि

विदिग्गतानि, इत्यादिना विमानानां नामविभागादिकथनं। विमानानां स्थाननिरूपणं। प्रत्येकमिन्द्रकसंख्याकथनञ्च। तत्र नामानि यथा,—ऋतु विमल-चन्द्र-वल्गु-वीर-अरुण नन्दन-नलिन-काञ्चन-रोहितप्रभृतीनि। इन्द्रकाणां विस्तारादिकथनं। विमानानां वर्णकथनं। सौधर्म्मादिद्वादशकल्पेषु देवानां मौलिचिह्नानि यथा,—वराह-मृग-महिष-मत्स्य-कूर्म्म-दर्दुर-तुरग-कुञ्जरप्रभृतीनि। इन्द्रकस्थितनगरवर्णनादिकं। तत सेनामुख्यनिरूपणं। परिषत्संख्यानिरूपण। नगरान्तरालस्थदेवतादिकथनं। तत्र सुरपुरात् वहिः पूर्व्वादिषु दिक्षु अशोकसप्तच्छद-चम्पकादिवनषण्डकथनञ्च। तद्वनमध्यस्थचैत्यवृक्षस्वरूपादिकथनं। लोकपालानां नगरनिरूपणं। सौधर्म्मादिस्वर्गस्थितानां पद्मगन्धा-अलम्बुषाप्रभृतीनां गणिकानां नामादिकथनं। अथ देवीनां तत्परिवारदेवीनाञ्च गृहादिनिरूपणं। देवीनां नामानि यथा,—शची-पद्मा-शिवा-श्यामा-कालिन्दी सुलसाप्रभृतीनि। तत्र शच्याद्यष्टमहादेवीनां विक्रियावल्लभिकादिदेवीसंख्यादिकथनं। इन्द्रस्य प्रासादादिस्वरूपकथनं। विशेषेण सुधर्म्माख्यसभावर्णनं। तत्र वरजिनगेहे सुराणां तीर्थकरभूषणपूजादिकथनं। वैमानिकदेवानां जननमरणान्तरकथनं। अथ लौकान्तिकानाम-वस्थाननिरूपणमुखेन ब्रह्मलोकस्यान्ते अष्टकुला लौकान्तिकाः सुरा निवसन्तीतिनिरूपणं। सामान्यतो देवानां शरीरोत्सेधोच्छ्वासाहारकालादिनिरूपणं। मिथ्यादृष्टिसम्यग्दृष्ट्योः फलकथनं। एकदण्डिचित्रदण्डिप्रभृतीनां परिव्राजिकानां गत्यादिनिरूपणं। देवानामुत्पत्तिस्वरूपकथनादिकं। तेषां जिनपूजारूपमहोत्सवनिरूपणं। अथ अष्टमभूमिस्थितसिद्धक्षेत्रस्वरूपकथनञ्च।

अथ नरलोके द्विहीनचतुःशतजिनगृहकथनं। तिर्य्यक्लोके च द्वापञ्चाशत्संख्यकजिनभवनकीर्त्तनं। मन्दर-कुलपर्व्वत-मानुषोत्तरप्रभृत्यष्टस्थानेषु जिनगृहस्थानकथनं। जम्बूद्वीपे वाणाकार-मन्दरपर्व्वतस्वरूपादिकथनं। तत्र हैमवत-हरि-विदेहरम्यक-हैरण्यवत-ऐरावतरूपवर्षकथनं। तथा हिमवान्, महाहिमवान्, निषधः, नीलः, रुक्मि, शिखरी चेति षट्कुलपर्व्वता इति निरूपणञ्च। पर्व्वतानां प्रत्येकं वर्णकथनं। हिमवदादिषु स्थितानां ह्रदानां नामानि यथा,—पद्मः, महापद्मः, तिगिञ्छः, केसरि, महापुण्डरीकः, पुण्डरीकश्चेति। तत्र जातकमलानां विशेषरूपकथनं। तथाहि,—गन्धामोदितदिक्चक्रं वैदूर्य्यनालं, एकादशोत्तरसहस्रदलं, पृथ्वीसाररूपं कमलमिति। तस्य मृणालस्य त्रिकोशपरिमाणादिकथनं। तत्कमलकर्णिकामध्ये श्रीदेवतायाः रत्नमयगृहकथनं। तन्निवासिनीनां देवीनां नामानि यथा,—श्रीः, ह्रीः, धृतिः, कीर्त्तिः, बुद्धिः, लक्ष्मीश्चेति। अथ परिवारकमलस्थितश्रीदेवतापरिवारसंख्यादिकथनं। उक्तसरोवर-जातनदीनां नामानि यथा,—गङ्गा, सिन्धुः, रोहिता, तासी, तोदा, नारी नरकान्ता, सुवर्णकुला, रूप्यकुला, रक्ता, रक्तोदा चेति। तत्र गङ्गायाः गमनमार्ग-निरूपणादिकं गोमुखीनिमान-कारणकथनं। एवं सिन्धु-रोहितादीनां नदीनां गमनमार्गनिरूपणमुखेन वासनाकथनं। भारतादिवर्षाणां विष्कम्भादिनिरूपणं। भद्रशालादिवनपरिमाणकथनं। भूम्यासाद्यानयनादिप्रकार-कथनं। मेरुनिरूपणं। मन्दनादिषु गिरिषु स्थितानां भवनानां नामादिकथनं। तत्र सोम-यम-

वरुण-कुवेराणां भवनाधिपत्वकथनञ्च । सोमादीनामायुरादिनिरूपणं । नन्दन-मन्दर-निषध-हिमवत्-रजत-रुचक-सागर-वज्राख्यगिरिकूटानां नामधेयकथनं । नन्दनगिरिस्थवापीस्वरूपादिकथनं । तत्प्रासादस्वरूपकथनं । मेरुशिखरस्थितानां शिलातलानां नाम-स्थानादिकीर्त्तनं । तत्र जिनस्य भद्रासनादिनिरूपणं । अथ उत्तरकुरुप्रदेशे नीलगिरेः समीपे सीतानद्याः पूर्व्वतटे मन्दराचलस्य ऐशान्यां दिशि शतयोजनव्यासा जम्बूवृक्षस्थली तिष्ठतीतिनिरूपणं । तत्र स्थल्यां चतुर्जवेदिका द्वादश तिष्ठन्तीतिकथनं । परिवारवृक्षादिकथनं । विशेषेण जम्बूवृक्षवर्णनं । अथ सीतोदापरतीरे निषधगिरिसमीपे देवकुरुक्षेत्रे मनोहरस्थलस्थले शाल्मलिवृक्षस्तिष्ठतीति-तद्वर्णनं । भोगभूमिकर्म्मभूम्योर्विभागकथन यथा,—देवकुरूत्तरक्षेत्रे द्वे उत्तमभोगभूमी, हरिरम्यकक्षेत्रे द्वे मध्यमभोगभूमी, हैमवत-हैरण्यवतक्षेत्रे द्वे जघन्यभोगभूमी स्यातामिति शिष्टानि सर्व्वाणि कर्म्मभूमयश्चेति निरूपणं । अथ यमकगिरिस्वरूपकथनं । मेरोः चतुर्दिक्षु स्थितानां ह्रदानां परिमाणादिकथनं । चित्रगिरिकुलपर्व्वतादिवर्णनं । अष्टदिग्गजपर्व्वतवर्णनं । गजदन्तपर्व्वतानां नामादिकथनं । विदेहदेशविभागादिकथनं तत्र वक्षारपर्व्वतारण्यादिनिरूपणं । ग्राम-नगर-खेट-खर्व्वट-मडम्ब-पत्तन-द्रोण-सम्वाह-दुर्गादिसंख्याकथनं । तत्रत्योपसागरस्थितद्वीपादिवर्णनञ्च । विदेहदेशे ऋतूनां यथाकालोदयेन निरीतिभावत्वकथनं ।

अथ राजाधिराजादीनां लक्षणकथनं । तत्र सेनापतिगणकपति वणिक्पति-अमात्य-पुरोहिताद्यष्टादशश्रेणीनामधिपो राजा, पञ्चशतराजस्वामी अधिराजः, सहस्रराजस्वामी महाराज इत्यभिधीयते—इत्यादिनिरूपणं । तीर्थकरलक्षणं । वत्सा-सुवत्सा-रम्या-सुरम्या-पद्मा-सुपद्मा शङ्खा-नलिन्यादिविदेहस्थदेशानां नामकथनं । तत्रस्थानां नद्यादीनां निर्गमस्थानादिनिरूपणं । अथ विदेहस्य प्रथमविजयार्द्धे पञ्चपञ्चाशन्नगराणि सन्तीति तेषां नामकथनं । ततो विजयार्द्धकृतषट्खण्डमध्ये म्लेच्छखण्डमध्यस्थितवृषभगिरिस्वरूपकथनं । तत्रत्यनगरादिवर्णनञ्च । अथ नाभिगिरीणामवस्थितस्थानादिनिरूपणं । हिमालयादीनां कूटगिरिसंख्यानामादिकथनं । अथ भरतैरावत-प्रभृतिहरिरम्यकक्षेत्रपर्य्यन्तं सर्व्वासां नदीनां संख्या लक्षत्रयं द्विनवतिसहस्राणि द्वादश च (३९२०१२) ज्ञातव्यमितिनिरूपणं मेर्व्वादीनां व्यासानयनप्रकारकथनं । कुरुक्षेत्रादिक्षेत्राणां विष्कम्भाद्यानयनप्रकारकथनं ।

अथ भरतेषु ऐरावतेषु च वर्षेषु अवसर्पिणी, उत्सर्पिणी चेतिकालद्वयं वर्त्तते । ताभ्याञ्च तत्रस्थजीवानां यथासंख्यं हानिवृद्धीभवत इति कथनं । तत्र कालद्वयस्य प्रत्येकं षड्भेदनिरूपणं । यथा,—सुषमसुषमा, सुषमा, सुषमदुःषमा, दुःषमा, दुःषमसुषमा, अतिदुःषमेति । क्रमेण षट्कालानां स्थितिकालनिरूपणं । जीवानामायुःप्रमाणनिरूपणञ्च । एवं षट्सु कालेषु क्रमेण नराणामुत्सेध वर्ण-आहार क्रमादिनिरूपणं । अथ भोगभूमेः स्वरूपकथनं । तत्र जातानामुत्पत्त्यादिविधानकथनं । कर्म्मभूमिप्रवेशक्रमकथनं । तत्र जातानां कुलकराभिधानानां मनूनां नामानि यथा,—क्षेमङ्कर-क्षेमन्धर-सीमङ्कर-सीमन्धर-विमलवाहनप्रभृतीनि । मनूनामन्योन्यमन्तरकालनिरूपणं ।

तंच प्रथमं पञ्चमनवः, अपराधिनो हाकारेण दण्डयन्ति अपरे पञ्च हामाकारेणेत्यादिना मनूनां शासन-शिक्षाप्रणालीनिरूपणं। एवं तेषां वर्णकथनं हत्यनिरूपणञ्च। अथ लौकिकशास्त्रं लोकव्यवहारो दयामूलो धर्मश्च आदिब्रह्मणा निर्म्मित इति कथनं। चतुर्थे काले (दुःषमे) चतुर्विंशतितीर्थङ्कराणामुत्पत्त्यादिकथनपूर्व्वकं पार्श्वजिनवर्द्धमानजिनयोरन्तरोधादिवर्णनं। जिनानामन्तरकालनिरूपणं। जिनधर्म्मोच्छित्तिकालनिरूपणं यथा,—पुष्पदन्तादारभ्य शान्तिनाथावसानेषु सप्तसु अन्तरेषु वक्तृश्रोतृचरिष्णूनामभावात् सद्धर्म्मो नासीदितिवर्णनाकथनं। अथ द्वादशचक्रिणां (जिनानां) नामानि यथा,—भरतः, सगरः, मघवान् सनत्कुमारः, शान्तिजिनः, कुन्थुजिनः, अरजिनः, सुभौमः, महापद्मः, हरिषेणः, जयः, ब्रह्मदत्तश्चेति। एषां स्थितिकालादिनिरूपणं। काल-महाकाल-मानवक-पिङ्गल-नैसर्प्य पद्म-शङ्ख पाण्डु-नानारत्नाख्यरूपनवनिधिनिरूपणादिकं। सेनापति-गृहपति-स्थपतिप्रभृतिचतुर्द्दशरत्नकथनं। त्रिपृष्ठ-स्वयम्भू-पुरुषोत्तम-नारायण-कृष्णादीनामर्द्धचक्रिणां नामादिकथनं। एषां स्थितिकालनिरूपणं। तत्र कृष्णस्तु नेमीश्वरजिनस्य समये उत्पन्न इति कथनं। अर्द्धचक्रिणां प्राप्तगतिकथनं। तत्र कृष्णस्तृतीयां भूमिं प्रापेतिकथनञ्च। भीम-महाभीम-रुद्र-महारुद्र-प्रभृतिनवनारदकथनं। नारदानां कलहप्रियत्ववासुदेवसमकालत्वादिकथनञ्च, भीमावलि-सुप्रतिष्ठ-जितन्धरप्रभृत्येकादशरुद्रनामकथनपूर्व्वकं तेषां स्थितिकालादिनिरूपणं। अथ-पद्मप्रभ-वासुपूज्येन्द्रप्रभ-पुष्पदन्तादीनां तीर्थङ्कराणां वर्णकथनं, वंशकीर्त्तनञ्च। विक्रमाङ्क-कल्किनोः कालनिरूपणं। एवं विंशतिकल्किनामतिक्रमचरमकल्किस्वरूपकथनादिकं। तत्र धर्म्मादीनां विनाशकारणकथनं। प्रलयकाले सम्बर्त्तकानिलादीनामाविर्भावादिवर्णनञ्च।

अथ लवणार्णववर्णनं। तन्मध्यस्थितविजयपूरवर्णनञ्च। लवणार्णवान्तर्गतानां पातालानां वर्णनं। तत्र पूर्व्वस्यां दिशि स्थितानां बड़वामुख-कदम्बक-पाताल-यूपकेसराभिधानानां तेषां परिमाणादिकथनं एवमन्यत्र स्थितानां ज्ञेयं। पातालान्तःस्थितयोः जलानिलयोः वर्णनं। पूर्णिमादौ लवणसमुद्रे जलोच्छ्रायपरिमाणकथनं। द्वीपवर्णनादिकं। कालोदकसमुद्रवर्णनादिकं। धातकीखण्डपुष्करद्वीपादिवर्णनं। मानुषोत्तरसमुद्रवर्णनं। दिक्कूटादिवर्णन। तत्र पूर्व्वदिक्कूटे विजया, वैजयन्ती, जयन्ती, अपराजिता, नन्दानन्दवती, नन्दोत्तरा, नन्दसेनेति दिक्कुमारीकथनं। एवमन्यस्यां दिशि ज्ञेयं। द्वीपसमुद्रादीनामधीश्वरनिरूपणं। एवं वारुण-क्षीर-घृत-क्षौद्र-नन्दीश्वर-अरुणादिद्वीपसमुद्रेषु ज्ञातव्यं। विशेषेण नन्दीश्वरद्वीपवर्णनं। तत्रत्यजिनालयादिवर्णनञ्च। अथ त्रिलोकस्थितानामकृत्रिमाणां चैत्यालयानां सामान्येन व्यासादिनिरूपणं। तत्र जिनप्रतिमास्वरूपादिवर्णनञ्च।

**No. 2042.** आप्तमीमांसितं, आप्तमीमांसालङ्कृतिनामकवृत्तिसहितम्।

Substance, country-made paper, 8 × 4 inches. Folia, 219. Lines, 9, 12 on a page. Extent, 8,018 ślokas. Character, Nágara. Date, Sm. 1525. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

**Áptamímáṅsita,** together with a commentary entitled *Ápta-mímáṅsá-laṅkṛiti.* A treatise on Jain philosophy, explaining the different dogmas, refuting heterodox theories, and giving a philosophical exposition of Jain duties. By Samantabhadra Yati. The commentary is by Vidyánanda.

**Beginning.** वृत्तिग्रन्थस्य। श्रीवर्द्धमानमभिवन्द्य समन्तभद्रमुद्भूतबोधमहिमानमनिन्द्यवाचं।
शास्त्रावतारचितस्तुतिगोचराप्त-मीमांसितं कृतिरलं क्रियते मयास्य ॥१॥
श्रेयः श्रीवर्द्धमानस्य परमजिनेश्वरसमुदयस्य समन्तभद्रस्य तदमलवाचश्च संस्तवनमाप्तमीमांसि-तस्यालङ्करणे तदाश्रयत्वात् तदन्यतमासम्भवे तदघटनात्। इत्यादि।

मूलग्रन्थस्य। देवागमनभोयानचामरादिविभूतयः।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान्॥
अध्यात्मं वहिरप्येष विग्रहादिमहोदयः।
दिव्यः सत्यो दिवौकःस्वप्यस्ति रागादिमत्सु सः॥ इत्यादि।

**End.** मूलस्य। जयति जगति क्लेशावेशप्रपञ्चहिमांशुमान्
विहतविषमैकान्तध्वान्तप्रमाणनयांशुमान्।
यतिपतिरजो यस्याधृष्यान्मताम्बुनिधेर्लवान्
स्वमतमतयस्तीर्थ्या नानापरे समुपासते॥

वृत्तिग्रन्थस्य। येनाशेषकुनीतिवृत्तिसरितः प्रेक्षावतां शोषिता-
यद्वाचोऽप्यकलङ्कनीतिरुचिरास्तत्त्वार्थसार्थद्युतः।
स श्रीस्वामिसमन्तभद्रयतिभृद्भूयाद्विभुर्भानुमान
विद्यानन्दफलप्रदोऽनघधियां स्याद्वादमार्गाग्रणीः॥

**Colophon.** इत्याप्तमीमांसालङ्कृतौ दशमः परिच्छेदः।
श्रीमदकलङ्कशशधरकुलविद्यानन्दसम्भवा भूयात्।
गुरुमीमांसालङ्कृतिरष्टसहस्री सतामृद्ध्यै॥
श्रीमूतामलसंघमण्डलमणिः श्रीकुन्दकुन्दान्वये
श्रीदेशीगणगच्छपुस्तकभिधा ( ? ) श्रीदेवसंघाग्रणीः।
श्लोकस्यापरार्द्धं नास्ति।

संवत् १५२५। वष पौषसुदि ९। शुक्रवासरे। शुभं भवतु लेखकपाठकयोः।

पुस्तके यादृशं दृष्टं तादृशं लिखितं मया।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥
ऋषभादीन् जिनान् वर्द्धमानान्तान् प्रणिपत्य वै।
अष्टसहस्रीयां प्रशस्तिं विदधे क्रमात्॥
टवक्राख्ये पुरे श्रीमज्जिनमन्दिरसुन्दरे।
शकेन्द्रेऽशावदीनाङ्के मह्यीं पाति स्वतेजसा॥
श्रीविक्रमसेनसाम्राज्याच्छते पञ्चदशाहते।
वर्षाणां पञ्चविंशत्या नवम्यां कृष्णपौषके॥

विषयः। १ प्रथमपरिच्छेदे,—भगवतः स्तवनीयत्वकथनं। तथाहि भगवान् महानिति भवति तीर्थकरत्वात् विग्रहादिमहोदयत्वाच। यो महान् न भवति स तीर्थकरो न भवति, यथा-ऽस्मदादिः, तस्मात् तीर्थकरस्वामी महान् भवतीतिनिरूपणं। अत्र प्रमाणसंप्लवादिसम्वादक-थनं। सुगतकपिलादीनामाप्तत्वखण्डनपुरःसरं तीर्थकरस्य भगवत आप्तत्वव्यवस्थापनं।

अथ न कश्चित् पुरुषः सर्व्वज्ञः स्तुत्यः श्रेयोऽर्थिनां, श्रुतेरेव श्रेयःसाधनोपदेशसिद्धेरिति मीमां-सकमतोपन्यासपूर्व्वकं तत्खण्डनं। अथ स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ भावनैव वाक्यार्थ इति भाट्टाः। नियोग एव वाक्यार्थ इति प्राभाकराः। विधिरेव वाक्यार्थ इति वैदान्तिका इत्येषां मतोपपादनपुरःसरं परस्परं विप्रतिपत्तिप्रदर्शनं। अथ सौगतमतेन अन्यापोह एव शब्दार्थ इति निरूपणमुखेन तन्मतेन शब्दवादखण्डनं। तथाहि वस्तुस्वभावाभिधायकत्वाभावेन नियोगनिरा-करणेऽपि विधेर्वाक्यार्थत्वघटनात् न भावना वाक्यार्थः सिद्धो भट्टस्येति न मनसि विधेयं। विधेरपि प्रमाणप्रमेयतदुभयरूपाद्यष्टविधविकल्पसङ्कुलतया बाध्यमानत्वात्। तथाहि प्रमाणं विधिरिति-कल्पनायां प्रमेयं किमपरं स्यात्, तत् स्वरूपमेवेति चेन्न सर्व्वथा निरंशस्य सन्मात्रदेहस्य विधेः प्रमाणप्रमेयरूपद्वयविरोधात्। कथमिदानीं उपनिषद्वाक्यं प्रतिभाससामान्यादन्यत् कथं वा तत् परिकल्पिताद्वाक्यात् लिङ्गाद्वा परमार्थपथावतारिणः परब्रह्मणः प्रतिपत्तिः, तथात्वे परिकल्पिता-द्धूमादेः पारमार्थिकपावकादिप्रतिपत्तिः प्रसज्येत। अतएव कथमिदानीमन्यापोहः शब्दार्थ इति प्रतिषिध्यते। वस्तुस्वरूपाभिधायिनोऽपि शब्दस्य अन्यापोहानभिधायित्वे अन्यपरिहारेण क्वचित् प्रवृत्तिनिबन्धनतापायाद्विधिरपि शब्दार्थो माभूदिति समुदितार्थः। अथ विधेरप्रवर्त्तक-त्वनिरूपणं। तथाहि विधिः प्रवर्त्तकविधिः प्रवर्त्तकस्वभावो वा स्यादप्रवर्त्तकस्वभावो वा। आद्यश्चेत् वैदान्तिकानामिव सौगतादीनामपि प्रवर्त्तकः स्यात्। ननु तेषां विपर्य्ययात् न प्रवर्त्तक इति चेन्न, तत एव वैदान्तिकानामपि अप्रवर्त्तक इति वक्तुं शक्यते तदुभयोः समानाक्षेपसमाधानत्वात्। यदि पुनरप्रवर्त्तकस्वभाव एव विधिस्तदा कथं वाक्यार्थः स्यान्नियोगवत्। यथा,-विधिः वाक्यार्थो न अप्रवर्त्तकत्वात् नियोगवदित्यनया च दिशा विधेः फलरहितत्वादिकमूहनीयं। तदनेन प्रकारेण

आक्षेपप्रदर्शनादिपूर्व्वकं भावनैव वाक्यार्थ इति निष्कर्षकथनं। तथाहि न परोदितो विधिर्वा-
क्यार्थः सिद्ध्यति, नियोगस्यैव वाक्यार्थत्वोपपत्तेः। अथ नियोग एव वाक्यार्थोऽस्त्वित्यपि न युक्तं
तात्पर्य्यवन्नियोगस्य वाक्यार्थतया प्रतीत्यभावात् नियोगविध्यादिस्वरूपप्रतिपादके सर्व्वत्र वाक्ये
भावनाया एव वाक्यार्थत्वप्रतीतेः सैव वाक्यार्थः। सा च द्विविधा शब्दभावना अर्थभावना च।
एतत् स्वरूपादिविवेचनं। प्रवर्त्तकज्ञानविवेचनं। तत्र द्रव्यवादी सांख्यो भेदं संकल्पितं मन्यते,
तथा पर्य्यायवादी बौद्धः अभेदं संकल्पितत्वेन मनुते। एवमुभयोस्तथात्वे वस्तुनः सर्व्वथापि अर्थ-
क्रियाकारित्वं न घटते इति विवेचनं। तत्र च पुरुषाद्वैतवत् संवेदनाद्वैतस्य च निराकरणं।
तथा सामान्यविशेषयोः वस्तुस्वरूपयोः सर्व्वथा ऐक्यमिति बौद्धमतनिराकरणं। अथ दृश्यानुपल-
ब्धिरभावं साधयति। अदृश्यानुपलब्धिश्च संशयं साधयतीतिमतनिराकरणं। विज्ञानवादखण्डनं।
इत्यन्येन प्रकारेण बौद्ध-भट्ट-प्रभाकर-सांख्य-वेदान्तिकनयनिराकरणपूर्व्वकं सुगतादयः परस्पर-
विरुद्धक्षणिकनित्याद्यनेकान्तसमयाभिधानिनः सर्व्वे न सर्व्वदर्शिन इति तथा श्रुतयोऽपि परस्पर-
विरुद्धकार्य्यस्वरूपाद्यर्थाभिधायिन्यः सर्व्वा न प्रमाणभूता इति निरूपणं। किञ्च, कस्या अपि श्रुतेः
प्रामाण्यं नास्तीतिनिर्णयः। प्रामाण्यवादः तत्र चार्व्वाकमतखण्डनपुरःसरं अनुमानादिप्रामाण्यसंस्था-
पनं। तत्त्वोपप्लववादिमतनिरसनं। अतत्त्वोपप्लववादिमीमांसकविशेषमतनिरसनं। प्राचीननै-
यायिकमतदूषणं। प्रामाण्यं स्वतोग्राह्यमितिमतखण्डनं। बौद्धमतखण्डनं। सांख्यमताक्षेपकीर्त्तनं।
वेदान्तिकमतदूषणं। अभ्यासदशायां स्वतःप्रामाण्यमनभ्यासदशायान्तु परत एव गृह्यत इत्यनेकेषां
मतकथनं। अनेकान्तवादकथनं। अथ सुनिश्चितासम्भवद्बाधकप्रमाणत्वमिति स्याद्वादिनः स्वम-
तनिष्कर्षकीर्त्तनञ्च। तथा अनेकप्रमाणवादिनामपि कपिलकणभक्षाक्षपादपातञ्जलवेदान्तिक-
नैयायिकसौगतादीनामनिच्छतामपि प्रमाणान्तरतया मताक्षेपपुरःसरमूहस्य प्रमाणान्तरत्व-
संस्थापनं। अथ यदसत् तत्र सुनिश्चितासम्भवद्बाधकप्रमाणं। यथा मरीचिकायां सलिलं सम्भव-
द्बाधकप्रमाणं। यथा च मेरुमूर्द्धनि मोदकं सन्दिग्धासम्भवद्बाधकं। सुनिश्चितासम्भवद्बाधकप्रमा-
णश्च सर्व्वज्ञ इत्यनेन प्रकारेण प्रकृते सर्व्वज्ञे सिद्धसाधनतानिरूपणं। चेतनस्य आत्मनोऽज्ञानावरणा-
दिकर्म्म एव मदिरादिवत् मोहोदयकारणमितिनिरूपणं। अथ दोषो हि तावद्ज्ञानं ज्ञानावर-
णस्योदये जीवस्य स्यादितिनिरूपणं। विज्ञानवादखण्डनं। पृथिव्यादौ चेतनादिगुणस्य अभावो-
ऽनुपलम्भान्यथानुपपत्तेरिति पृथ्व्यादिमयशरीरादात्मनः पृथक्त्वादिनिरूपणं। यस्मान्मणेः मलाका-
देः व्याहृत्तिः क्षयः सतोऽत्यन्तविनाशानुपपत्तेः। तादृगात्मनोऽपि कर्म्मणां निवृत्तौ परिशुद्धिः। प्रध्वं-
साभावो हि क्षयो हानिरिहाभिप्रेता सा च व्याहृत्तिरेव मणेरिति मलापनयनेऽपि नात्मनो हानिरे-
वेति निरूपणं। अभावखण्डनं। आत्मनि अज्ञानरूपमलस्य आगन्तुकत्वनिरूपणं। अत्र बौद्धादि-
मतनिरसनं। तथा संसारकारणं मिथ्यादर्शनादिकं, तन्निवर्त्तकञ्च सम्यग्दर्शनादिकमिति निर्णयः।
आत्मनः ज्ञानादिगुणस्वभावत्वकथनेन दोषस्वभावत्वासिद्धेः दोषस्य कादाचित्कत्वादिकथनं।
क्षणिकत्ववादनिराकरणं। अथ अर्हद्भगवान् निर्दोषो युक्तिशास्त्राविरोधिवचनत्वात्, तथा

भगवान् युक्तिशास्त्राविरोधिवचनो भवति तदभिमततत्त्वस्य प्रमाणेन अबाध्यमानत्वादित्यादिप्रकारेण तस्य निर्द्दोषत्वादिकीर्त्तनमुखेन अर्हन्नेव परमात्मेति निरूपणं। मोक्षसाधनप्रमाणकथनं। मोक्षस्वरूपविवेचनं। तथा हि बन्धहेत्वभावनिर्ज्जराभ्यां कृत्स्नकर्म्मविप्रमोक्षो मोक्ष इति निष्कर्षकथनं। पूर्व्वजन्मप्रेत्यभावादिनिरूपणमुखेन चार्व्वाकमतखण्डनं। ज्ञानज्ञेययोर्भेदनिरूपणप्रसङ्गेन योगाचारादिमतखण्डनं। भूतचेतनयोर्भिन्नलक्षणत्वनिरूपणं। देहादेरात्मनोऽतिरिक्तत्वव्यवस्थापनं। संसारस्य अनाद्यनन्तत्वादिवादखण्डनमुखेन मिथ्यादर्शनाविरतिप्रमादकषाययोगानां बन्धहेतुत्वकथनं। ज्ञानादीनामात्मस्वभावत्वकथनमुखेन सांख्यमतखण्डनं। व्याप्यव्यापकभावनिरूपणप्रसङ्गेन अविनाभावस्वरूपविवेचनं। व्याप्तिग्रहोपायादिकथनं। आत्मनोऽनर्थान्तरभूतानां सुखादीनां चेतनत्वव्यवस्थापनं। अत्र योगादिमतखण्डनं। रूपवेदनादिपञ्चस्कन्धवादिनां सौगतानां मतखण्डनं। प्रत्यक्षप्रमाणविवेचन। न्यायावयवकथनं। धर्म्मकीर्त्तिमतानुसारेण निग्रहस्थानादिस्वरूपनिरूपणं। पुण्यपापनिरूपणं। अत्र शून्यवादादिखण्डनं। सत्त्वाद्वैतवादखण्डनं। भावैकान्तवादखण्डनं। वस्तुनानात्ववादव्यवस्थापनं। अद्वैतवादखण्डनं। प्रागभावादिवादव्यवस्थापनं। अत्र सौगतमतादिखण्डनं। नैयायिकस्वीकृतप्रागभाववादखण्डनं। शब्दप्रमाणविवेचनं। अत्र मीमांसकादिमतखण्डनं। शब्दानां अनित्यत्ववादव्यवस्थापनं। वर्णानामेकत्ववादखण्डनं। एकतत्त्ववादखण्डनं। द्रव्यादिसम्बन्धचतुष्टयसिद्धिनिरूपणं। मायोपमाः स्वप्नोपमाश्च सर्व्वे भावा इति सौगतमतखण्डनं। निर्विकल्पकदर्शनादौ स्वालक्षण्यवादखण्डनं। सप्तभङ्गीन्यायस्वरूपादिविवेचनं। तत्र अविनाभावादिसम्बन्धस्वरूपकथनं। अद्वैतवादखण्डनं। नित्यत्वैकान्तवादप्रतिक्षेपकीर्त्तनं। प्रत्यभिज्ञानस्वरूपविवेचनं। कार्य्यकारणस्वरूपनिरूपणादिकं। द्रव्यपर्य्याययोः नानात्वनिरूपणादिकं। स्वलक्षणत्वस्वरूपकथनं। प्रमाणाभासखण्डनं। संवेदनस्य जीवधर्म्मत्वनिरूपणं। जीवलक्षणादिकथनञ्च। परमाणुवादसंस्थापनं। दैवपुरुषकारयोरुभयोरेव मिलितयोः फलजनकत्वनिरूपणं। पुण्यपापभेदात् दैवस्य द्वैविध्यनिरूपणादिकं। तत्र पुण्यपापास्रवहेतुनिरूपणं। मिथ्यादर्शनाविरतिप्रमादकषाययोगानां बन्धहेतुत्वनिरूपणं। संक्लेशादिनिरूपणञ्च। जीवस्य गत्यागतिकथनं। ईश्वरस्य जगन्निमित्तकारणत्वादिवादखण्डनं। अतो धर्म्माधर्म्माभ्यामेव शरीरादिकार्य्यजननमितिनिरूपणं। केवलज्ञानप्राप्तानां चित्तवृत्तिकथनं। वस्तुतत्त्वस्य अनेकान्तत्वव्यवस्थापनं। सम्यग्दर्शनज्ञानचारित्ररूपमोक्षकारणकथनञ्च।

---

**No. 2043. भगवतीवृत्तिः।** Substance, country-made paper, 13¼ × 5 inches. Folia, 217. Lines, 21 on a page. Extent, 18,144 ślokas. Character, Nágara. Date, Sm. 1399. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

**Bhagavatí-vṛitti.** A Sanskrit commentary on the Bhagavatí Sútra, a Jaina work in Mágadhí on *Vivádha-prajṇápti*—or unfailing knowledge—*i. e.*, knowledge leading to absolute emancipation. The codex comprises only the fifth or last book. Anonymous.

**Beginning.** सर्व्वज्ञमीश्वरमनन्तमसङ्गमग्र्यं सर्व्वीयमस्मरमनीशमनीहमिद्धं ।
शिवं शिवकरं करणव्यपेतं श्रीमज्जिनं जितरिपुं प्रयतः प्रणौमि ॥ १ ॥
नत्वा श्रीवर्द्धमानाय श्रीमते च सुधर्म्मणे ।
सर्व्वानुयोगवृद्धेभ्यो वाण्यै सर्व्वविदस्तथा ॥ २ ॥
एतट्टीकाचूर्णी जीवाभिगमादिवृत्तिलेशांश्च ।
संयोज्य पञ्चमाङ्गं विवृणोमि विशेषतः किञ्चित् ॥ ३ ॥

**End.** पुस्तकलेखकक्कता नमस्कारा: प्रकटार्थाश्चेति न व्याख्याताः ॥

**Colophon.** इति भगवतीविशेषवृत्तिः समाप्ता ॥

**विषयः ।** भगवतीसूत्रपञ्चमाङ्गस्य व्याख्यानं ।

---

**No. 2044.** काव्यकौमुदी । Substance, country-made yellow paper, 14¼ × 3 inches. Folia, 52. Lines, 5 on a page. Extent, 765 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

**Kávya-kaumudí.** A concise treatise on rhetoric. Anonymous.

**Beginning.** नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

**End.** तथा च दण्डी ॥ ते चाद्यापि विकल्पन्ते कस्तान् कार्त्स्न्येन वक्ष्यतीति ।

**Colophon.** इति काव्यकौमुद्यां शब्दार्थालङ्कारनिरूपणं तृतीयः परिच्छेदः ॥
इति काव्यालङ्कार-गुणदोषप्रकाशिनी ।
आमोदयतु सर्व्वतःकुमुदं काव्यकौमुदी ॥

**विषयः ।** अत्र काव्यस्वरूप गुण-दोषालङ्कृतीनां निरूपणं ॥

---

**No. 2045.** वैदिकलिङ्गार्थविवेचनम् । Substance, country-made paper, 12¼ × 5½ inches. Folia, 4. Lines, 11 on a page. Extent, 150 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

**Vaidika-liṅartha-vivechana.** A disquisition on the use of the potential mood in the Vedas. The codex is incomplete, and the author's name cannot be made out.

**Beginning.** यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं ।
प्राप्यते सततं वन्दे गोविन्दं भक्तवत्सलं ॥ १ ॥
अनन्तगुणसम्पन्नमनन्तमजमव्ययं ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणं ॥ २ ॥
इह खलु परमकारुणिकेन भगवता जैमिनिमहर्षिणा अथातो धर्म्मजिज्ञासेत्यादिना द्वादशसु अध्यायेषु धर्म्मो विचारितः । तत्र वेदेन प्रयोगमुद्दिश्य विधीयमानोऽर्थो धर्म्मः । यथा यागादिः ।

**End.** भावार्थाधिकरणवासनावासितानां भवत्

**Colophon.** इतः परं खण्डितं ।

विषयः । यजेतेत्यत्र प्रत्ययगतलिङ्त्वांशेन पुरुषप्रवृत्त्यनुकूलव्यापाररूपायाः शाब्दीभावनायाः प्रतीयमानत्वमित्यादिविवेचनं ॥

---

**No. 2046.** शारीरकमीमांसाभाष्यविवरणं, वा प्रकटार्थः । Substance, country-made paper, 10¾ × 4 inches. Folia, 149. Lines, 15 on a page. Extent, 10,500 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

**S'áríraka-mímáñsá-bháshya-vivarana** alias **Prakaṭártha.** A gloss on S'aṅkara's commentary on the Vedánta-sútra. Anonymous.

**Beginning.** सत्यं ज्ञानमनन्तं यत् कूटस्थं सुखविग्रहं ।
नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ॥
ज्ञात्वापि यस्य बहुकालमचिन्तनेन
व्याख्यातुमक्षमतया परितापिचेताः ।
तस्योपतापप्रशमाय मयैव भाष्ये
प्रारभ्यते विवरणं प्रकटार्थमेतं ॥

**End.** शुद्धं ब्रह्माख्ययं नित्यमक्षरं परमं पदं ।
तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया ॥

**Colophon.** इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे श्रीमच्चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तश्चायं ग्रन्थ इति ॥

विषयः। शारीरकमीमांसाभाष्यव्याख्यानं ॥

---

No. 2047. शिवार्कोदयः। Substance, country-made paper, 11 × 5 inches Folia, 333. Lines, 11 on a page. Extent, 9,880 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

**S'ivárkodaya.** A metrical gloss on the metrical scholia of Bhaṭṭa Kumárila Svámí, on S'aṅkara's commentary on the Mímáṇsá Sútra of Jaimini. By Gágá Bhaṭṭa *alias* Viśveśvara Bhaṭṭa, son of Dinakara, grandson of Rámakrishṇa, and great-grandson of Náráyaṇa Bhaṭṭasurí.

**Beginning.** आद्येऽध्याये धर्ममानं प्रमाणं मानाधीना मेयसिद्धिर्यतो हि।
आद्ये पादे मानतोद्यानामुक्ता वाचामर्थवादादिभागे ॥ १ ॥

**Colophon.** इति श्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णात्मजभट्टदिनकरसुतगागाभट्टकृतः शिवार्कोदयः समाप्तः ॥

विषयः। श्लोकैर्भट्टकुमारिलप्रणीतमीमांसासूत्रवार्त्तिकाविस्तृतांशस्य पद्यैर्निर्व्वचनं ॥
पुस्तकमिदं खण्डितं।

---

No. 2048. मीमांसाकुसुमाञ्जलिः। Substance, country-made paper, 12 × 5 inches. Folia, 439. Lines, 8—9—10 on a page. Extent, 11,264 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

**Mímáñsá-kusumáñjali.** A scholia on the Mímáñsá Sútra of Jaimini. By Gágá Bhaṭṭa *alias* Viśveśvara Bhaṭṭa, son of Dinakara Bhaṭṭa. The codex is very defective.

**Beginning.** निर्विघ्नमस्तु। वन्दे नन्दकुमारस्यातिमनोहारिरूपस्य।
तनयाधापरिचरणौ चरणौ करुणानिधेः सुखधेः ॥ १ ॥
सारं यत् श्रुतिशिरसां दुष्पापं यन्मनोवचसां।
तत् कौशल्यवचसां शिवापापावसो वन्दे ॥ २ ॥
उमामहेशसदृशौ लक्ष्मीनारायणाविव।
प्रभादिवाकरसमौ पितरौ समुपास्महे ॥ ३॥

मीमांसाकुसुमानामञ्जलिरेषोऽञ्जल्यादृशः ।
श्रीरामपादलग्ना वासेन दिशः कृतार्थयतु ॥ ४ ॥
विश्वेश्वराग्रराजस्य गागाभट्टमनीषिणः ।
कृतिः करोतु कृतिनां हृदये वासमादरात् ॥ ५ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । पूर्व्वपादे विधिनिषेधयोर्वेद्त्वेन सामान्येन विशेषरूपेण च प्रामाण्ये सिद्धे अधुनोपस्थितेषु भाषान्तरेषु प्रामाण्यं प्रतिपाद्यते ॥

Colophon. इति मीमांसकभट्टदिनकरसूनुगागाभट्टापरनामकविश्वेश्वरभट्टविरचिते मीमांसाकुसुमाञ्जलौ दशमाध्यायस्याष्टमः पादः ॥

विषयः । मीमांसासूत्रव्याख्यानं । पुस्तकमिदं प्रथमे मध्ये चरमे च खण्डितं ॥

---

**No. 2049.** महारामायणं वा वाशिष्ठरामायणं, वाशिष्ठतात्पर्य्यप्रकाशनामटीकासहितं, उत्तरार्द्धं । Substance, country-made paper, $15\frac{1}{4} \times 9$ inches. Folia, 1,509. Lines, 16 on a page. Extent, 75,000 Slokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

**Mahárámáyaṇa** alias **Vaśishṭha-rámáyaṇa**. A version of the history of Ráma, distinct from that of Válmíki. Usually attributed to the sage Vaśishṭha, but probably of a much later date, and founded on the work of Válmíki. The work is divided into two parts, of which the first treats of the history of Ráma, and the second expounds, in a dialogue between Ráma and Vasishṭha, the principles of the Yoga doctrine as the most approved means of final emancipation. In this respect it appears like an imitation of the Bhagavadgítá. The leaning of the former is more in favour of the Yoga, and that of the latter in favour of the Vedánta; but in neither case is the following faithful.

**Beginning.** अजमजयमनाद्यनन्तमन्तर्निसुखतोषमदृद्वितीयं पूर्णं ।
शिवमखिलहृदि स्फुरत्स्वमायाविकशितविश्वविलासमानताः स्म ॥ १ ॥
स्तुतिफलितसमस्ताभीष्टमुद्दिनेशप्रतिभटनिजशोभाशान्तविघ्नान्धकारं ।
कमपि शिवभवान्योरङ्कभोभाग्यमन्तःसुरमणिमवलम्बे चारुलम्बोदराख्यं ॥ २ ।
मृगपक्षितार्चितमनोज्ञमुखस्वर्दिव्यं स्निग्धाम्रतप्रतिमचारुफलपाकटाच ।
अपेयरेनुस्कृतं मुनिभिर्मुनीनां न्यग्रोधमूलवसतिं गतमाश्रयामः॥ ३ ॥

त्रिभुवनभावनलत्यक्ततोदयः सदभयामलबोधसुखोदयः ।
सुजनहृद्गिरिगह्वरकेशरी शरणमस्तु सदा नरकेशरी ॥ ४ ॥

दक्षे वराक्षवलयावभयञ्च वामे या पुस्तकञ्च दधती विधिनेत्रपेया ।
सा शारदाब्जनयना शरदिन्दुशोभा भासा स्वया हरतु मे हृदयान्धकारं ॥ ५ ॥

ये नेत्राणि हरस्य यैर्जगदिदं प्रद्योतितं चेष्टते
ये नैवापतते श्रुतिस्मृतिनुतो धर्म्मः स धर्म्मोदयः ।
ये कालं कलयन्ति ये च परमस्वर्ज्योतिरात्मोपमा-
स्ते सूर्य्येन्दुमखा भवन्तु हृदि मे बोधाब्जिनीभानवः ॥ ६ ॥

वक्त्रोन्दुभिर्दिक्षु तमोहरद्भिर्वेदार्थसारामृतमुद्गिरन्तं ।
वाणीभुजाश्लिष्टमभीष्टसिद्ध्यै तं ब्रह्मविद्यादिगुरुं प्रपद्ये ॥ ७ ॥

यद्वाक्यामृतपायिनां प्रतिपदं सत्यं सुधा नीरसा
यद्वाक्यार्थविचारणादभिमतः स्वर्गोऽपि कारागृहं ।
यद्वाणीविशदात्मपूर्णमनसां तुच्छं जगत् तूलवत्
तस्मै श्रीगुरवे वशिष्ठमुनये नित्यं नमस्कुर्म्महे ॥ ८ ॥

यस्यार्षप्रथिता जगत्प्रथयिता सा वेदमाता परा
यश्चक्रे तपसा वशे सुरगणानन्याम् सिसृक्षुर्जगत् ।
तं बोधाम्बुनिधिं तपस्विमुकुटालङ्कारचिन्तामणिं
विश्वामित्रमुनिं शरण्यमनघं भूयो नमस्याम्यहं ॥ ९ ॥

श्रुत्या ब्रह्मेव रामः प्रकटितमहिमा येन तस्मै वशिष्ठः
यः सीतां ब्रह्मविद्यामिव सदसि पुनः सत्यशुद्धां किलादात् ।
यद्वाणी मोहमूलं शमयति जगदानन्दसन्दोहदोग्ध्री
तस्मै वाल्मीकये श्रीगुरुतमगुरवे भूरिभावैर्नताः स्म ॥ १० ॥

पूर्णानन्दस्वभावस्वजनहितकृते माययोपात्तकायः
कारुण्यादुद्दिधीर्षुर्जनमनवरतं मोहपङ्के निमग्नं ।
आविश्यान्तर्वशिष्ठं वचिरपि कलयन् शिष्यभावं वितेने
यः संवादेन शास्त्रामृतजलधिममुं रामचन्द्रं प्रपद्ये ॥ ११ ॥

विद्याभिः सह विश्रुता श्रितवती येषां मुखं भारती
सत्त्वोत्कर्षसमाधिभिः स्थिरमहो तद्ब्रह्म येषां हृदि ।
पादाम्भोरुहमाश्रिताश्च सततं तीर्थैः समं सम्पदः
श्रीसर्व्वज्ञसरस्वतीतिविदितान् श्रीमद्गुरूंस्तान् भजे ॥ १२ ॥

श्रीः संश्रितैव चरणौ हृदयञ्च रामचन्द्रो मुखं गुणभरेण सरस्वती च ।

येषामतस्तदभिधाङ्कितनामधेयान् श्रीमद्गुरून् गुरुतरान् प्रणतोऽस्मि नित्यं ॥ १३ ॥

तापध्वान्तव्याप्तलोकावनकटाक्षव्याख्यावाणीनिर्द्दिष्टसर्व्वाङ्घ्रिशरण्यान् ।
श्रीमद्रामानन्दमुनीनद्भुतचर्य्यानार्य्यान्नित्यं देशिकवर्य्यान् प्रणतोऽस्मि ॥ १४ ॥

विश्वेशोऽपि हरिः शरण्यचरणो यान् मानयन् सौहृदा-
दास्मान्नित्यमनुव्रजामि रजसा पूये पचेताब्रवीत् ।
यत्पूजां विदधे श्रुतिर्मतिमतां सर्व्वेष्टसिद्ध्यै सदा
जीवन्मुक्तसुखात्मपूर्णमनसस्तान् ब्रह्मनिष्ठान् भजे ॥ १५ ॥

कृतिभिरसुकराः क्व नु प्रबन्धाः क्व च ते बालिशबुद्धिरेष जन्तुः ।
तदपि विरचनेऽत्र सद्गुरूणां सदयनिरीक्षणमेव मेऽवलम्बः ॥ १६ ॥

अशेषविद्याम्बुधिपारगानामपास्तरागादिमनोमलानां ।
कृपानिधीनां कृतिनां ममास्मिन् सतां पदाब्जस्मरणं सहायः ॥ १७ ॥

यत्कृपालेशमात्रेण तीर्य्योऽस्मिन् भवसागरं ।
श्रीमद्गङ्गाधरेन्द्राख्यान् श्रीगुरूंस्तान् सदा भजे ॥ १८ ॥

आनन्दबोधयतिना श्रीमद्गुरुवचोऽमृतैः ।
वाशिष्ठार्थप्रकाशोऽयं यथामति वितन्यते ॥ १९ ॥

प्रशंसन्तु स्वैरं मतिभिरथ निन्दन्तु सुधियः
प्रवृत्तिर्मे यस्मान्न भवति जनाराधनकृते ।
अनेन व्याजेनामृतरसवशिष्ठोक्तिभरिते
विहर्त्तुं वाञ्छामि प्रतिदिवसमानन्दजलधौ ॥ २० ॥

यथामति बुभुत्सुभ्यः साहाय्यं सङ्कटेष्विव ।
दुरूहश्लोकभावेषु दर्शयिष्ये परिश्रमं ॥ २१ ॥

स्थितमेकरसे युक्त्या नानारसविजृम्भणं ।
वाशिष्ठं रोचयत्येतत् सुभोज्यं लवणं यथा ॥ २२ ॥

अप्यल्पमतिदुर्बोधं स्फुटं व्याख्यास्यते पदं ।
द्विचिव्याख्यातपूर्व्वन्तु दुरूहमपि मोक्ष्यते ॥ २३ ॥

अनन्यपूर्व्वव्याख्यातं ग्रन्थं मे व्याचिकीर्षतः ।
सन्तः श्रमज्ञाः कृपया क्षमध्वं स्खलितं क्वचित् ॥ २४ ॥

अथ जगदिदमनादिमहामोहनिशासुप्तमनवरतदुःस्वप्नभ्रमपरम्पराकल्पिते जन्मजरामयमरण-हर्षामर्षशोकाद्यनर्थसंकटसहस्रसंकुले महातिग्रहव्याघ्रभीषणे तापत्रयदावानलज्वालामालाकुले षडूर्मिजालेऽतिषड्वर्गव्याधबध्यमानप्राणिनिकाये संसारमहारण्ये मुह्यमानं विवेकान्धं प्रबोधोपाय-दौर्लभ्याद्विषीदन्तं समुद्वीक्ष्य शास्त्रभामूदयेन तत्प्रबोधनाय भगवतः पद्मजन्मनः शासनात्

स्तस्य प्रवर्त्तमानः परमकारुणिको भगवान् वाल्मीकिः प्रारिप्सितस्य महतः शास्त्रस्य निर्व्विघ्न-परिसमाप्तिप्रचयगमनादिसिद्धये वक्ष्यमाणश्रुतिस्मृतिसदाचारप्रापितं सर्व्वविघ्नमूलोच्छेदक्षमं सच्चिदानन्दाद्वयप्रत्यगात्मपरब्रह्मप्रणतिलक्षणं मङ्गलमाचरन् अर्थाच्छास्त्रस्य विषयं योजने तटस्थ-स्वरूपलक्षणाभ्यां संक्षिप्य दिदर्शयिषुः प्रथमं यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेतिश्रुत्युक्ततटस्थलक्षणसिद्धसदद्वयस्वभावं तत्पदार्थं नमस्यति यत इति ॥

मू० । यतः सर्व्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
तत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥

End. यत् सर्व्वं खल्विदं ब्रह्म तज्जलानि तिच(?)स्फुटं ।
श्रुत्या स्फुदीर्य्यते सान्ति तस्मै ब्रह्मात्मने नमः ॥ २५ ॥

Colophon. इति श्रीमद्वाराामायणे निर्व्वाणप्रकरणे उत्तरार्द्धे बालकाण्डे मोक्षोपाये दैव-हतोक्ते शतसाहस्र्यां संहितायां वाशिष्ठे ब्रह्मदर्शने षोड़शोत्तरद्विशततमः सर्गः २१६ । सम्पूर्णश्चेदं निर्व्वाणप्रकरणमुत्तरार्द्धमिति शिवं ।

टी० । वाक्यपुष्पाञ्जलिः सोऽयं मया भक्त्या समर्पितः ।
धियः प्रेरकयोः श्रीमच्छिवयोः श्रीपदाब्जयोः ॥ ४ ॥

इति श्रीवाशिष्ठतात्पर्य्यप्रकाशे निर्व्वाणप्रकरणे उत्तरार्द्धे षोड़शोत्तरद्विशततमः सर्गः २१६ इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीसर्व्वज्ञसरस्वतीपादशिष्यश्रीरामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीगङ्गाधरेन्द्रसरस्वत्याख्यभिक्षोः शिष्येण आनन्दबोधेन्द्रभिक्षुणा विरचितः श्रीवाशिष्ठतात्पर्य्य-प्रकाशः सम्पूर्ण इति ॥

विषयः । वाशिष्ठोत्तरार्द्धव्याख्यानं। वाशिष्ठोत्तरार्द्धे तु रामवशिष्ठसंवादेन निर्व्वाणमोक्ष-निरूपणं ।

---

**No. 2050. ईश्वरगीताभाष्यम् ।** Substance, country-made paper, 11½ × 3¼ inches. Folia, 105. Lines, 9 on a page. Extent, 3,120 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

**Iśvaragítá-bháshya.** A commentary on an episode of the Kúrma-purána. By Vijnána Bhikshu. In this episode Súta expounds to the sages assembled in the Naimisha forest the principles of the Vedánta doctrine. It is obviously an imitation of the Bhagavadgítá, but it differs from its archetype in dwelling exclusively on Vedántism, instead of mixing it with the Sáñkhya and the Yoga doctrines. The text has already been noticed, see vol. I, p. 257.

**Beginning.** यो मायया विगुणया विरचय्य विश्वमंशैः प्रविश्य यच्छतोऽभवदेक आत्मा ।
यस्माच्च भिन्नमपि सर्व्वमभिन्नमज्ञा मन्यन्तु ते (?) हृदये वरेऽस्तौ ॥
सर्व्ववेदान्तसारार्थसंग्राहिण्या अतिस्फुटं ।
भाष्यमीश्वरगीतायाश्चक्रे विज्ञानभिक्षुकः ॥
एतेन भगवद्गीताव्याख्यापेक्षापि यास्यति ।
शब्दादिभेदमात्रेण गीतयोरर्थसाम्यतः ॥

श्रीनारायणेन कूर्म्मरूपिणा ब्रह्मादिभ्योऽखिलपुरुषार्थसाधनं ज्ञानं कर्म्म च कूर्म्मपुराणे सम्यगुपदिष्टं तदेतत् सूतमुखादुपश्रुतवन्तः शौनकादयो ज्ञानसारं विस्तरतः श्रोतुकामाः पुनः सूतं पप्रच्छुरित्याह पुराणकर्त्ता व्यासदेवः । ऋषय ऊचुरिति यदूचुस्तदाह भवतेति ।

**End.** चातुर्वर्ण्यस्यैवात्राधिकारोऽस्ति ब्राह्मणस्य विशेषत इदं तयं कर्भ्यं शूद्रस्य तु पाठेऽधिकारो नास्तीति विशेषः ।

**Colophon.** इति कूर्म्मपुराणे ईश्वरगीतासूपनिषत्सु विज्ञानभिक्षुकृतभाष्ये दशमोऽध्यायः । ईश्वरगीताभाष्यं समाप्तं ॥

विषयः । वेदान्तसारार्थसंग्राहिण्याः कूर्म्मपुराणान्तर्गतेश्वरगीताया व्याख्यानं ॥

---

**No. 2051.** प्रश्नोपनिषदालोकः । Substance, country-made paper, 11½ × 3¼ inches. Folia, 17. Lines, 10 on a page. Extent, 514 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

**Praśnopanishadáloka.** A gloss on the Praśnopanishad, one of the Upanishads of the Atharva Veda. By Vijnána Bhikshu. The text along with the commentary of S'ankara Áchárya and the gloss of Ánandagiri has been printed twice, and the text has been translated into English by Rájá Rámamohan Ráya, Dr. Roer, Bábu Rájnarain Bose and others.

**Beginning.** अथ प्रश्नोपनिषद्व्याख्यायते ॥ ॐ सुकेशा च भारद्वाज इत्यादि । प्रश्नोत्तरं सर्व्वविद्योपप्रमाणं । सुकेशा नामतः भरद्वाजस्यापत्यं भारद्वाजस्तथा शिवेरपत्यं शैब्यः सत्यकामो नामतः तथा सौर्य्यायणी नामतः गर्गस्यापत्य गार्ग्यः तथा कौशल्यो नामतः अश्वलस्यापत्यं आश्वलायनः तथा भृगोरपत्य भार्गवः वैदर्भिर्नामतः तथा कबन्धी नामतः कत्यस्यापत्यं कात्यायनः ते च प्रसिद्धा एते षट्संख्या मुनयो ब्रह्मपरा वेदतत्परा ब्रह्मनिष्ठाः कार्य्यब्रह्मोपासकाः पञ्च ब्रह्मान्वेषमाणाः ज्ञातुमदृष्टा बभूवुरित्यर्थः ।

**End.** अक्षविद्यासम्प्रदायकर्तृभ्य नमस्कृत्य मम इति द्विर्वचनं समाप्त्यर्थं ॥ षष्ठः प्रश्नः ॥

**Colophon.** इति विज्ञानभिक्षुकृते वेदान्तालोके प्रश्नोपनिषदालोकः समाप्तः ॥

विषयः । प्रश्नोपनिषद्व्याख्यानं ।

---

**No. 2052.** शास्त्रदीपिका । Substance, country-made paper, 10 × 4½ inches. Folia, 388. Lines, 9 on a page. Extent, 9,871 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

विषयः । धर्म्मस्वरूपनिरूपणं । कालविवेचनं । तिथ्यादिनिरूपणं । तत्र प्रतिपदादितिथिद्वैधे व्यवस्थानिर्णयः । सङ्क्रान्तिनिर्णयः । मलमासविवेचनं । यमसाद्विवेचनं । विवाहनिरूपणप्रसङ्गेन सापिण्ड्यादिकथनं । विवाहादिनिरूपणं । गर्भाधानादिसंस्कारनिर्णयः । आह्निकविधिः । अन्त्येष्टिविधिः । अशौचनिरूपणं । शुद्धिनिरूपणं । श्राद्धादिविधिकथनं । प्रायश्चित्तनिरूपणं । दायभागकथनं । व्यवहारनिरूपणञ्च ।

**No. 2106.** दायभागटीका । Substance, country-made paper, 14 × 4 inches. Folia, 182. Lines, 7 on a page. Extent, 4,684 s'lokas. Character, Bengali. Date, ? Place of deposit, Majidá, Post Ránághaṭ, Paṇḍit Madhusúdana Nyáyaratna. Appearance, decayed. Prose. Correct.

**Dáyabhága-ṭíká.** A commentary on the Dáyabhága of Jímúta-váhana. By Rámabhadra Nyáyálaṅkára, son of S'rínátha Ácharya-chúḍámaṇi.

**Beginning.** आलोच्य तातनिर्मित-निबन्धमाराध्य विश्वेश्वरं ।

आर्य्याचार्य्यस्तनुते विवृतिमिमां दायभागस्य ॥

ग्रन्थारम्भे विघ्नविघाताय इष्टदेवताकीर्त्तनरूपं मङ्गलमाचरन् शिष्यप्रवृत्तये सम्बन्धाभिधेय-प्रयोजनान्याह । मन्वादीति । अत्र प्रयोजनं दायभागनिर्णयः । स च संशयापनोदनद्वारा दुःख-निवृत्तिहेतुतया गौणः । अभिधेयो दायभागः । सम्बन्धश्च ग्रन्थस्य फलाभिधेयाभ्यां कार्य्यकारण-भावो विषयविषयिभावश्च । इत्यादि

**End.** अतस्तस्य तात्पर्य्यं वर्णयित्वा विरोधश्च परिहरतः तद्प्रयोजकीभूतस्य जड़ानुराग-स्याभावेऽपि न वैयर्थ्यमिति भावः । बहुतरेति सुबोधमिति ।

श्रीरामभद्ररचितां पाणौ सम्प्राप्य दीपिकामेतां ।

जीमूतवाहनकृते-र्गभीरार्थं विदन्तु विद्वांसः ॥

**Colophon.** इति श्रीमन्महोपाध्यायश्रीनाथाचार्य्यचूड़ामणितनूजश्रीरामभद्रन्याया-लङ्कारभट्टाचार्य्यविरचिता दायभागटीका समाप्ता ।

विषयः । जीमूतवाहनकृतदायभागस्य व्याख्यानं ।

---

**No. 2107.** कामसूत्रं । सभाष्यं जयमङ्गलाख्यटीकासहितञ्च । Substance, country-made paper, 13 × 7 inches. Folia, 126. Lines, 14 on a page. Extent, 6,125 s'lokas. Character, Nágara. Date, ? Place of deposit, S'ántipur, Paṇḍit Káhdása Vidyávágís'a. Appearance, new. Prose. Generally correct.

**Káma-śútra** with the commentary of Mallinága, and the gloss called **Jayamaṅgala**. The aphorisms of Vátsyáyana on worldly enjoyment with the commentary of Mallinága, and an exegesis by Yas'odhara. The last two have been very much mixed up. The text is divided into 7 chapters, and treats successively of all the different branches of the subject. The exegesist cites the name of Mahimalla Deva, a Chalukya king.

The objects of human life are, according to Hindu writers, fourfold, including 1st, duty or *dharma*; 2nd, wealth or *artha* economics; 3rd, enjoyment, *káma*, and 4th, salvation or *moksha*. On each of these subjects there were at one time, it would seem, several text-books in Sanskrit, but they are not all forthcoming now. On the first subject the Aphorisms of Jaimini constitute the leading text. On the second, a text is attributed to S'ukra A'chárya, but it nowhere has yet been met with. On the third, the *káma-sutra* is the only text now known, but its author refers to seven different writers who preceded him. The fourth forms the theme of five out of the six leading systems of philosophy, as also of several minor ones. Of enjoyment in its grossest sense women form the most important object, and the text therefore devotes an unduly large part of it to sexual love, and hence it is that in describing the work, it is usual to class it among erotic works. Káma in its most comprehensive sense, however, includes everything that promotes the gratification of the five senses of hearing, feeling, seeing, tasting and smelling, and Vátsáyana refers to all these. He begins with education in early life, giving brief notes about the 14 sciences and the 64 arts recognised by the Hindus. Then he adverts to housekeeping, furniture and household decorations, to friends, associates and companions, to occupations and ornaments, as well as conduct towards women. This explanation is necessary with reference to what has been said on page 98 of volume I, on the subject.

Vátsyáyana is supposed to have lived over two thousand years ago, and the oldest commentary on the Nyáya aphorisms is attributed to him.

**Beginning.** (एकत्रीकृतसूत्रभाष्यस्य प्रारम्भवाक्यं यथा,) शास्त्रे प्रकृतत्वात् तत् सम-वायवोधकेभ्यश्वाचार्य्येभ्यस्तत्सम्बन्धात्। प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच। तस्यैकदेशं मनुः स्वायम्भुवो धर्म्माधिकारिकं पृथक् चकार। बृहस्पतिरर्थाधिकारिकं। महादेवानुचरश्च नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच। — — — — — — — — — — — — — — सर्व्वमल्पेन ग्रन्थेन कामसूत्रमिदं प्रणीतवान् वात्स्यायनः।

टीकायाः प्रारम्भवाक्यं यथा,—

वात्स्यायनीयं किल कामसूत्रं प्रस्तावितं कैश्चिदिहान्यथैव।
तस्माद्विधास्ये जयमङ्गलाख्यां टीकामहं सर्व्वविदं प्रणम्य॥

इह चत्वारो वर्णा ब्राह्मणादयश्चत्वारश्चाश्रमा ब्रह्मचारी गृहस्थश्च वैखानसो भिक्षुरिति। तत्र ब्राह्मणादीनां गृहस्थानां मोक्षस्यानभिमतत्वात् त्रिवर्गः पुरुषार्थः। तत्रापि धर्म्मार्थयोर्हेतुत्वात् काम एव फलभूतः पुरुषार्थ इति कामवादिनः। स चोपायं विना न भवतीति तमुपायमाचिख्यासुराचार्य्यो मल्लिनागः पूर्व्वाचार्य्यमतानुसारेण शास्त्रमिदं प्रणीतवान्। इत्यादि।

End. शास्त्रस्यार्थप्रधानत्वात् तेन योगोऽत्र योषितां।
सन्ति रागपरा नार्य्यः सन्ति चार्थपरा अपि॥
प्राक् तत्र वर्णितो रागो वेश्यायोगाश्च वैशिके॥

इति वात्स्यायनीयकामसूत्रे वैशिके षष्ठेऽधिकरणे अनुबन्धार्थानर्थसंशयविचारा वेश्याविशेषाश्च षष्ठोऽध्यायः॥

समाप्तञ्चेदं वैशिकं षष्ठमधिकरणं व्याख्यातञ्च कामसूत्रम्॥

भाष्यस्य शेषवाक्यं यथा ————

एता षट्रूपाजीवायामन्तर्भवन्ति विशेषः सम्पद्यते सर्व्वासामिति। इति वात्स्यायनीयकामसूत्रटीकायां जयमङ्गलाभिधायां विदग्धाङ्गनाविरहकातरेण गुरुदत्तेन्द्रपादाभिधानेन यशोधरेणैकत्रकृतसूत्रभाष्यायां वैशिके षष्ठेऽधिकरणे षष्ठोऽध्यायः। समाप्तञ्चेदं वैशिकं षष्ठमधिकरणं॥

Colophon इत्यपराज्र्जुन + जबलमल्लराजनारायणमहाराजाधिराजचैलुक्यचूड़ामणिश्रीमद्वीसलदेवस्य भारतीभाण्डागारे श्रीवात्स्यायनकामसूत्रटीकायां जयमङ्गलाभिधायां वैशिकमधिकरणं समाप्तम्॥

विषयः। प्रथमे साधारणाधिकरणे,—शास्त्रसंग्रहः, त्रिवर्गप्रतिपत्तिः, विद्यासमुद्देशः, नागरिकवृत्तं, नायकसहायदूतीकर्म्मविमर्शश्चेति पञ्च प्रकरणानि।

द्वितीये साम्प्रयोगिकाधिकरणे,—प्रमाणभावकालेभ्यो रतावस्थानं, प्रीतिविशेषाः, आलिङ्गनविचाराः, चुम्बनविकल्पा, नखरदनजातयः, दशनच्छेद्यविधयः, देश्या उपचाराः, संवेशनप्रकाराः, चित्ररतानि, प्रहणनयोगाः, तद्युक्तशीत्कृतोपक्रमाः, पुरुषायितं, पुरुषोपसृप्तानि, औपरिष्टकं, रतारम्भः, रतावसानिकं, रतिविशेषाः, प्रणयकलहश्चेति अष्टादशप्रकरणानि।

तृतीये कन्यासम्प्रयुक्ताधिकरणे,—वरणविधानं, सम्बन्धनिर्णयः, कन्याविस्रम्भणं, बालायामुपक्रमाः, इङ्गिताकारसूचनं, एकपुरुषाभियोगाः, प्रयोज्यस्योपावर्त्तनं, अभियोगतः कन्यायाः प्रतिपत्तिः, विवाहयोगाश्चेति नव प्रकरणानि।

चतुर्थे भार्य्याधिकारिकाधिकरणे,—एकचारिणीवृत्तं, प्रवासचर्य्या, सपत्नीषु ज्येष्ठावृत्तं, कनिष्ठावृत्तं, पुनर्भूवृत्तं, दुर्भगावृत्तं, आन्तःपुरिकं, पुरुषस्य बह्वीषु प्रतिपत्तिश्चेति अष्टौ प्रकरणानि।

पञ्चमे पारदारिकाधिकरणे,—स्त्रीपुरुषशीलावस्थापनं, स्त्रीषु सिद्धाः पुरुषाः, अयत्नसाध्ययोषितः, परिचयकारणानि, अभियोगाः, भावपरीक्षा, दूतीकर्म्माणि, ईश्वरकामितं, आन्तःपुरिकं, स्वदाररक्षितकञ्चेति दश प्रकरणानि।

षष्ठे नैमित्तिकाधिकरणे,—महायज्ञस्यागम्यत्विन्नागमनकारणानि, उपावर्त्तनविधिः, कान्तादत्तं, घर्षणागमापायाः, दिरञ्जन प्रतिपत्तिः, निष्कामनक्रमाः, विशीर्णप्रतिमस्थानं, लाभालाभावशेषाः, अर्थानर्थानुबन्धसमयः, विचारविशेषाश्चेति दश प्रकरणानि।

(पुस्तकेऽस्मिन् औपनिषदिकं सप्तममधिकरणं नास्ति)

(तत्रत्य विषया यथा,—सुभगङ्करणं, वशीकरणं, वृष्ययोगाः, नष्टरागप्रत्यानयनं, वृद्धिविषयः, चित्रयोगाश्चेति षट् प्रकरणानीति।)

---

**No 2108** **वैष्णवसिद्धान्तवैजयन्ती, प्रकाशिकासहिता।** Substance, country-made paper, 12 × 4 inches. Folia, 116. Lines, 12 on a page. Extent, 4,182 slokas. Character, Bengali. Date, ? Place of deposit, S'ántipur, Pandit Kálidása Vidyávágísa. Appearance, old. Prose and verse. Correct.

**Vaishnava-siddhánta-vaijayantí** with a commentary entitled **Prakásiká.** A manual of Vaishnava faith and worship. By Raghavendra Muni.

**Beginning** उद्धर्त्तुं भवसागरात्तुरन्त्राद् धातुर्विधातुं वच-
स्सिद्धान्तं पतगेन्द्रकेतुरवितुं लीलावतीर्णो धरां।
धर्म्माणामपि धर्मकर्तुरमता सेतुः सता सात्त्वता
जीयात् जगदिन्द्रजालरचनाहेतुर् हरिः पातु वः॥
श्रीमद्वैष्णवसिद्धान्तवैजयन्ती प्रकाश्यते।
श्रुतिस्मृतिप्रमाणेन मत्तकेन स्वयं कृता॥

इति वस्तु प्रारिप्सितग्रन्थारम्भसम्भावितविघ्नविघाताय सदाचारपरम्परापरिपालनाय च स्वग्रन्थप्रतिपाद्य वेदान्तवेद्यं वस्तु प्रमीणाति विश्वेषामित्यादिपद्येन॥

विश्वेषामनवद्यमागमगिरामापाद्यमाद्यं पर
रब्ज्वादैरपि विद्यया परमया नामाद्यते यन्मरुः।
प्रेम्णाचिद्घनविग्रहो मुकुरहो गोपीभिरामोदतः
साऽयं नन्दसुतोऽभिनन्दति सदानन्दाय वृन्दावने॥ इत्यादि।

**End** गौड़ादागत्य वृन्दावनभुवि वसता राघवेन्द्राभिधेन
प्रायो जित्वा विवादान् निगमपथनयैर्ज्जीवसमारम्भान्त्ये।
सिद्धान्तैर्वैष्णवानां स्वमतिविरचिता वैजयन्ती विचित्रा
कण्ठे धार्य्या कवीन्द्रैरखिलगुणवती वादिविध्वंसनाय॥
श्रीमद्वैष्णवसिद्धान्तवैजयन्तीप्रकाशिका।
दीपिकेव करे धार्य्या साधुवर्य्यायतीन्द्रैः॥

Colophon. इति श्रीराघवेन्द्रमुनिप्रणीतायां वैष्णवसिद्धान्तवैजयन्त्यां भगवत्स्वरूपनिरूपणं नाम पञ्चमो ग्रन्थः । समाप्तश्चायं ग्रन्थः ।

विषयः । ब्रह्मणः साकारत्वकथनं । श्रीकृष्णस्यैव परब्रह्मशब्दवाच्यत्वनिरूपणं । श्रीकृष्णविग्रहस्य सच्चिदानन्दरूपतया नित्यत्वकथनं । अत्र विविधवादनिरसनं । जगन्नित्यत्वादिवादिनां विप्रतिपत्तिनिरासपूर्व्वकं भगवानेव अयस्कान्तमणिवत्सन्निधिमात्रेणाविद्याविवर्त्तानां कारणमिति-निरूपणं । संसारस्य स्वप्नायमानत्वकथनं । तत्र विविधवादखण्डन अध्यासस्वरूपविवेचनादिकं । जीवस्य व्यवहारदशायां संसारबन्धो न तु परमार्थतः तस्य साक्षाज्जगदीश्वराभेदश्रवणादितिनिरूपणं । वैराग्योपयोगित्वेन संसारस्य—मिथ्यात्वं निरूप्य तन्निरस्तकारणं किञ्चिदस्ति न वेति वादिविप्रतिपत्तेस्तन्निरूपणं । तत्र सांख्यमतमुपपद्य तत्खण्डनं । पातञ्जलमतोपपादनपूर्व्वकं तन्निरसनं । वैशेषिकमतोपपादनपूर्व्वकं तत्खण्डनं । न्यायमतोपपादनं तत् खण्डनञ्च । एवं शून्यवादिस्वभाववादिमीमांसकादिमतान्युपपाद्य तत्खण्डनपुरःसरं भगवानेव तत्कारणमिति सप्रपञ्चप्रपञ्चनं । नानाजीववादखण्डनपुरःसरमेकजीववादव्यवस्थापनं । आत्मस्वरूपनिरूपणमुखेन अन्यान्यमतखण्डन । तत्र आत्मख्यातिवादखण्डनं । असत्ख्यातिकथन । आख्यातिनिरूपणं । अन्यथाख्यातिनिरूपण । अनिर्वाच्यख्यातिनिरूपणं । तत्र अनिर्वाच्यत्वस्वरूपादिविवेचनं । अविद्यास्वरूपादिनिर्णयः । भेदवादखण्डन । आत्मनः स्वप्रकाशत्वकथनं । संवित् स्वरूपविवेचनं । वेदस्य स्वतः प्रामाण्यनिरूपणं । तस्य अपौरुषेयत्वादिकथनञ्च । कर्म्म-ज्ञानकाण्डयोः सामञ्जस्यकथनं । गुरूपसदनादिप्रकारकथनं । श्रवणमननादिस्वरूपकथनादिकं । समाधिलक्षणतद्भेदादिकीर्त्तनं । तत्त्वज्ञानान्मुक्तिरितिविवेचनं । जीवन्मुक्तस्वरूपादिकथनं । मोक्षस्वरूपविवेचनं । अत्र तार्किकादिमतखण्डन । वेदान्तमतखण्डनं । मुक्त्यधिकारिनिरूपणं । संसारलक्षणादिकथनं । संसाराद्विरक्तस्य सन्न्यासिन एव मोक्षाधिकारो नान्यस्येति निरूपण । तथा भगवत्प्राप्तिरेव मोक्ष इति निरूपणं । अत्र पाशुपतादिमतखण्डनं । भगवदुपासनादिफलकीर्त्तनं । द्वैतश्रुतिसमन्वयादिकथनं । भगवद्भक्तलक्षणं । तद्भेदादिकथनञ्च । भगवद्भक्तानां मोक्षेष्वपि स्पृहाभाव इत्यादि वाक्यानां समाधानादिकथनं । भक्तिलक्षणं । तथासाध्यसाधनभेदेन द्वैविध्यकथनं । साध्यरूपापि द्विविधा ज्ञानलक्षणा प्रेमलक्षणा चेति । तथा श्रवणकीर्त्तनादिनवविधसाधनभक्तिनिरूपणं । कर्म्मयोगस्यापि भक्तिसाधनार्थत्वाद्भक्तेः प्रागेवकर्त्तव्यतेतिनिरूपणं । धर्म्मस्वरूपादिनिरूपणं । साकार-निराकार-सगुण-निर्गुणत्वादिप्रतिपादिकानां श्रुतीनां समाधानकथनं । भगवच्छरीरस्य नित्यत्वादिनिरूपणमुखेन तार्किकादिमतनिरसनं । भगवल्लीलादिचिन्तनं । रमागोपीपरिकरस्य भगवच्छक्तित्वकथनं । लीलावतारतात्पर्य्यकथन । गोलोकादिस्थानस्य नित्यत्वकथनञ्च ।

---

**No. 2109. स्कन्दपुराणे,—केदारखण्डम् ।** Substance, country-made paper, 18 × 3 inches. Folia, 165. Lines, 6 on a page. Extent, 4,010 ślokas.

Character, Bengali. Date, ? Place of deposit, Ránághát, Bábu Surendranátha Pálachaudhúri; another copy at Darbhángá, Bábu Gauresvara Sinha. Appearance, fresh. Verse. Generally correct.

**Kedára-khanda of the Skanda Purána.** This is one of the several books or Khandas, of the Skanda Purána It is divided into 32 chapters, and comprises a number of legends designed for the glorification of S'iva as the supreme divinity.

CONTENTS: I. Story of Daksha's visit to Naimisha forest, where he was disrespectfully treated by his son-in-law S'iva, and for which he rebuked S'iva.

II—III. Daksha commences a great feast to which he does not invite S'iva. Dáksháyani hears of the feast, and obtains her husband's permission to go to her father's house, where she commits suicide. S'iva hears the news, and, in a fit of anger, plucks out a lock of hair, which becomes two demons Káli and Vírabhadra.

IV—V. The demons wage war with the gods. Decapitation of Daksha; his head replaced by that of a goat. His hymn to S'iva. Adoration of S'iva, and advantages of putting on the tridental sectarial mark, ashes, &c. Story of Nandi, a Vaisya of Avanti, who was a great devotee.

VI—VII. S'iva's grief at the loss of his wife; his asceticism. Origin of the Lingam, its worship. S'aiva philosophy. Story of Sundarí, daughter of a king of Kásí.

VIII. Lingams of various kinds. Dispute between the Devas and Rávana. Devas repair to Vishnu, and devise means for the destruction of Rávana.

IX—XIV. The churning of the ocean. Origin of the Hálábala poison. Birth of Ganes'a. Consequences of the churning.

XV—XIX. Story of Nahusa. Ditto of Dadhichi. Ditto of Bali and of the Dwarf incarnation.

XX—XXV. The superiority of the Lingam over Brahmá and Vishnu. Story of Táraka, a demon, who oppressed the Devas. Marriage of S'iva with Umá.

XXVI—XXXI. Honey-moon of S'iva on the Gandhamádana mountain. Birth of Kártika. His battle with Táraka. Destruction of Táraka. Adoration of Kártika.

XXXII. Story of S'vetarájá. Merits of the S'ivaratri fast. Lu-

nations most appropriate for the worship of S'iva, Gánes'a, Kártika, &c. Gambling between S'iva and Umá, S'iva, losing everything by play, retires from Kailása to a forest. Umá, assuming the disguise of a wild hill woman, repairs to S'iva. Their reconciliation and adoration by the Devas. Merits of reciting the Kedára-khaṇḍa.

**Beginning**. यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।
तत्रैव नैमिषारण्ये शौनकाद्यास्तपोधनाः ॥
दीर्घसत्रं प्रकुर्व्वन्तः सत्रिणां सुमतेन सः ।
तेषां सन्दर्शनोत्सुक्यादागतो हि महातपाः ॥
व्यासशिष्यो महाप्राज्ञो लोमशो नाम नामतः ।
तत्रागतं ते ददृशुर्मुनयो दीर्घसत्रिणः ॥
उत्तस्थुर्युगपत्सर्व्वे सार्घ्यहस्ताः समुत्सुकाः ।
दत्त्वार्घ्यपाद्यसत्कारं मुनयो वीतकल्मषाः ॥
तं पप्रच्छुर्महाभागाः शिवधर्म्मं सुविस्तरं ।
मुनय ऊचुः ।
कथयस्व महाप्राज्ञ देवदेवस्य शूलिनः ।
महिमानं महाभाग ध्यानार्चनसमन्वितम् ॥
सम्मार्ज्जने किं फलं स्यात्तथारङ्गावलीषु च ॥ इत्यादि ।

**End**. शृण्वन्ति चैव ये भक्त्या शम्भोर्माहात्म्यमुत्तमम् ।
शैवशास्त्रमिदं विप्रास्ते यान्ति परमां गतिम् ॥

**Colophon**. इति श्रीस्कान्दे महापुराणे केदारखण्डे शैवशास्त्रे अष्टशतचतुर्दशाधिकत्रिसहस्रे पञ्चत्रिंशोऽध्यायः । समाप्तमिदं केदारखण्डम् । ( इतः परं स्कन्दपुराणमाहात्म्यकथनश्लोका विद्यन्ते । )

विषयः । १मे, अध्याये,—लोमशेन सह शौनकादीनां संवादेन भगवान् शूलपाणिरेव परं-ब्रह्म तदुपसेवया च जीवोऽमृतत्वमाप्नोतीति निरूपणं । अथैकदा नैमिषारण्ये समागतस्य दक्षस्य पुरतः प्रणिपातपुरःसरं दण्डायमानेषु सुरासुरनिकरेषु अकृतप्रणामं रुद्रं प्रति तस्य कोपादिविवरणकीर्त्तनं । दक्षनन्दिनोरन्योन्यं शापविवरणकथन ।

२-३, अध्याय,—दक्षस्य शिवरहितयज्ञानुष्ठानविवरणकथनं । अथैकदा गन्धमादनपर्व्वते सह सखीभिः क्रीडन्ती दाक्षायणी दक्षालयमुद्दिश्य प्रचलतां चन्द्रादीनां प्रवृत्तिमुपलभ्य विजयामुखात् शङ्करमभ्युपेत्य च पितृगृहगमनाय कृतानुमोदना नितरां ममुदे ।

अथ पितृगृहं समनुप्राप्ता सतीयं पितृमुखात् पतिनिन्दनमाकर्ण्य अत्यर्थं निर्व्वेदमापन्ना हुताशनं प्रविवेश। अनन्तरं नारदमुखेन प्रवृत्तिमिमामाकर्ण्य क्रोधज्वलितो भगवान् रुद्रो जटामेकां गिरिशिरसि आस्फालयामास। ततः समुद्भूतयोः कालीवीरभद्रयोः दक्षयज्ञविनाशादिवर्णनं।

४—५, अध्याये,—इन्द्रोपेन्द्रप्रभृतिभिः सार्द्धं वीरभद्रस्य युद्धवर्णनं। ब्रह्मकृतशिवस्तोत्रकथनं। दक्षस्य छागमस्तकत्वप्राप्तिकथनं। दक्षकृतशिवस्तोत्रकथनं। शिवमाहात्म्यकथनं। शिवालयनिर्म्माणादिफलकीर्त्तनं। अथ इन्द्रसेनस्य राज्ञ उपाख्यानकथनं। करवीर अर्क-धुस्तूरादिपुष्पैः शिवपूजाकरणे उत्तरोत्तरं फलाधिक्यकथनं। त्रिपुण्ड्रमाहात्म्यकथनं। विभूतिमाहात्म्यकथनं। शिवपूजामाहात्म्यकथनमुखेन अवन्तिपुरवास्तव्यस्य नन्दिनामकवैश्यस्य उपाख्यानकथनं।

६—७ अध्याये,—लिङ्गप्रतिष्ठाविधिकथनप्रसङ्गेन सतीविरहविधुरस्य विधुभूषणस्य मनोहरवेशेन दारुवनप्रवेशवर्णनं। तत्र ऋषीणां शापेन शिवस्य षण्डत्वप्राप्तिः लिङ्गपतनवृत्तिकथनं। शिवलिङ्गस्वरूपकथनं। मुख ते अपवित्रमास्यति सुरभिं प्रति देवानां शापदानकथनञ्च। ब्रह्मकृतलिङ्गस्तोत्रकथनं। लिङ्गार्च्चनमाहात्म्यकीर्त्तनं। स्थानभेदे शिवलिङ्गस्य नामभेदकथनञ्च। पाशुपतधर्म्मकीर्त्तनं काशीराजकुमार्य्याः सुन्दर्य्याः उद्दालकस्य ऋषेः सभार्य्याकरणवृत्तान्तकीर्त्तनं।

८ अध्याये,—इन्द्रचन्द्रसूर्य्यादीनां रत्नमृत्तिकामयादिलिङ्गपूजनकथनं। लिङ्गमाहात्म्यकथनव्याजेन गोकर्णपर्व्वते रावणकृतलिङ्गार्च्चनविवरणकथनं। नन्दिना सह रावणस्य विरोधकथनं। रावणं प्रति तस्य शापदानविवरणकथनञ्च। रावणविप्रकृतानां देवानां वैकुण्ठगमनपूर्व्वकं वैकुण्ठस्तोत्रकीर्त्तनं। भगवत उपदेशेन देवानां वानररूपेण जन्मग्रहणकथनं। रामावतारकथनादिकञ्च।

९—११ अध्याये,—बलिकृतशक्रैश्वर्य्यहरणविवरणं। बलिविप्रकृतस्य इन्द्रस्य ब्रह्मलोकगमनादिकथनं। भगवत उपदेशेन तस्य सुतलगमनपूर्व्वकं बलिना सह संवादकथनं। समुद्रमन्थनवृत्तान्तकथनं। रुद्रस्य कोपात् कालकूटस्य उद्भवः, तेन च ब्रह्माण्डस्य भस्मीभूतत्वकथनञ्च। अथ देवेन्द्रस्य प्रार्थनया शिवलिङ्गात् ब्रह्मविष्णुप्रभृतीनां प्रादुर्भावकथनं। गणेशस्य उत्पत्त्यादिकथनञ्च। चतुर्थ्यां गणेशपूजनमाहात्म्यकीर्त्तनं। तस्य पूजनविधिकथनं। मन्थनात् समुद्रात् चन्द्रादीनामुद्भवकथनादिकं।

१२—१४ अध्याये,—समुद्रात् लक्ष्म्या उत्पत्तिकथनादिकं। अमृतपरिवेशनकाले विष्णोः मोहिनीरूपधारणादिकथनं। सुरासुरयोः युद्धवर्णनं। राहुं पुरस्कृत्य दैत्यानां जयलाभकथनं। राहुभयेन चन्द्रस्य शिवसान्निध्यगमनादिकथनं। विष्णुकृतकालनेमिवधवर्णनादिकं। युद्धहतानां सर्व्वेषां प्राणिनां स्वर्गफलप्राप्तिकथनं। इन्द्रेण सह वृहस्पतेः विरोधकथनं। विश्वकर्म्मसुतस्य विश्वरूपस्य इन्द्रपौरहित्यकरणविवरणकथनं। अथैकदा शक्रः वज्रेण विश्वरूपस्य शिरांसि चिच्छेद। ततश्च येन मुखेन विश्वरूपः सोमपानमकरोत् ततः कपिञ्जलाः समजायन्त। तथा सुरापानमुखाच्च कलविङ्कतित्तिरिप्रभृतीनामुत्पत्तिकथनञ्च।

१५—१९ अध्याये.—देवाना नहुषाय स्वाराज्यदानविवरणकथनं । पुत्रविरहविधुरस्य त्वष्टुः ब्रह्मवरदानेन वृत्रासुरस्य उद्भवादिकथन । दधीचेः रस्थ्यादिना अस्त्रादिनिर्म्माणकथनं । देवान् प्रति दधीचिपत्न्याः सुवर्च्चायाः शापदानकथनं । तद्गर्भात् पिप्पलादस्य उत्पत्तिकथनं । वृत्रासुरवध-कथनप्रसङ्गेन प्रदोषशैवव्रतविधिकथनं । बलिकृतामरावतीरोधवृत्तान्तकीर्त्तनं । इन्द्रसोम-वह्निप्रभृ-तीनां मयूरकाक-कृकलासादिरूपेण पलायनविवरणकथन । वामनावतारकथन । बलिच्छलन-वृत्तान्तकीर्त्तन । बलेः पातालगमनकथनं ।

२०—२५ अध्याये,—ब्रह्मविष्णुरुद्राणां सगुणत्वनिरूपणपूर्व्वकं लिङ्गरूपस्य भगवतः निर्गुण-त्वादिकथनं । नमुचिपुत्रेण तारकेण उपद्रुताना देवाना द्रुहिणसमीपगमनपूर्व्वक स्तोत्रव्याजेन स्वावस्थावर्णन । दाक्षायण्या गिरिराजकन्यात्वेन जन्मग्रहणादिकथनं । पार्व्वत्याः शिवशुश्रूषणं । मदनदाहनविवरणकथन । रत्या सह नारदस्य संवादकथनं । पार्व्वत्यास्तपस्यादिवर्णनं । वटुरूपस्य शिवस्य तत्सन्निधौ गमनादिकथनं । अतिविस्तरेण शिवविवाहमहोत्सववर्णन । चण्ड्या आविर्भा-वादिकथनञ्च ।

२६—३१ अध्याये,—गन्धमादनपर्व्वते शिवाशिवयोः विहारवर्णन । देवानामनुरोधेन वह्नेः हंसरूपेण तत्र गमनादिविवरणकथनं । कार्त्तिकेयस्य जन्मादिकथन । कुमारस्य सेनापतित्वे वर-णादिकथन । तारकेण सह घोरयुद्धवर्णन । कुमारविजयकथनञ्च । यमकृतशङ्करस्तोत्रकथनं । कार्त्तिकदर्शनादिमाहात्म्यकथनं । यमेन जिज्ञासितस्य शिवस्य ज्ञानयोगस्वरूपादिकथनं । सुर-नागकिन्नरादिकृतकुमारस्तोत्रकीर्त्तनं । कुमारेण सह नन्दिनः संवादेन शिवालयनिर्म्माणादि-माहात्म्यकीर्त्तनं ।

३२ अध्याये.—शिवभक्तस्य श्वेतराजस्य उपाख्यानकीर्त्तनं । शिवरात्रिव्रतमाहात्म्यकथनप्र-सङ्गेन चण्डाभिधानस्य पुक्कसस्य विवरणकथन । शिवगणेभ्यः नागराजकुमार-रविप्रभृतीना देवानां प्रियतिथ्यादिनिरूपणं । एकदा पार्व्वत्या द्यूते पराजितस्य शिवस्य भूषणमोषण कौपीनग्रहणेन नग्नी-करणञ्चेतिरहस्यवर्णनं । अथ विरक्तस्य शिवस्य कैलासं विहाय वनप्रवेशविवरणकथन । ततः पार्व्वत्याः शबरीरूपमाकलय्य शिवसान्निध्यगमनकथनं । तयोर्देवगणकृताभिषेकवर्णनञ्च । केदार खण्डपाठादिफलश्रुतिकथनञ्च । इति ।

---

**No. 2110. नामकौमुदी ।** Substance, country-made paper, 13 × 4 inches. Folia, 82. Lines, 6 on a page. Extent, 1,154 slokas. Character, Bengali. Date, Sk. 1602. Place of deposit, Purohitapáḍá, Ránágháṭ, Paṇḍit Rámalála Bandyopadhyáya. Appearance, old. Prose and verse. Correct.

**Náma-kaumudí.** A treatise on faith in Krishna as the supreme divinity, and the rituals and duties of Vaishṇavas. By Gaṅgádhara, son of Siva Bhaṭṭa, and grandson of Vireśvara Bhaṭṭa Máháṅkara.

**Beginning** नमस्कृत्य रमानाथं करुणावरुणालयं।
सदाशिवतनूजन्मा वत्सर्षिकुलसम्भवः॥
गङ्गाधर इतिख्यातो भगवद्भक्तकिङ्करः।
शास्त्रसारं समालोक्य मनोनिग्रहहेतवे॥
अपवर्गफलां रम्यां हरिपादपरायणां।
उक्तियुक्तिविशेषेण कुर्व्वेऽहं नामकौमुदीं॥
तत्र ब्रह्मसंहितायां।
ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः। इत्यादि।

**End.** तस्मात् भगवन्नामोच्चारणमात्रेणैव जीवानां चतुर्व्वर्गप्राप्तिरवश्यैवेति दिक्।

**Colophon.** इति श्रीमन्महाउत्करोपनामकवीरेश्वरभट्टाचार्य्यस्य सूनुसदाशिवभट्टात्मजभगवद्भक्तकिङ्करगङ्गाधरविरचिता नामकौमुदी समाप्ता। शकाब्दाः। १६०२।

विषयः। श्रीकृष्णस्य स्वयं भगवत्तानिरूपणं। तस्य पूर्णनिर्णयः। विविधप्रमाणोपन्यासेन श्रीकृष्णतत्त्वनिरूपणं। नामसामर्थ्यप्रकटाप्रकटलीलाद्यवस्थाकीर्त्तनं। कृष्णनामबहिर्मुखानां निन्दाकथनं। दशविधभक्तिलक्षणं। शुद्धाशुद्धविवेककथनं। महाभागवतप्रसङ्गकीर्त्तनं। श्रवणकीर्त्तनादिषु नामसंकीर्त्तनस्यैव प्राधान्यमितिनिरूपणं। नामापराधविवेचनं। भगवत्यव सर्व्वेषां शास्त्राणां तात्पर्य्यमितिप्रपञ्चनं। भगवल्लक्षणकथनादिकं। संक्षेपेण श्रीमद्भागवततात्पर्य्यकथनं। नामसंकीर्त्तनेनैव जीवानां चतुर्व्वर्गप्राप्तिरितिकीर्त्तनञ्च।

---

**No. 2111** निर्व्वाणप्रकरणम्। Substance, country-made paper, 7×4 inches. Folia, 3. Lines, 5 on a page. Extent, 58 slokas. Character, Bengali. Date, ? Place of deposit, Purohitapáḍá, Ránághát, Pandit Rámdála Bandyopádhyáya. Appearance, fresh. Verse. Correct.

**Nirváṇa-prakaraṇa.** Eight stanzas on the unreality of the universe, as inculcated in the Vedánta philosophy. By S'uka, son of Vyása.

श्रीशुकाचार्य्य उवाच।

**Beginning** भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः॥ इत्यादि।

**End.** सत्यं सत्यं परमममृतं शान्तकल्याणरूपं
मायारण्ये दहनदहनं शान्तिकल्याणदीपं।

तेजोरूपं निगमसदनं व्यासपुत्रात्मकं यः
प्रातः काले पठति मनसा याति निर्व्वाणमार्गं ॥

Colophon. इति श्रीशुकाचार्य्यविरचितं निर्व्वाणप्रकरणं सम्पूर्णं ।

विषयः । निर्व्वाणस्वरूपकथनपूर्व्वकं तदुपायकीर्त्तनं ।

---

No. 2112. आर्षानुक्रमणी । Substance, country-made paper, 8 × 4 inches. Folia, 22. Lines, 7 on a page. Extent, 320 ślokas Character, Nágara. Date, Sm. 1820. Place of deposit, Sántipur, Paṇḍit Káládása Vidyávagís'a. Appearance, fresh. Prose. Correct.

Árshánukramaṇí. Index to the Rishis who are supposed to be the authors of the Rig Vedic hymns. By Saunaka.

आर्षानुक्रमणी लिख्यते ।

Beginning. ॐ ऋग्वेदसखिलं ये हि द्रष्टारो मुनिपुङ्गवाः ।
तदनुक्रमणायाहं नमामि परमेश्वरीम् ॥
अथाग्निमील इत्यादि प्रथम मण्डलं प्रति ।
शतर्चिनस्तु विज्ञेया ऋषयः सुखसिद्धये ॥
तेषां पूर्व्वो मधुच्छन्दा मेधातिथिरनन्तरः ।
शुनःशेफस्ततोपि च हिरण्यस्तूप उत्तरः ॥ इत्यादि ।

End. ये वेदमन्त्राः सकलाः सुदृष्टा येनार्षानुक्रमणी प्रदिष्टा ।
नमोऽस्तु तेभ्यो मुनिपुङ्गवेभ्यो भवन्तु ते चापि मयि प्रसन्नाः ॥

Colohpon. इति शौनकाचार्य्यकृतार्षानुक्रमणी समाप्ता । सम्वत् १८२० ।

विषयः । ऋग्वेदसंहितोक्तमन्त्राणामृषिनिरूपणं ।

---

No. 2113. रासोल्लासतन्त्रे रासगीतिका । Substance, count-y-made paper, 8 × 4 inches. Folia, 13. Lines, 7 on a page. Extent, 137 ślokas Character, Nágara. Date, ? Place of deposit, S'ántipur, Paṇḍit Káládása Vidyávagíśa. Appearance, new. Prose. Correct.

Rása-gítá. A poem in praise of the Rása festival of Krishṇa and Rádhá. It professes to be an extract from the Rásollása Tantra.

श्रीनारद उवाच ।

Beginning. श्रीराधाकृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ।
रासमङ्कीर्त्तनं नाम शृणु भागवतोत्तम ॥

राधानामसुधाग्रन्थं कृष्णनामरसायनम् ।
" यः पठेत् प्रातरुत्थाय व्याधिभिः स न बध्यते ॥ इत्यादि ।

**End.** जन्मीलस्य वसेद्गेहे मुखे भाति सरस्वती ।
धर्म्मार्थकाममोक्षं लभते सत्यमेव च ॥

**Colophon.** इति श्रीराधोगमागतन्त्रे राधागीतिका सम्पूर्णा ।

विषयः । राधाकृष्णयोः राधोत्सवकालीनस्तोत्रकथनं ।

---

**No. 2114.** सर्व्वानुक्रमणिका । Substance, country-made paper, 10 × 3 inches. Folia, 37. Lines, 7 on a page. Extent, 630 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipur, Pandit Kálidása Vidyávágís'a. Appearance, fresh. Prose. Correct.

**Sarvánukramaniká.** An index to the Rishis, the Devas and the metres of the hymns of the Vájasaneyi Sañhitá of the Yayur Veda. By Kátyáyana.

**Beginning.** ॐ मण्डलं दृश्यमस्ति हृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान् याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं नत्वोमयमर्चिष्मममभिध्याय माध्यन्दिनीये वाजसनेयके यजुर्वेदाम्नाये सर्वे सखिले सशुक्रिये ऋषिदेवतच्छन्दांस्यनुक्रमिष्यामोयजुषामनियताक्षरत्वाद्वेकेषां छन्दो न विद्यते । द्रष्टार ऋषयः स्मर्त्तारः परमेष्ठ्यादयो देवता मन्त्राभूता अग्न्यादिकाः प्रायो-पाध्यायप्रवेचकपारम्पर्याल्लब्धत्वादृषयः पतिसाभूताश्छन्दांसि गायत्र्यादीन्येतान्यविदित्वा योऽधीते-ऽनुब्रूते जपति जुहोतीत्यादि ।

**End.** षड्दृका वा सत्यात्त्रिष्टुम्माध्यन्दिनीये वाजसनेयके सर्व्वानुक्रमणिकेषा कृतिर्भगवतः कात्यायनस्यैषाकृतिर्भगवतः कात्यायनस्य । च ।

**Colophon.** इति सर्व्वानुक्रमणिकायां पञ्चमोऽध्यायः समाप्तः । समाप्ता चेयं सर्व्वानुक्रमणिका ।

विषयः । सर्व्वेषां माध्यन्दिनयजुर्मन्त्राणाम् ऋषिदेवतनिरूपणं । क्वचित् छन्दआदिकथनञ्च ।

---

**No. 2115.** विदग्धमाधवनम् । Substance, country-made paper, 12 × 4 inches. Folia, 102. Lines, 6 on a page. Extent, 1,969 ślokas. Character, Nágara. Date, Sm. 1889. Place of deposit, S'ántipur, Pandit Kálidása Vidyávágís'a. Appearance, fresh. Prose. Generally correct.

**Vidvanmaṇḍana** An essay in refutation of the doctrine of Máyá. It attempts to prove that the human soul is not a mere reflection of the Divine soul, but an actual emanation from the Divinity, and that Krishṇa is the perfection of the Divinity. It represents the philosophy of the Vaishṇavas in a condensed form. By Viṭṭhala Díkshita, son of Vallabha Díkshita.

**Beginning.** निजमुरलिकानादाकृष्टानागतव्रजसुन्दरी-
निरुपमनवस्नेहाम्भोधेर्विचित्रतरोर्म्मिभिः ।
किमपि परितश्चाद्रीद्रौऽस्तु प्रभुः प्रकटीभवन्
प्रतियुवतिसम्भेदेनास्मद्दृशां विषयः सदा ॥
पितृचरणाम्नत्वाहं हरिरतिमार्गाम्बुजातमार्त्तण्डान् ।
तदनुग्रहतः किञ्चिल्लिखामि यत्नाद् यथाबुद्धि ॥
श्रुतिसूत्रादिमणिभिर्जटिलं युक्तिमौक्तिकैः ।
ग्रथितं कुरुते विद्वन्मण्डनं विट्ठलः सुधीः ॥

इह हि विविधदुर्जिनतापोपतप्यमाननिखिलजनापवर्गाय श्रुतिस्मृतिपुराणेषु श्रवणादयः प्रतिपाद्यन्ते । इत्यादि ।

**End.** पुनरपि नमामि गोपीपतिरतिमार्गप्रवर्त्तनाचार्य्यान् ।
श्रीवल्लभाभिधानान पितृचरणान् वाङ्मनःकायैः ॥

**Colophon.** इति श्रीमन्निजकटाक्षपाततरणिविघटितमायावादिप्रभृतिप्रतिवादितमः-पुञ्जविकासितश्रीगोकुलाधीशरसि+श्रीवल्लभदीक्षितात्मजश्रीगोकुलनाथचरणैकतानश्रीविट्ठलविर-चितं विद्वन्मण्डनं सम्पूर्णं ॥ संवत् । १८८९ ।

विषयः । प्रकरणेऽस्मिन् मायावादादिखण्डनपूर्व्वकं विष्णुस्वामिमतेन शुद्धाद्वैतवादोपपादनं । एतन्मते हि जीवपरमेश्वरयोर्जलविन्दुजलाशययोरिव अंशांशिभावः । सर्व्वमिदं जगत् श्रीकृष्णादाविर्भवति तमेव लूतातन्तुरिव अप्येति च । मायिकगुणरहितः परमेश्वरः श्रीकृष्ण एव भगवानुपास्यदेवः । एतस्यैवोपासनया आनन्दाविर्भावान्मोक्षदशायां जीवः श्रीकृष्ण एव जलविन्दु-र्जलाशय इव अभेदमापद्यते—इति । अत्र श्रीकृष्णलीलायाः प्रयोजनादिकीर्त्तनं लीलायाः नित्यत्वादिनिरूपणञ्च ।

---

**No. 2116.** मलमासतत्त्वटीका । Substance, country-made paper, 16 × 4 inches. Folia, 142. Lines, 7 on a page. Extent, 4,626 ślokas. Character, Bengali. Date, ? Place of deposit, Májiṭá, Post Ráṇághát, Paṇḍit Madhusúdana Nyáyaratna. Appearance, fresh. Prose. Correct.

**Malamásatattva-ṭíká**. A commentary on the Malamásatattva of Raghunandana; on intercallary months. By Rádhámohana Gos'vamí.

**Beginning**. प्रणम्य राधानलिनीसुभृङ्गमङ्गं घनश्याममलमच्युतस्य ।
परं चिदानन्दमयं तनोति श्रीमोहनोऽर्थं मलमासतत्त्वे ॥

ग्रन्थसमाप्तिप्रतिकूलविघ्नविनाशाय परमेश्वरप्रणतिरूपमङ्गलं कुर्व्वन् शिष्यशिक्षायै तदुपनिबन्धनं कृत्वा शिष्यावधानाय प्रतिजानीते प्रणम्येति । स्मृतेस्तत्त्वेति स्मृतिवाक्यस्य तत्त्वमर्थविशेषं। मलिम्लुचे इत्यादेस्तत्त्वं वक्ष्यामीति परेणान्वयः । इत्यादि ।

**End**. तस्य मत्यामपि चैत्रादिसंज्ञायां चैत्रादिमासविहितकर्म्मानर्हतया तत्तुल्यतन्नामकत्वरूपमन्यथा मलस्थलं द्विचैत्रादिपदप्रयोगानुपपत्तेरिति ॥

**Colophon**. इति श्रीमदद्वैतवंशोद्भवश्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचिता मलमासतत्त्वटीका समाप्ता ।

विषयः । रघुनन्दनकृतमलमासतत्त्वस्य व्याख्यानं ॥

---

**No. 2117**. उद्वाहतत्त्वटीका । Substance, country-made paper, 16 × 4 inches. Folia, 95. Lines, 7 on page. Extent, 2,161 s'lokas. Character, Bengali Date, ? Place of deposit, Májdá, Post Ráṇághaṭa, Paṇḍit Madhusudana Nyáyaratna. Appearance, fresh. Prose. Correct.

**Udváhatattva-ṭíká**. A commentary on Raghunandana's digest of the laws relating to marriage. By Kás'íráma Váchaspati Bhaṭṭácharya.

**Beginning**. नत्वा गुरोश्चरणपद्मरजांसि मूर्द्ध्नि
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्बन्धतत्त्वविवृतिं वितनोति यत्नात् ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुं ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनं ॥

स्वकर्त्तव्यग्रन्थसमाप्तिप्रतिबन्धकविघ्नसम्भावनास्ति । अतः सम्भावितताद्दशविघ्नविनाशार्थं ग्रन्थकारः परमेश्वरप्रणामरूपं मङ्गलं कृतवान् । तच्च शिष्यशिक्षार्थमादौ निबध्नाति प्रणम्येति । वाग्रूपस्य ग्रन्थस्य समाप्त्यर्थं वागीशस्य प्रणाम उचित इति सूचनार्थं वागीशमिति विशेषणमुपात्तं ।

**End**. अप्रजाः शूद्रादनुत्पन्नगर्भा । इतराः न शुध्यन्तीति ।
यं प्रासूत समस्तशास्त्रनिपुणः श्रीरामकृष्णात्मजः

श्रीराधोमरवक्षभाक्त्रुसुलसी मश्चीरचूड़ामणिः ।
तेन श्रीयुतकाशिरामकृतिना यत्नेन निष्पादिता
टीका नातिसुष्ठकुलापि कृतिभिः सामुग्रहैर्ह्यतां ॥

**Colophon.** इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचिता उद्वाहतत्त्वटीका समाप्ता ।

विषयः । रघुनन्दनकृतोद्वाहतत्त्वस्य व्याख्यानं ।

---

**No. 2118 देवीपुराणम् ।** Substance, country-made paper, 11½ × 4 inches. Folia, 182. Lines, 8—9 on a page. Extent, 7,371 ślokas. Character, Bengali. Date, ? Place of deposit, Ránághát, Babu Surendranátha Pála Chaudhúrí. Appearance, old. Verse. Incorrect.

**Deví Puráṇa.** Legends and traditions regarding the Deví and her wars, designed so as to glorify the Deví, and exalt her as the greatest divinity. It professes to have been imparted by Brahmá himself at the request of an assembly of Rishis. The S'áktas insist that this is an original Puráṇa, and one of the eighteen alleged to have been compiled by Vyása; but the Vaishṇávas denounce it as apocryphal, got up with a view to set aside the claims of the Bhágavata Puráṇa. Dr. Wilson, in the introduction to his translation of the Vishṇu Puráṇa has noticed at length the arguments urged by the two sects. The codex is incomplete.

Contents: 1—2. Introduction, Rishis repair to the hermitage of Agastya by the advice of Vaśishṭha. Story of Nṛipaváhana and Chitráñgada. Ghora, an Asura, attains absolute invincibility on earth through the blessings of Vishṇu. Vaśishṭha advises Ghora how to obtain the nature of a Vidyádhara.

3 to 6. Conquest of Pátála by Kála, son of Ghora. Conquest by him of the kingdom of heaven from Indra and the other gods. The gods seek the aid of the Deví, and address her hymns.

7 to 9. The Deví descends on the Vindhya mountain. Nárada descends to delude the demon. The demon proposes to marry the Deví. Selection of brides. Mantras for deluding people.

10 to 13. Description of Sanatkumára Yoga. Story of Hutágni, a demon. Story of Surala, who obtains an invincible standard. Descriptions of standards.

14 to 21. Ghora sees a frightful dream. The Deví, under the name of Vindhyavásini, destroys Korakála and other demons. Indra praises the Deví.

22 to 29. Durgápújá. Planting of standards. Transit of the sun from one to another month. Worship of the Deví at such times and on other occasions.

30 to 33. Agency of the Deví in the creation of the universe. Her superiority over Brahmá, Vishnu and Mahádeva, who attain their greatness and strength through her. Her worship. Her car festival. Her worship on cremation ground on particular occasions.

34 to 38. Details about her worship, her temples, offerings to her, &c. Hymns in her praise.

39 to 43. Further details. Story of Bala. Do. Dundubhi. Worship of Kshemaṅkarí.

44 to 48. Aparájitá-vidyá. Story of Amayásura. Names of Rudras, Vasus, Viśvedevas, &c. Conjunctions of Nakshatras. Deví worshipped by Paras'uráma. Astronomical and astrological details in connection with her worship.

49 to 53. Further astronomical details and special rules about her worship.

54 to 70. Special worship of the Deví and her manifestations as Mátrikás on particular occasions, and also of S'iva in connexion with her.

71 to 80. Worship of Vináyaka. Character of forts, gates, triumphal arches, &c. Bathing during eclipses. Merit of pouring water on Lingams. Rites, fasts and sacrifices in honour of the Deví.

81 to 89. Merit of cleaning the temple of the Deví. Her omnipresence. Periods of existence of Brahmá and others. Praise of Kálágnirudra. Description of Háṭakes'varapura. Story of the demon Kuru. Origin of Bhimá. Do. of the signs of the planets. Do. of Chaṇḍeśvara. Praise of the Deví on the destruction of Kuru.

91 to 96. The fasts of the 8th and of the 9th lunations in Ásvina. Worship of the Mátris. Advantage of worshipping clay images. Praise of [illegible]á, and her worship. Praise of Nanda, a place sacred to the Deví.

97 to 103. Duties of the different orders, classes and castes. Various fasts.

104 to 114. Various fasts. Origin, classification and division of the Vedas. The subsidiary Vedas. Science of medicine. Qualities of drugs. Story of Khaṭṭásura. Birth of Gaṇeśa.

115 to 128. Hymn to Gaṇeśa by Vishṇu. Lustration of Gaṇeśa

and blessings by him on Vishṇu. Story of Vighna, his destruction by Ganesa. Praise and worship of the Mátrikás. Story of Harischandra. Repairs of images of gods. Controul of the passions. Story of Naraváhana. Rules regarding Triragni. Names of Agni under different conditions. Flowers meet for worship. Worship of spiritual guides. Hymn in praise of the Deví.

Beginning. नमस्कृत्य शिवां देवीं सर्व्वभागवतां शुभाम्।
पुराणं संप्रवक्ष्यामि यथोक्तं ब्रह्मणा पुरा ॥
ऋषय ऊचुः।
भगवंस्त्वं समस्तस्य इष्टादृष्टस्य तत्त्ववित्।
पुराणार्थं वयं सर्व्वे आगता भवि भाविताः ॥
कथ्यतां यत्र घोराद्या भूताः साम्प्रतदानवाः।
भविष्यांश्च विनाशिष्य देवी देवनमस्कृता ॥
इन्द्रस्य च दिवः प्राप्तिर्हृतराज्यस्य दानवैः।
यथा शक्राच्छ्रियं चक्रे देवदेवनमस्कृतः।
अवतारा मुनिश्रेष्ठ षष्टिभेदगता यथा ॥ इत्यादि।

End. मयापि कथितं तुभ्यं निवृत्तं पापनाशनम्।
पुराणं पावनं दिव्यं देवदेवेन भाषितम् ॥

Colophon. इत्याद्ये देवीपुराणे देवदेवीसंवादे देव्याः स्तवराजः समाप्तः ॥
१२८ अध्यायः।

विषयः। १—२ अध्याये,—वसिष्ठस्योपदेशेन ऋषीणामगस्त्याश्रमगमनविवरणकथनं। अपवाहनविचारद्योरुपाख्यानकथनं। घोराभिधानस्य दैत्येन्द्रस्य विष्णुपासनया पृथिव्यामजेयत्ववरप्राप्तिकथनं। अगस्त्येन सह अपवाहनस्य संवादे केनोपायेन विद्याधरत्वप्राप्तिर्भवति तदुपायकथनं।

३—६ अध्याये.—घोरपुत्रस्य कालस्य वज्रदण्डस्य च भगवदाराधनया देववरयोः प्राप्ताद्विजयवर्णनं। शुक्रस्योपदेशेन तयोरिन्द्रादिपराजयसम्पादनपूर्व्वकं स्वाराज्यैश्वर्य्यप्राप्तिकथनं। घोरपुत्रविप्रकृतानां देवानां ब्रह्ममुखेन देवीस्तोत्रकीर्त्तनं। एवं विष्णुरुद्रादिकृतदेवीस्तोत्रकथनं।

७—९ अध्याये,—देव्याविन्ध्यावतरणविवरणकथनं। ब्रह्मण उपदेशेन घोरनामकदैत्यमोचनार्थं नारदस्य गमनवृत्तान्तकथनं। प्रलोभनमुखस्य दैत्यराजस्य विन्ध्यवासिनीं पत्नीत्वेन लब्धुं

चेष्टादिकथनं। अत्र विवाहयोग्यकन्यालक्षणादिकथनञ्च। लोकमोहनपद्मालाकथनप्रसङ्गेन सम्प्र-न्न दिकथनं।

१०—१३ अध्याये,—उक्तविद्यालाभाय सनत्कुमारयोगानुष्ठानप्रकारकथनं। तत्र कृता-ग्निनामकस्य दानवस्य विवरणकथनं। सुरलनाभिधेयस्य दैत्येन्द्रस्य विवरणकथनं। तस्य विष्णोः शवना मानकेतुलाभकथनं। केतुमत्स्य्यविधिकथनं। इन्द्रध्वजलक्षणादिकथनं।

१४—२१ अध्याये,—आसन्नमृत्योर्दैत्येन्द्रस्य घोरस्य दुःस्वप्नदर्शनकथनं। विन्ध्यवासिनी-कृत घोरकालादिदैत्यवधवर्णनं। इन्द्रकृतदेवीस्तोत्रकीर्त्तनं। नारदस्य विन्ध्यवासिनीदर्शनेन स्तव-कीर्त्तन। सुषेणवधकथनं। मायासैन्यवधकथनञ्च।

२२—२९ अध्याये,—आश्विनशुक्लाष्टमीमहानवम्योर्देवीपूजावश्यकताकथन। नवमीकल्प-विधिकथनं। अत्र दुर्गापूजाविधिकथनञ्च। ध्वजारोपणविधिकथनं। द्वादशसङ्क्रान्तिलक्षण-कथनपूर्ब्बकं तत्र तत्र कृत्यनिरूपणं। प्रदोषादौ सङ्क्रमणे फलादिकथनञ्च। वसोर्द्धारायां स्थिताया देव्याः पूजने फलाधिक्यकथनं। वसुधारादानयोग्यस्थानादिनिरूपणं। होमविधिक-थनप्रसङ्गेन कुण्डनिर्म्माणादिविधिकथनं। विशेषण देवीमाहात्म्यकथनं। देवीमाहात्म्यपाठादि-विधिकीर्त्तनञ्च।

३०—३३ अध्याये,—देव्याः प्रकृतिरूपत्वेन जगत्कर्त्तृत्वादिकथनं। तस्याः परत्वादिनिरूप-णम्। हरिहरादीनां सर्व्वेषां देवीपूजनेन सामर्थ्यप्राप्तिकथनं। तत्र देवभेदेन देव्याहेमस्फटि-कादिमूर्त्तिभेदपूजकवर्णनं। देव्यारथयात्राविधिकथनं। कर्म्मविशेषे नदीतीरदुर्गरथ्याश्मशा-नादिषु देव्याः पूजनकर्त्तव्यताकथनं। देव्याः प्रतिष्ठापनविधिकथन।

३४—३८ अध्याये,—शुक्रकृतशिवस्तोत्रकीर्त्तनं। तत्परतः शिवेन दुर्गाव्रतविधानादिकथनं। देव्याः गृहनिर्म्माणलेपनसंस्कारादिकरणे फलश्रुतिकथनं। देवीपूजनं कृत्वा कुमारीभ्योऽन्नादिदा-नकर्त्तव्यताकथनं। देवीप्रासादशिरसि ध्वजदानादिविधिकथन। सद्येन शिवोक्तदेवीस्तोत्रकीर्त्तनं। सर्व्वमङ्गलाशिवादिदेवीनामनिर्व्वचनकथनं। अत्र सर्व्वेषां देव्यभिधानानां निरुक्तं ज्ञेयं।

३९—४३ अध्याये,—महादेवीनां स्थाननिरूपणं। स्थानभेदे देवदेवेन देव्या मूर्त्तिविशेषपूजन-विवरणकथनं। देवीमन्त्रप्रभावकथनमुखेन दैत्यराजस्य बलस्य हत्यान्तकीर्त्तन। दुन्दुभिनामकस्य दैत्येन्द्रस्य उपाख्यानकथनं। चमत्कृत्या आविर्भावकथनं। तस्याः पूजाविधिकथनं। घटासुरवध-हत्यान्तकथनं। कामरूपादिदेवीस्थानप्रशंसादिकीर्त्तनं।

४४—४८ अध्याये,—महादेवात् नन्दिन अपराजिताविद्याप्राप्तिकथनं। अमयासुरस्य विवरणकथनं। एकादशरुद्राष्टवसुद्वादशादित्यविश्वेदेवादीनां नामकथनं। नक्षत्रयोगमाहात्म्य-कथनं। परशुरामकृतदेवीप्रतिष्ठाविधिकथनं। महयागानुष्ठानयोग्यतिथ्यादिनिरूपणं कालव्यव-स्थाकथनमुखेन तिथ्यादिलक्षणकथनं। ज्योतिश्चक्रसंस्थानादिकथनं। ग्रहाणां गत्यादिनि-रूपणं।

४९—५१ अध्याये,—पूर्णिमामावस्यानिरूपणमुखेन चन्द्रचयवृद्धिनिरूपणं। सूर्य्याचन्द्रमसो-रुपरागे छायारूपराहुकारणत्वकथनं। ग्रहणनिरूपणादिकथनं। संवत्सरं यावत् जन्मर्च्चदोषाप-नुत्तये ग्रहनक्षत्रादिभेदेन देव्या मूर्त्तिभेदपूजनविधिकथनं। तत्र मण्डलतोरणादिनिर्म्माणविधि-कथनं। महास्नानविधिः शिवा-शान्ति-धृति-क्षमा-वृद्धि-सिद्धि-तुष्टि-प्रभृतिषड्विधदेवीमूर्त्ति-लक्षणकथनं। तथा ब्राह्म्यादिमातृकालक्षणकीर्त्तनञ्च। आसां पूजाविधिकथनं। ग्रहाधिष्ठात्रीणां देवतानां लक्षणादिकथनं। संवत्सरमण्डलकथनं। तत्र तत्र वलिदानादिविधिकथनञ्च।

५४—६४ अध्याये,—मातृमण्डलकथनं। तत्र तत्र पूजायां पात्रपुष्पादिनिरूपणं। अपमृत्यु-हरणादित्ययोगकथनं। ग्रहणमातृकाविधिकथनं। तत्र होमविधिकथनञ्च। महोत्पातस्वरूपकथ-नपूर्व्वकं सर्व्वोत्पातशान्तिविधिकथनं। पूर्णिमादौ तिलधेन्वादिदानविधिकथनं। सौभाग्यद्वादशी-व्रतविधानं। द्वादशमासेषु क्रमेण देव्याः पूजाविधिकथनं। काम्यनीलवृषोत्सर्गविधिकीर्त्तनं। गन्धाष्टमीक्षीराष्टमीप्रभृतीनां विधानकथनं। सर्व्वकामलाभार्थं चित्रादिषु नक्षत्रेषु देव्याः पूजा-विधिकथनं।

६५—७० अध्याये,—मासविशेषे पूजाविशेषेण देव्याः पूजाविधिकथनं। वाराणसी-प्रयाग-नैमिषारण्यादिषु स्थानेषु शिवस्य रूपभेदेन अवस्थानकथनं अतएव अष्टषष्टिस्थानेषु तत्पूजन-विधानकथनञ्च। गौरव्रतविधिकथनं। पुष्याभिषेकविधिः। तत्र मण्डलादिनिर्म्माणविधानक-थनं। कलसोत्पत्ति-निवेशाधिदेवतालक्षणादिकथनं।

७१—८० अध्याये,—विनायकमण्डलविधिकथनं। पूजनस्नपनादिविधिकीर्त्तनञ्च। दुर्गगो-पुरद्वारादिलक्षणं। पुरदुर्गयात्रादिविधिकथनं। पुण्यनद्यादिषु स्नाने ग्रहणकालीनस्नानजन्यपुण्य-प्राप्तिकथनं। शिवादिशिरसि जलादिधारादानमाहात्म्यकथन। मृत्युञ्जयविद्याकथनं तत्र कपोतकीर्त्तनाध्यायकीर्त्तनं। देवीयागविधिकथनं। अयाचितव्रतविधिकथनं। कृष्णाष्टमीव्रतवि-धिः। उमामाहेश्वरव्रतविधिकथनं। शङ्करनारायणव्रतविधिकथनं। लक्ष्म्यपर्णाव्रतविधानकथनञ्च।

८१—८९ अध्याये,—देवीगृहसम्मार्ज्जनमाहात्म्यम्। देव्याः सर्व्वगतत्वादिनिरूपणं। ब्रह्मा-दीनां कालव्यवस्थाकथनं। भावव्यवस्थाकथनञ्च। कालाग्निरुद्रमाहात्म्यकथन। हाटकेश्वरपुरवर्णनं। अथैकदा गौरीशङ्करं द्रष्टुकामा विधिवासवादयः स्वस्ववाहनेन कैलासं समाययुः। अत्र चैं कौमा-रबर्हिणा समाहतस्य ब्रह्मवाहनस्य हंसस्य विरावेण रुरुनामकस्य असुरस्य उत्पत्तिकथनं। तदु-पद्रुतानां देवानां देवीस्तोत्रकीर्त्तनं। रुरुवधकाले ब्रह्माण्या उत्पत्तिकथन। भीमाया उत्पत्तिकथनं। प्रहेत्पत्तिकथनं। चण्डेश्वरोत्पत्तिकथनं। रुरुवधे देवगणकृतदेवीस्तोत्रकीर्त्तनं।

९१—९६ अध्याये,—देव्यष्टमीव्रतकथनं। देवीनवमीव्रतकथनं। मातृगणस्य प्रतिष्ठादिवि-धिकथनं। मृन्मयप्रतिमापूजनमाहात्म्यकथनं। विद्यागममाहात्म्यकथनं। विद्याविवेकमाहात्म्यं। विद्याविमानादिविधिकथनं। विद्यामूर्त्तिदानफलकीर्त्तनं। देव्याः प्रियस्थान[illegible]न। नन्दातीर्थ-माहात्म्यकथनं। नन्दापुरीवर्णनादिकं। सुनन्दामाहात्म्यकथनमुखेन तत्पुरीवर्णनादिकं। तत्र प्रवेशविधिकथनं। कनकनन्दामाहात्म्यादिकथनं।

९७—१०३ अध्याये,—वर्णाश्रमधर्म्मकथनं। तत्र स्वाध्यायविधिकथनं। वेदपाठस्नानादि-निरूपणं। अग्निहोत्रादिविधिकथनं। वैधातिरिक्तस्थले हिंसायाः पापजनकत्वकथनं। सामान्यतः सर्व्ववर्णाश्रमधर्म्मकथने निषिद्धानि। आचारकथनं। पवित्रारोपणविधिकथनं। मासविशेषे द्रव्य-विशेषेण देवीपूजनमाहात्म्यकथनं। विजयाव्रतविधिकीर्त्तनं। रूपसौभाग्यजनकनन्दाव्रतविधि-कथनं। अन्यविधविजयाव्रतविधिः। नक्षत्रव्रतविधिकथनं।

१०४—११४ अध्याये,—तोयधेनुघृतधेनुतिलधेन्वादिदानविधिः। पदव्रतविधिकथनं। स्वर्गोव्रतविधिकथनं। मासविशेषे शय्यादिभेददानव्रतविधिः। वेदोत्पत्तिकथनं। चरणव्यूहकथनञ्च। षडङ्गनिरूपणं। आयुर्व्वेदोपोद्घातकथनं। शिष्यसम्बोधनप्रकारकथनं। आयुर्व्वेदनिरूपणमुखेन द्रव्यगुणादिकथनं। गजासुरोत्पत्तिकथनप्रसङ्गेन मालय्यपर्व्वते गजरूपस्य महादेवस्य भ्रमणविवरण-कथनं तत्र विनायकोत्पत्तिकथनञ्च।

११५—१२८ अध्याये,—विष्णुकृतविनायकस्तोत्रकीर्त्तनं। विनायकस्य अभिषेककथनं। वरदानवृत्तान्तकीर्त्तनञ्च। विनायकं पुरस्कृत्य विघ्ननाशाय देवानामुदयाचलगमनवृत्तान्तकथनं। विघ्नवधकथनमुखेन तस्य रूपादिवर्णनं। उत्पत्त्यादिकथनञ्च। मातृगणपूजामाहात्म्यकथनं। तत्र परिस्पन्दलक्षणविवरणकीर्त्तनञ्च। जीर्णदेवमूर्त्तिप्रतीकारकथनं। यमनियमशुद्धिनिरूपणं। तत्र नरवाहनस्य श्रुतकथनं। त्रिरग्निविधिकथनं। कुम्भेनिभ्रप वर्ज्जनामभेदकथनं। पुष्पविधि-कथनं। गुरुदेवपूजाविधिः। देवीस्तवराजकथनञ्च।

...

---

**No. 2119.** वैष्णवामृतम्। Substance, country-made paper, 10 × 4 inches. Folia, 182. Lines, 6 on a page. Extent, 4,628 ślokas. Character, Bengali. Date, ? Place of deposit, Ránághát̤a, Bábu Surendranátha Pála Chaudhúrí. Appearance, new. Prose and verse. Correct.

**Vaishṇavámṛita.** On the duties, feasts and fasts of Vaishṇavas. Anonymous.

**Beginning.** श्रीदामोदरपादपङ्कजयुगं नित्यं मुनीन्द्रैः स्तुतं
देवानामपिदुर्ल्लभं किमपरं धर्म्मार्थमुक्तिप्रदं।
संसारार्णवतारणार्थतरणौ यत्कर्णधारः स्वयं
सानन्दं स्मरतो ममास्तु हृदये स्वाभीष्टसिद्ध्यै सदा॥
सारात्सारं समाहृत्य वैष्णवानां हिताय वै।
भक्तानां तोषणार्थञ्च वैष्णवामृतमुच्यते॥ इत्यादि।

**End.** अयं सिद्धमनुः सर्व्वपापानां हारकः क्षणात्।

निर्म्मलं गगनं यद्वत् कालुष्यं न हि तस्य च ॥
इति इत्यद्वैतमीयवचनात् सर्व्वमवदातं ।

**Colophon.** इति श्रीवैष्णवामृते श्रीविष्णोर्द्वादशयात्राविधिः ॥ समाप्तश्चेदं वैष्णवामृतं ।

विषयः । वैष्णवधर्म्मप्रशंसाकीर्त्तनं । सर्व्वधर्म्मान् परित्यज्य वैष्णवधर्म्मग्रहणावश्यकताकथनं । वैष्णवगुरुलक्षणं । गुरुकरणावश्यकतानिरूपणं । शिष्यलक्षणादिकथनं । वैष्णवदीक्षायामधिकारिनिरूपणं । दीक्षाप्रकरणं । तत्र नक्षत्रराशिचक्रादिविचारकथनं । दीक्षाकालनिरूपणं । जपमालानिर्णयः । जपसंख्याकरणे विहिताविहितद्रव्यादिकथनं । वर्णमालाप्रकारः । मालानिर्णयादिकथनं । विष्णुपूजाविधिः । हरिनामग्रहणविधिः । मन्त्रोपदेशविधिः । दशसंस्कारविधिः । वैष्णवानामाह्निककृत्यनिरूपणं । तत्र शौचदन्तधावनस्नानतर्पणसन्ध्यादिविधिकथनं । षोडशोपचारादिविधिः । श्रीकृष्णस्तोत्रकवचादिकथनं । पुरश्चरणविधिकथनं । विष्णुमन्त्रनिरूपणं । श्रीराममन्त्रकथनं । बालगोपालमन्त्रकथनं । वासुदेवमन्त्रकथनं । हयग्रीवमन्त्रकथनं । वामनमन्त्रकथनं । नृसिंहमन्त्रकथनं । वराहमन्त्रकथनं । हरिहरमन्त्रकथनं । राधाकृष्णमन्त्रकथनं । बलराममन्त्रकथनं । हनूमन्मन्त्रकथनं । गरुडमन्त्रकथनं । जपपूजापुरश्चरणविधिकथनं शौर्यं । तिलकविधिकथनं । तुलसीमाहात्म्यकीर्त्तनं । करवीरादिपुष्पमाहात्म्यकथनं । विष्णोरपराधाः । प्रणामविधिः । प्रायश्चित्तविधिः । विष्णोर्द्वादशयात्राविधिकीर्त्तनञ्च ।

---

**No. 2120.** भगवद्भक्तिचन्द्रिका । Substance, country-made paper, 12 × 4 inches. Folia, 164. Lines, 5 on a page. Extent, 3,260 ślokas. Character, Bengali. Date, ? Place of deposit, Purohitpáḍá, Ráná-ghát, Paṇdit Rámalála Bandyopádhyáya Bhaṭṭáchárya. Appearance, old. Prose and verse. Correct.

**Bhagavad-bhakti-chandriká.** On the doctrine of faith and the divinity of Krishṇa, including directions how faith and devotion should be evinced. Anonymous.

**Beginning.** कनकरुचिदुकूलः कुण्डलोद्भासिगण्डः
शमितभुवनभारः कोऽपि लीलावतारः ।
त्रिभुवनसुखकारी शैलधारी मुकुन्दः
परिकलितरथाङ्गोमङ्गलं नस्तनोतु ॥

इह खलु भक्तमुकुटमणिमुख्यप्रभृतीनां सर्व्वेषामशेषगुणीयोनिरुपाधिमहाविभूतिरानन्दाकारः सर्व्वानेव प्राणिनोऽपूर्व्वरसास्वादनेनानन्दयन् नन्दनन्दन एव सकलवेदवेदान्तप्रतिपाद्य इति सर्व्ववेदान्तार्थनिष्कर्षरूपेण प्रमाणशिरोमणिना भागवतशास्त्रेण प्रतिपादितं । इत्यादि ॥

**End.** अत एव सर्व्वभूताशयस्य भगवतोऽधिष्ठिरसात्यकारणमपि धर्म्मसंस्थापनार्थ-मेवेति दिक्।

**Colophon.** इति श्रीभगवद्भक्तिचन्द्रिकापरिपूर्णा।

विषयः। भगवान् नन्दनन्दन एव सकलशास्त्रप्रतिपाद्य इति निरूपणं। श्रीमद्भागवतस्य सकलप्रमाणश्रेष्ठत्वकथनं। वेदादिशास्त्रेभ्यः प्राधान्यकीर्त्तनञ्च। भक्तेः रसत्वव्यवस्थापनं। भगवानेव भक्तिरसालम्बन इति निरूपणं। भक्तिमाहात्म्यं। ज्ञानादिभ्यः श्रेष्ठत्वकथनं। भगवन्माहात्म्यकथनं। अवतारतारतम्यकथनं। भगवद्भजनाकरणे दोषकीर्त्तनं। नामसराजसमासात्त्विकपुराणेषु यथाक्रमं शिवब्रह्मविष्णूनां महात्म्याधिक्यनिरूपणं। भगवत्सेवायामेकान्तिन एव अधिकारीतिनिरूपणं। वासुदेवादिचतुर्व्यूहनिरूपणं। अहङ्कारोपासनानिरूपनं। भगवतः साकारत्वसंस्थापनं। तच्छरीरस्य अमायिकत्वन्नित्यत्वमितिकथनं। भक्तिरेव तद्दर्शनोपाय इति निरूपणं। भगवतो भक्तानन्दित्वकथनं। भगवद्भक्तानां मोक्षेऽपि निस्पृहत्वकथन। भक्त्युपायकीर्त्तनञ्च।

---

**No. 2121.** प्रायश्चित्तप्रकाशः। Substance, country-made paper, 12 × 3½ inches. Folia, 84. Lines, 6 on a page. Extent, 2,805 ślokas. Character, Bengali. Date, SK. 1698. Place of deposit, Purohitpáḍá, Ráṇághát, Paṇḍit Rámalála Bandyopádhyáya Bhaṭṭachárya. Appearance, old. Prose. Correct.

**Práyaśchitta-prakáśa.** Principles which regulate expiations, and the different forms thereof for the expiation of particular offences. By Pradyotana Bhaṭṭáchárya, son of Balabhadra.

**Beginning.** मम सत्त्वविरोधी निर्ज्जितोऽनेन भित्त्वा
अनुरिति + + + + प्रीतिभाजा स्मरेण।
अगिव कुवलयानामाद्गरेणापनीता
जयति जनकजाया राघवेणाङ्गदृष्टिः॥
गुरुं गणेशं संस्मृत्य नत्वा स्मृतिकृतोमनीन्।
प्रायश्चित्तप्रकाशोऽयं प्रद्योतनेन तन्यते॥

अथ प्रायश्चित्तलक्षणं। तत्र हारीतः। यद्रोपचितमशुभं नाशयति तत्प्रायश्चित्तं। यद्वा यथाविध्यनुष्ठानात् सञ्चितमशुभमेव नाशयति तत्प्रायश्चित्तं। इत्यादि॥

**End.** आत्मघातिसर्पेण प्रायश्चित्तं विधाय नारायणबलिर्देय इति मतमिदं सर्व्वत्रैव न परं प्रचरतीतिशम्।

**Colophon.** इति समिश्रबलभद्रात्मजसकलशास्त्रारविन्दप्रद्योतनश्रीप्रद्योतनभट्टाचार्य्यविरचितः प्रायश्चित्तप्रकाशः सम्पूर्णः ।

विषयः । प्रायश्चित्तस्वरूपकथनं । दीर्घकालं प्रायश्चित्ताकरणे व्यवस्थाकथनं । लोभादिना अनुग्रहकरणे दोषकथनं । अतिपातकमहापातकोपपातकजातिभ्रंशकरणादिपापलक्षणं । ब्रह्महत्यादिकर्म्मविपाककथनं । प्रायश्चित्तपूर्व्वाङ्गकृत्यनिरूपणं । कृच्छ्रादिव्रतलक्षणं । अनुतापादिविधिकथनं । सर्व्वेषां पापानां प्रायश्चित्तकथनं । गोवधप्रायश्चित्तं । व्रतभङ्गप्रायश्चित्तं । निषिद्धमांसलशुनपलाण्डुप्रभृतिभोजनप्रायश्चित्तं । अगम्यागमनप्रायश्चित्तं । अपात्रसम्प्रदानककन्यादानप्रायश्चित्तं । परिवेदनप्रायश्चित्तं । विवाहात् पूर्व्वं कन्याया रजोदर्शने प्रायश्चित्तं । उच्छिष्टस्पर्शादौ प्रायश्चित्तं । कन्यापुत्रविक्रयप्रायश्चित्तं । निन्दितान्नभोजनादिप्रायश्चित्तं । अभिचारादिप्रायश्चित्तं । सामान्यतः स्त्रीवधप्रायश्चित्तं । व्रात्यप्रायश्चित्तं । वृक्षच्छेदनादिप्रायश्चित्तं । जलादौ विष्ठादित्यागप्रायश्चित्तं । नीलीरञ्जितवसनधारणे प्रायश्चित्तं । संसर्गप्रायश्चित्तं । आत्मघातप्रायश्चित्तकथनञ्च ।

---

**No. 2122.** वृन्दावनशतकम्, वा वृन्दावनरहस्यम् । Substance, country-made yellow paper, 9 × 4 inches. Folium, 1. Lines, 18. Extent, 28 ślokas. Character, Bengali. Date, ? Place of deposit, Káṇágháṭa, Bábu Surendranátha Pála Chaudhúrí; another copy at Calcutta, Bábu S'uvaladása Mallik. Appearance, new. Verse. Correct.

**Vṛindávana-rahasya** *alias* **Vṛindávana-śataka.** A century of verses in praise of the sanctity of the town of Vṛindávana. By Prabodhánanda Sarasvatí. The codex is obviously incomplete, for it contains only 28 s'lokas when from its name it should contain a hundred.

**Beginning.** नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुतमहा-
भदिम्ने विभ्राजत्कनकरुचिधाम्ने स्वरूपया ।
असङ्कोचेनैव स्वपदमखिलेभ्यः स्वयमदा
ददौ यः सद्भक्तिं विमलतरमाधारसमयीम् ॥
यस्मिन् प्रविशेन्मनोऽपि महतां का तत्र वार्त्ता पुनः
शास्त्राणां ज्ञपितस्य यद्भगवता भक्त्यैव भक्तोत्सवः
तद्वृन्दावनमुन्मदेन रसिकद्वन्द्वेन केनाप्यहो
नित्याक्रीड़तया गृहीतमिह के विद्युत्गौराश्रयाः । इत्यादि ।

**End.** श्रीमद्वृन्दावनैश्वर्य्यं सहस्रामैव केवलम् ।
इति श्रीवृन्दावनरहस्यम् ।

**Colophon.** इति श्रीप्रबोधानन्दसरस्वतीश्रीपादविरचितं श्रीवृन्दावनशतकं समाप्तम् ।

विषयः । वृन्दावनमाहात्म्यवर्णनं ।

**No 2123.** दायभागटिप्पनी। Substance, country-made paper, 13 × 4 inches. Folia, 122. Lines, 6 on a page. Extent, 3,099 ślokas. Character, Bengali. Date, ? Place of deposit, Májdá, Post Ránághát, Paṇdit Madhusúdana Nyáyaratna; another copy at S'ántipura, Paṇdit Kálidása Vidyavagíśa. Appearance, very decayed. Prose. Correct.

**Dáyabhága-ṭippaní.** A gloss on the Dáyabhága of **Jímúta-váhana.** By S'rínátha, son of S'ríkara Ácharya.

**Beginning.** नव्यनीरधरनीलमूलमंबलारुचिरमेदुराम्बरं।
नौमि वाङ्मनसयोरगोचरं चिन्मयं मुरहराह्वयं महः॥
जीमूतवाहननिबद्धमथो विबद्ध-
प्रायप्रसिद्धमुनिदृब्धवचःसमाधि।
दुर्बोधमत्र विषये नितरां मया तत्
व्याख्यायतेऽल्पमतिप्रतिबोधहेतोः॥
श्रीकराचार्य्यपुत्रेण प्राचीरत्नेन धीमता।
टिप्पनी दायभागस्य श्रीनाथेन विधीयते॥

शास्त्रारम्भे विघ्नविघाताय सदाचारबोधितकर्त्तव्यताकं मङ्गलं विधित्सु परप्रवृत्त्यर्थं प्रयोजन सम्बन्धाभिधेयांश्चाभिधित्सुर्ग्रन्थकारः प्रतिजानीते, सधार्दीत्यादि। शृणुध्वमित्यवधानार्थमत्याक्षेपः। इत्यादि।

**End.** एवञ्चेति दुहितृतोऽप्यर्जितायाः पत्न्या भोगावशिष्टधने यद्यनन्तराधिकारिणामधिकारस्तदा सुतरां दुहितृधिकारोऽपीतिभावः। शेषं सुगमं।

**Colophon.** (इतः परं नास्ति।)

विषयः। जीमूतवाहनकृतदायभागस्य पत्न्यधिकारांशं व्याख्यानं।

---

**No. 2124.** गुणप्रकाशविवृतिः। Substance, country-made paper, 11 × $2\frac{1}{4}$ inches. Folia, 91. Lines, 7 on a page. Extent, 3,344 ślokas. Character, Bengali. Date, ? Place of deposit, Niśidágaḍa Grama, Post Vñaichi, Zilla Burdwan, Paṇdit Váṇeśvara Vidyáratna; other copies at S'ántipura, Rámayádava Chuḍámaṇi, and at Calcutta, Government of India. Appearance, old. Prose. Correct.

**Guṇaprakáśa-vivṛiti.** A commentary on the Kíraṇávali of Varddhamána Mis'ra. By Mathuránátha Tarkavágís'a, son of S'rírama Tarkálankára. In Hall's "Contributions," (p. 67) the work is named Guṇaprakás'a-didhiti-Máthuri. There is Guṇaprakás'a-vivṛiti by Raghu-nátha S'iromaṇi.

**Beginning.** कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमताभयूरानाथतर्कवागीशधीमता ।
गुणप्रकाशविवृतिः क्रियते विदुषां मुदे ॥

निर्व्विघ्नं प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं महादेवसन्ध्याजलाञ्जलिनमस्काररूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति एकचेति । इत्यादि ।

**End.** प्रकृते चाग्निसंयोगस्य कार्य्यसत्त्वभावेन कुतोहेतुत्वं कल्पनीयं गौरवान्मानाभावाच्च न्यायवैशेषिकसिद्धान्तस्य निर्य्युक्तिकत्वेनाश्रद्धेय इति प्राहुः । (इत्यतोनास्ति)

विषयः । वर्द्धमानकृत किरणावलीप्रकाशस्य व्याख्यानं ।

---

**No. 2125.** वैष्णवतोषणी । Substance, country-made paper, 13 x 5 inches. Folia, 470. Lines, 6—12 on a page. Extent, 25,380 ślokas. Character, Bengali. Date, ? Place of deposit, Nisidágada Gráma. Post Vñaichi, Zilla Burdwan, Pandit Vánesvara Vidyaratna; other copies, at Calcutta, Dr. Rájendralála Mitra, and Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

**Vaishṇava-toshaṇí.** A commentary on the tenth book of the Bhágavata Puráṇa. By Sanátana Gos'vámi. The commentator's object is to establish the divinity of Kṛishṇa, and elaborate the philosophy of the Bhakti doctrine. In the colophon of the work a long account is given of the author, and of the associates of Cháitanya who the author holds is an incarnation of Kṛishṇa.

**Beginning.** श्रीमन्मदनगोपालं वृन्दारण्यपुरन्दरं ।
श्रीगोविन्दं प्रपद्येऽहं दीनानुग्रहकारकं ॥
वन्दे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवं ।
प्रेमभक्तिवितानार्थं गौड़ेष्ववततार यः ॥
श्रीमाधवपुरीं वन्दे यतीन्द्रं शिष्यसंयुतं ।
लोकेष्वङ्कुरितो येन कृष्णभक्तिसुराङ्घ्रिपः ॥
श्रीभागवतनिष्पर्थटीकाद्दविरतापि यैः ।
श्रीधरस्वामिपादांस्तान् वन्दे भक्त्येकरक्षकान् ॥
— — — — — — — — — — — — ।
श्रीचैतन्यपदाम्भोजगन्धज्ञैरेव वैष्णवैः ।

सम्यक्प्रणयितुं शक्या सेयं वैष्णवतोषणी ॥

— — — — — — — — — |

श्रीयुक्तश्रीराधेतिप्रयोगोऽत्र श्रीकृष्णलीलारम्भोऽतिशयेन प्रेम्णा विराजमा-
नत्वात्। टजभावः समासान्तविधेरनित्यत्वात्। इत्यादि।

End. अहोमधुपुरीधन्या वैकुण्ठाच्च गरीयसीत्यादि ॥

Colophon. इति श्रीदशमटिप्पण्यां नवतितमः।
श्रीमच्चैतन्यरूपस्य प्रीत्यै भगवतः प्रभोः।
टिप्पणी दशमेस्कन्धे पूर्णावैष्णवतोषणी ॥
ये श्रीभागवतं प्राप्य स्वप्ने प्राप्ताश्च जागरे।
स्वप्नदृष्टा देवविप्राः प्रथमे वयसि स्थिताः ॥
ममज्जुः श्रीभगवतः प्रेमामृतमहाम्बुधौ।
तेषामेवहि लेखोऽयं श्रीसनातननामिनां ॥
तदेतद्विनिवेद्यापि किञ्चिदन्यद्विवक्षया।
अथैतद्भृङ्गजीवेन ज[illegible]नेदं निवेद्यते ॥
उद्यच्चालुक्यपदक्रमाश्रितवती यस्यामृतगाविनी
जिह्वा कल्पलता त्रयी मधुकरी भूयोनरीनृत्यते।
[illegible]ज्ञो राजसभाजितपदः कर्णाटभूमिपतिः
श्रीसर्व्वज्ञजगद्गुरुर्भुवि भरद्वाजान्वयग्रामणीः ॥ १ ॥
पुत्रस्तस्य नृपस्य कश्यपतुलामारोहतो रोहिणी-
कान्तस्पर्द्धियशोधरः सुरपतेस्तुल्यप्रभावोऽभवत्।
सर्व्वक्ष्मापतिपूजितोऽखिलयजुर्वेदैकविश्रामभू-
श्रीमाननिरुद्धदेव इति यः ख्यातिं क्षितौ जग्मिवान् ॥ २ ॥
महिष्योर्भूयस्यप्रथितयशसस्तस्य तनयौ
प्रजज्ञाते रूपेश्वरहरिहराख्यौ गुणनिधी।
तयोराद्यः शास्त्रे प्रबलतरभावं बहुविधे
जगामान्यः शास्त्रे निजनिजगुणप्रेरिततया ॥ ३ ॥
विभज्य स्वं राज्यं मधुरिपुपुरप्रस्थितिदिने
पिता ताभ्यां रूपेश्वरहरिहराभ्यां किल ददौ।
निजज्येष्ठं रूपेश्वरमथ कनिष्ठो हरिहरः
स्वराज्याद्दार्य्याणां कुलतिलकमभ्रंशयदसौ ॥ ४ ॥
श्रीरूपेश्वरदेव एवमरिभिर्निर्धूतराज्यः क्षमा-

दृष्ट्वाभिस्तुरगैः समं दयितया पौरस्त्यदेशं ययौ ।
तत्रासौ शिखरेश्वरस्य विषये सख्युः सुखं संवसन्
धन्यः पुत्रमजीजनद्गुणनिधिं श्रीपद्मनाभाभिधं ॥ ५ ॥
यजुर्वेदः साङ्गो विततिरपि सर्व्वोपनिषदां
रसज्ञायां यस्य स्फुटमघटयत्ताण्डवकलां ।
जगन्नाथप्रेमोन्मथितहृदयः कर्णपदवीं
न यातः केषां वा स किल स्वरूपेश्वरसुतः ॥ ६ ॥
विहाय गुणिशेखरः शिखरभूमिवासस्पृहां
स्फुरत्सुरतरङ्गिणीतटनिवासपर्य्युत्सुकः ।
ततो दनुजमर्द्दनक्षितिपपूज्यपादः क्रमा-
दुवास नवहट्टके स किल पद्मनाभः कृती ॥ ७ ॥
मूर्त्तिं श्रीपुरुषोत्तमस्य यजतस्तत्रैव सर्वोत्सवैः
कन्याष्टादशकेन सार्द्धमभवत्तस्य पञ्चात्मजाः ।
तत्राद्यः पुरुषोत्तमः खलु जगन्नाथस्य नारायणो-
धीरः श्रीलमुरारिरुत्तमगुणः श्रीमान् मुकुन्दः कृती ॥ ८ ॥
जातस्तत्र मुकुन्दतो द्विजवरः श्रीमान् कुमाराभिधः
कश्चिद्द्रोहमवाप्य सत्कुलजनिर्वङ्गालयं सङ्गतः ।
तत्पुत्रेषु महिष्ठवैष्णवगणप्रेष्ठास्त्रयो जज्ञिरे
ये स्व गोत्रममुत्र चेह च पुनस्स्वकृत्यैरर्चितं ॥ ९ ॥
आद्यः श्रीलसनातनस्तदनुजः श्रीरूपनामा ततः
श्रीमद्वल्लभनामधेयवलितो निर्व्विद्य ये राज्ञतः ।
प्रासाद्यातिकृपां ततो भगवतः श्रीकृष्णचैतन्य+ -
माषाद्यं खलु भेजिरे मुरहरप्रेमाढ्यभक्तिश्रियि ॥ १० ॥
यः सर्व्वावरजः पिता मम स तु श्रीराममासेदिवान्
गङ्गायां द्रुतमग्रजौ पुनरमू वृन्दावनं सङ्गतौ ।
याभ्यां माथुरगुप्ततीर्थनिवहो व्यक्तीकृतो भक्तिभि-
रण्युर्व्व्रजराजनन्दनरताः सर्व्वेऽप्रवर्द्धिताः ॥ ११ ॥
यत्स्वीयं रघुनाथदास इति विख्यातः क्षितौ राधिका-
कृष्णप्रेममहार्णवोर्म्मिनिवहे घूर्णन् सदा दीव्यति ।
हष्टाम्नक्रप्रभाभरमतीत्यैवानयोर्भ्राजतो-
र्येषुल्यलपदे मतस्त्रिभुवनेशार्य्यमार्य्याश्रमैः ॥ १२ ॥

गोपालपालकव्याजाद्ययोः साक्षाद्बभूव ह ।
सोऽचाक्रीयतगोपालः चौराहरणलीलया ॥
तयोरनुजरूपेषु काव्यं श्रीहंसदूतकं ।
श्रीमदुद्धवसन्देशश्छन्दोऽष्टादशकस्तथा ॥
स्तवावल्युत्कलिकावल्ली गोविन्दविरुदावली ।
प्रेमेन्दुसागराद्याश्च बहवः सुप्रतिष्ठिताः ॥
विदग्धललिताप्राख्यमाधवं नाटकद्वयं ।
भाणिकादानकेल्याख्या रसामृतयुगं ततः ॥
मथुरामहिमा पद्यावली नाटकचन्द्रिका ।
संक्षिप्तश्रीभागवतामृतमेते च सद्गुराः ॥
अथाग्रजकृतेष्वग्र्य श्रीलभागवतामृतं ॥
हरिभक्तिविलासस्य तट्टीका दिक्प्रदर्शिनी ॥
लीलास्तवटिप्पणी च श्रीमद्दैष्णवतोषिणी ॥

विषयः । श्रीमद्भागवतीयदशमस्कन्धस्य व्याख्यानं ।

---

**No. 2126.** महाभारतार्थसङ्ग्रहदीपिका, (आदिपर्व्व) । Substance, palm-leaf, 10 × 1½ inches. Folia, 121. Lines, 5 on a page. Extent, 2,571 ślokas. Character, Bengali Date, Sk 1600. Place of deposit, Niśidágada Gráma, Post Vñaichi, Zilla Burdwan, Pandit Vánesvara Vidyaratna; another copy at Calcutta, Government of India. Appearance, old. Prose. Correct.

**Mahábháratártha-sañgraha-dípiká.** A commentary on the Mahábhárata. By Arjuna Mis'ra, son of Is'ána. The codex contains only the A'di Parva or the first book.

**Beginning.** यस्यैकवेणुपरमाणुरपि क्षणेन
तुर्दधाति विपुलं ममभीप्सितेषु ।
नमो हरेर्हरतु पादसरोजयुग्मं
प्रारिप्सितप्रतिहतीरभितश्चिराय ॥
वेदव्यासवैशम्पायनदेवबोधविमलबोधसर्व्वज्ञनारायणभट्टशाण्डिल्यमाधवपितृपादेभ्यो नमः ।
श्रीदेवबोधपादादिमतमालोक्य यत्नतः ।
क्रियतेऽर्ज्जुनमिश्रेण भारतार्थप्रदीपिका ॥

अत्र प्रायेण पुस्तकेषु भगवद्वासुदेवादिपदानां नमस्कारो दृश्यते तत्र श्रीदेवबोधपादानां खरसेनादिषु । तत्र श्रीमद्विमलबोधादिमतानुसारेण पञ्चनमस्कारतात्पर्यं यथामति विव्रियते । ॐ नमो भगवते वासुदेवाय । ॐ नमः पितामहाय । ॐ नमः प्रजापतिभ्यः । ॐ नमः श्रीकृष्णद्वैपायनाय । ॐ नमः सर्व्वविघ्नविनायकेभ्यः । इत्यादि ।

**End.** अपवर्गार्थं मोक्षार्थं । कृत्वाः अन्याः कृत्रिमाः स्मृताः । २१४ । श्रीकृष्णः ।

**Colophon.** इति भारताचार्य्यपाठकाख्यश्रीमदीशानतनयभारताचार्य्यमिश्रार्ज्जुनकृतौ महाभारतार्थप्रदीपिकायां टीकायामादिपर्व्व समाप्तं । शकाब्दाः १६ ।

माघे नभसि कृष्णाक्षे पक्षे गुरुदिने मुदा ।
टीकेयं लिखिता यत्नात् श्रीदुर्गारामशर्म्मणा ॥

**विषयः ।** महाभारतीयादिपर्व्वव्याख्यानं ।

---

**No. 2127. योगचन्द्रिका ।** Substance, palm-leaf, 10 × 2¼ inches. Folia, 23. Lines, 5 on a page. Extent, 426 ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegrama, Post Sátgechhe, Zilla Burdwan, Pandit Sadananda Bhaṭṭáchárya. Appearance, old. Prose and verse. Correct.

**Yoga-chandriká.** A commentary on the Yoga aphorisms of Patanjali. By Ananta S'armá. Very rare. Mr. Hall found the name cited in the *Haṭha-saṅketa-chandriká* but no MS. of the work. *Contributions*, p. 17.

**Beginning.** गुरुं प्रणम्य सूत्रार्थचन्द्रिका क्रियते मया ।
अनन्तेनेश्वरप्रीत्यै सच्चिदानन्दरूपिणम् ॥
अथ योगानुशासनम् ।
अथशब्दोऽधिकारवाची, योगो नाम समाधानम् । अनुशिष्यते व्याख्यायते येन तत् । इत्यादि ।

**End.** सर्व्वसिद्धिमूलभूता समाधिसिद्धिः सैव साधनीयेति । ३१ ॥
सूत्रार्थदृष्टिमालोक्य कृतेयं योगचन्द्रिका ।
अनन्तेनेश्वरप्रीत्यै चार्पिता शिवपादयोः ॥

**Colophon.** इति श्रीपतञ्जलिकृते योगशास्त्रे योगचन्द्रिकायां चतुर्थः पादः ।

**विषयः ।** पतञ्जलिकृतयोगसूत्रस्य व्याख्यानं ।

---

**No. 2128. आचारदर्पणः ।** Substance, country-made paper, 12 × 8 inches. Folia, 92. Lines, 5 on a page. Extent, 1,535 ślokas. Character, Nágara. Date, ? Place of deposit, Vegunegráma, Post Sátgechhe, Zilla Burdwan, Paṇḍit Sadánanda Bhaṭṭácharya. Appearance, new. Prose and verse. Correct.

**A'chára-darpaṇa**. A digest of the rules regarding the daily duties of householders, including S'ráddhas and other obligatory rites. By S'rídatta Paṇḍita.

**Beginning**. दोश्चिन्तेन्दुजयश्चेव विद्युवानश्चदृदाविष ।
हरिरम्बिकानवज्ञाचामपीतो पुनातु वः ॥
अद्दोराचाश्रितोधर्म्म इव वाजसनेयिनां ।
निबध्यते निबन्धोऽयं धर्म्मशास्त्रनिबन्धिभिः ॥
तत्र मनुः । ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् । इत्यादि ।

**End**. अपि च काठके प्रवचने विज्ञायेत । अथ यावा विजानिथमाना: पतिभिः अथ मयन्मामिति श्रीपामिन्द्रस्तावरः ॥
समूलवचनाभोगोमोमांसान्यायनिर्म्मलः ।
श्रीदत्तेन मतामेष आचारे दर्पणः कृतः ॥
दुर्लभमपि सूक्तं मे मन्वादिवचनाश्रितं ।
अपि चम्मादकं तीर्थसन्निखातगतं शुचि ॥

**Colophon**. इति श्रीमहोपाध्याय श्रीदत्तकृत आचारदर्पणः समाप्तः ।

विषयः । प्रत्युत्थानविधिकथनं । मूत्रपुरीषोत्सर्गविधिः । शौचविधिः । आचमनविधिः । आचमननिमित्तानि । द्विराचमननिमित्तानि । आचमनानुकल्पविधिः । आचमनापवादः । दन्तधावनविधिः । प्रातः स्नानादिविधिः । सामान्यतः स्नानविधिः । असामर्थ्यस्पर्शनादौ स्नानविधिः । स्नानानुकल्पकथनं । कात्यायनीयस्नानप्रयोगः । वासः परिधानविधिः । सन्ध्योपासनविधिः प्रयोगकथनञ्च । जपविधिः । जपमालादिविधिः । कर्म्मकर्तुर्नियमादिकथनं । ब्रह्मयज्ञविधिकथनं । स्वाध्यायविधिः । तर्पणविधिः । तर्पणोत्तरकर्म्मकथनं । पूजाविधिः । देवपूजादौ पूजाधारकथनं । पुष्पादिविवेचनं । वैश्वदेवबलिकर्म्मकथनं । तत्र प्रयोगकथनं । नित्यश्राद्धविधिः । तत्प्रयोगकथनञ्च । अतिथिपूजाविधिः । भोजनविधिकथनं । शयनविधिकीर्त्तनञ्च ।

---

**No. 2129**. तत्त्वचिन्तामणौ द्वितीयपरिच्छेदे ईश्वरानुमानप्रकरणम् ।

Substance, palm-leaf, 10 × 2 inches. Folia, 56. Lines, 5 on a page. Extent, 1,135 ślokas. Character, Bengali. Date, Sk. 1478. Place of deposit, Vegunegráma. Post Sátgechhe, Zilla Burdwan. Paṇḍit Sadánanda Bhaṭṭácbárya. Appearance, old. Prose. Correct.

**Tattvachintámaṇi**. The great Nyáya work of Gaṅges'a. The codex contains only that portion of the work which treats of inference

as bearing on the existence of the Godhead, (*Is'varánumána-prakárana*) and of the errors of the Chárváka Baudha and Jaina theories, on the subject and emancipation. The codex is 377 years old. The entire work has been noticed before. This section of the work is exceedingly rare; it has not been included in the Calcutta edition.

**Beginning** एवमनुमाने निरूपिते तस्माज्जगद्विश्वं त्वंपुरुषधौरेयसिद्धिः क्षित्यादौ कार्य-त्वेन घटवत् सकर्तृकत्वानुमानात् । नन्न क्षित्यादिकं प्रत्येक न पक्षः तस्य स्वस्वशब्देनाभिधातुम-शक्यत्वात् । नापि मिलितमेकरूपाभावात् । इत्यादि ।

**End.** अतएवानुमानेनागमबाधाप्रयोजकत्वे, न च श्रुतिवाक्यद्वये नानाभावः उत्पन्नतत्त्व-ज्ञानस्यापवर्गविलम्बापपत्त्यर्थमुक्तरीत्या भोगस्यैवापेक्षितत्वादिति तदस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिसिद्धं कारणमनुमानं सिद्धमिति ॥

**Colophon.** इति महामहोपाध्याय श्रीगङ्गेश्वरविरचिते तत्त्वचिन्तामणौ द्वितीयपरि-च्छेदः । शाके १४०८ ।

**विषयः ।** ईश्वरानुमानप्रकारकथनं । अत्र चार्वाकबौद्धजैनादिमतखण्डनं । शक्तिर्न कारण-त्वादधिकेति व्यवस्थापनं । मोक्षलक्षणकथनं । ज्ञानान्मोक्ष इति निरूपणञ्च ।

---

**No. 2130. षट्चक्रदीपिका ।** Substance, country-made yellow paper, 10 × 3 inches. Folia, 22. Lines, 7 on a page. Extent, 731 ślokas. Character, Bengali. Date, ? Place of deposit, Gudapgráma, Post, Bhástádá, Zilla Burdwan, Pandit Aghoranátha Bhattácharya. Appearance, new. Prose. Correct.

**Shatchakra-dípiká.** A commentary on Púrnánanda's Shatchakra, a work on mystic diagrams connected with Kaula worship. By Rámanátha Siddhánta.

**Beginning** प्रणम्य गुरुपादाब्जद्वन्द्वमद्वन्द्वसाधनं ।
षट्चक्रदीपिकाटीका रच्यते नामदेशतः ॥
अथेति । अथशब्दो मङ्गलपूर्वकानन्तर्यार्थः । उक्तञ्च । इत्यादि

**End.** स तथा यतं संयतानन्दमेता यस्येति ॥ ५५ ॥
श्रीरामनाथसिद्धान्तरचिता तत्त्वदर्शिनी ।
समाप्ता सन्तोषमाधत्तां टीका षट्चक्रदीपिका ॥

**Colophon.** इति श्रीरामनाथसिद्धान्तविरचिता षट्चक्रदीपिका समाप्ता ।

**विषयः ।** पूर्णानन्दकृतषट्चक्रस्य व्याख्यानं ।

---

**No. 2131. भावचन्द्रिका ।** Substance, partly palm-leaves and partly country-made paper, 10 × 3½ inches. Folia, 35. Lines, 6 on a page. Extent, 813 ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegráma, Post Sátgechhe, Zilla Burdwan, Pandit Sadánanda Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

**Bháva-chandriká.** A dissertation on the nature of devotion (*bhava*) as an element of the Bhakti doctrine, and the various ways in which it should be evinced towards Krishṇa in the various relations of father, mother, son, lover, &c. By Chaṇḍídása.

**Beginning.** वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरं ।
उपेन्द्रं सान्द्रकारुण्यं सानन्दं नन्दनन्दनं ॥

इह खलु परमतत्त्वसाक्षात्कारस्यैव परमपुरुषार्थरूपतया तदधिगमाय इत्यादि ।

**End.** अतएव ऐश्वर्य्यमाधुर्य्यमय्योर्माधुर्य्यमय्या एव श्रीकृष्णाविर्भावपूर्णतया समुत्कर्ष इति सर्व्वमवदातं । इति ।

**Colophon.** इति श्रीभगवच्चरणारविन्दमधुव्रतश्रीचण्डीदासकृता भावचन्द्रिका सम्पूर्णा ।

**विषयः ।** महाभाव विना श्रीकृष्णमाधुर्य्यातिशय्यानुभवो न जायते इति निरूपणं । महाभावस्वरूपकथनं । भावलक्षण । रागानुरागादिस्वरूपकथनं । समञ्जसा रतिस्वरूपकथनं । कामानुगास्वरूपकथनं नित्यसिद्धागन्तुकभेदेन द्विविधभावनिरूपणं । रागमार्गस्य शुद्धताकथनं । साधनचतुष्टयनिरूपणं । अवतारभेदनिरूपणं । सामान्यतस्तत्त्वनिरूपण । भगवल्लीलाया नित्यत्वादिकथनं । महाभावस्य सर्व्वत सर्व्वोत्कर्षप्रदर्शनं । ज्ञानिभक्तादिषु भावव्यवस्थाकथनं । भगवत एव पूर्णतत्त्वाकारत्वमिति कथनं । भगवत्कामविशेषस्य प्रेमविशेषत्वकथनं । माधुर्य्यलीलाया उत्कृष्टत्वनिरूपणञ्च ।

---

**No. 2132. शुद्धिदर्पणम् ।** Substance, palm-leaf, 8 × 2 inches. Folia, 89. Lines, 5 on a page. Extent, ?, ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegráma, Post Sátgechhe, Zilla Burdwan, Paṇḍit Sadánanda Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

**S'uddhi-darpaṇa.** A summary of the laws relating to purification and mourning. By Ananta Yájnika.

**Beginning.** नत्वा गणेशपादाब्जं गुरूनपि महीयसः ।
याज्ञिकानन्तदेवेन क्रियते शुद्धिदर्पणं ॥

तत्रादौ शुद्धिपदार्थो निरूप्यते,—तत्र विहितकर्म्माईत्वप्रयोजको धर्म्मविशेषः शुद्धिः इत्यादि ।

End. अपि च गुणवचनोऽयं स यदा द्रव्ये उपसर्ज्जनीभूतस्तदा द्रव्यस्य यल्लिङ्गसंख्ये तद्भवे इति ।

Colophon. इति श्रीमदनन्तयाज्ञिककृतौ शुद्धिदर्पणं समाप्तिमगमत् ॥

विषयः। तत्रादौ शुद्धिलक्षणकथनं। सद्यमरणानुमरणयोर्व्यवस्था। अशौचनिरूपणं। अशौचान्तिक्रमे व्यवस्थाकथनं। अशौचसङ्करकथनं। गर्भस्रावाद्यशौचं। अशौचे वर्ज्यावर्ज्यनिरूपणं, गत्यविशेषाशौचं। अशौचापवादः। अस्थिसञ्चयादिविधिः। असत्शूद्रलक्षणकथनं। द्रव्यशुद्धिकथनं। वापीकूपतड़ागेषु मृते जलशुद्धिनिरूपणं। गृहमरणे शुद्धिकथनं। सूतिकादिमरणदाहादिव्यवस्था। पर्णनरदाहव्यवस्था। सुमुर्षुकृत्यनिरूपणं। वर्षमध्ये पुत्रस्य कृत्यनिरूपणं। पिण्डदानव्यवस्था। अशौचान्तदिनकृत्यं। वृषोत्सर्गविधिकथनं। प्रेतक्रियाधिकारिणः। दत्तकाशौचनिरूपणं। उभयतोमुखीदानादिव्यवस्थाकथनञ्च।

---

**No. 2133.** धर्म्मरत्नाकरः। Substance, country-made paper, 12 × 4 inches. Folia, 153. Lines, 7 on a page Extent, 3,923 Slokas. Character, Bengali. Date, ? Place of deposit, Vegunegrám, Post Sátgechhe, Zilla Burdwan, Pandit Sadánanda Bhattácharya. Appearance, decayed. Prose and verse. Correct.

**Dharma-ratnákara.** A digest of the Smriti rules regarding duty, or the religious duties enjoined on householders. By Rámes'vara Bhátta Mahámahopádhyáya.

Beginning. यत्पादाम्भोरुहध्यानानन्दनिर्व्वृतचेतसः।
मोक्षमप्यवजानन्ति तं वन्दे नन्दनन्दनं ॥
नत्वा वागीश्वरीं देवीं हरं विघ्नहरं तथा।
रामेश्वरेण क्रियते धर्म्मरत्नाकरो मुदा ॥

तत्रादौ धर्म्मस्वरूपं निरूप्यते तत्र जैमिनिः। चोदनालक्षणोऽर्थोधर्म्म इति। इत्यादि।

End. इति वचनेन गुरुशिष्ययोरन्तरागमने अहोरात्रमध्यायवर्ज्जनमिति।

Colophon. इति श्रीमहामहोपाध्यायभट्टश्रीरामेश्वरविरचितो धर्म्मरत्नाकरः समाप्तः।

विषयः। धर्म्मस्वरूपनिरूपणं। तिथिलक्षणं। मासादिलक्षणं। मासभेदनिरूपणं। युग्मादितिथिव्यवस्थाकथन। प्रतिपदादिषु विहितकृत्यविधानकथनं। उपवासविधिकथनं। मन्वन्तरानिरूपणं। युगाद्यानिरूपणं। संक्रान्तिनिरूपणं। अद्भुतनिरूपणं। विवाहव्यवस्थाकथन। मिताक्षरलक्षणादिकथनं। अशौचनिरूपणं। सहमरणविधिकथनं। अनुमरणव्यवस्थादिकथनं। देशान्तर-

मृतस्य प्रेतत्वाद्यवधारणकथनं । अशौचाभ्यन्तरकृत्यादिनिरूपणं । पर्णनरदाहविधिः । वृषोत्सर्गादिविधिः । षोड़शश्राद्धसपिण्डीकरणादिविधिकथनं । विप्रादिपतितश्राद्धकथनं । उत्तरक्रियाधिकारिनिरूपणं । मलमासनिरूपणादिक । तीर्थश्राद्धादिविधिकथनं । आमश्राद्धविधिकथनं । जीवत्पितृकश्राद्धविधिकथनं । अष्टकाश्राद्धविधिकथनं । दर्शश्राद्धविधिकथनं । द्रव्यशुद्धिकथनं । भक्ष्याभक्ष्यनिरूपणं । प्रायश्चित्ताधिकथनं । महापातकादिप्रायश्चित्तकथनं । गोमूल्यादिनिरूपणं । दत्तकविधिकथनं । दत्तकाशौचादिनिरूपणं । अशौचाभावकथनं । वेदाध्ययनविधिकथनं । सन्ध्यातर्पणादिविधिकथनं । अनध्यायनिरूपणञ्च ।

---

**No. 2134.** **न्यायमुक्तावली, वा लौकिकन्यायमुक्तावली ।** Substance, Palm-leaf, 12 × 4 inches. Folia, 152. Lines, 6 on a page. Extent, 2,513 ślokas. Character, Bengali. Date, ? Place of deposit Vegunegrám, Post Sátgechhe, Zilla Burdwan, Pandit Sadánanda Bhattacharya. Appearance, decayed. Prose. Correct.

**Láukika-nyáya-muktávalí** ALIAS **Nyáya-muktávalí.** A collection of proverbial phrases used as illustrative arguments in philosophical works, with their explanations and abstracts of the stories on which some of them are founded. By Prakás'átmá. The phrases are usually made up with the name of some object or objects with the word Nyáya added; thus *Andha-darpana-nyáya* or the Nyáya or argument of the blind (*andha*) and the looking-glass (*darpana*), *i. e.*, even as a looking-glass is useless to a blind man, so is &c., &c.; *Gangá srota-nyáya* or the argument of the stream of the Ganges, *i. e.*, even as the stream of the Ganges, though always flowing onwards, never comes to an end, so &c., &c.

**Beginning.** पालने विमलसत्त्वरूपये जन्मकर्मणि रजोजुषे लये ।
तामसाय जगतः प्रकाशकृद् द्वैतजालवपुषे नमः सते ॥
प्रकाशात्मा यतिः सम्यक् बालानां बोधसिद्धये ।
करोति लौकिकन्यायमुक्तावलिमनिन्दितां ॥

अथात्रादित आरभ्यैतावद्ग्रन्थे प्रसङ्गेन ग्रन्थान्तरसंवादेष्वपि पठितानां न्यायानां सङ्गतिरूहनीया । इत्यादि ।

**End.** यथास्य पुरुषस्य साध्यतया उपक्रमस्तथैवोपसंहार इति तद्देव वाक्यार्थस्तथाप्रकृतेऽपि इति बोध्यं ॥

**Colophon.** इति श्रीभगवत्प्रकाशात्मविरचिता न्यायमुक्तावली सम्पूर्णा।

विषयः। कार्य्येण कारणसंप्रत्यय इति न्यायस्य स्वरूपादिकीर्त्तनं। एवं परत्र ज्ञेयं। कीटभृङ्गन्यायः। व्रीहिबीजन्यायः। वृन्तप्रकम्पनन्यायः। शाखाचन्द्रन्यायः। रेखागवयन्यायः। प्रासादवासिन्यायः। ज्योतिर्न्यायः। अध्यारोपापवादन्यायः। सोपानारोहणन्यायः। सम्भवत्येकवाक्यत्वे इति न्यायः। कारणगुणप्रक्रमन्यायः। वरगोष्ठीन्यायः। देवदत्तपुत्रन्यायः। स्वामिभृत्यन्यायः। धर्म्मिकल्पनान्यायः। स्थूणानिखननन्यायः। कण्ठचामीकरन्यायः। परिषन्न्यायः। अर्के चेन्मधुन्यायः। सिंहावलोकनन्यायः। मण्डूकप्लुतिन्यायः। स्थूलारुन्धतीन्यायः। सम्भवत्येकवाक्यत्वे न्यायः। देवताधिकरणन्यायः। सावकाशनिरवकाशन्यायः। गोबलीवर्द्दन्यायः। अहिकुण्डलन्यायः। यत्कृतकं तदनित्यं न्यायः। न हि निन्दा निन्दितुं प्रवर्त्तते न्यायः। शतपत्रशतभेदन्यायः। अनधीते महाभाष्यन्यायः। तदभिन्नभिन्नस्य तदभिन्नत्वन्यायः। चतुर्वेदविन्न्यायः। अन्धगजन्यायः। नीरक्षीरन्यायः। मन्दंशन्यायः। श्यालशुनकन्यायः। एकाकिनीप्रतिज्ञान्यायः। काकदधिघातकन्यायः। तप्तमाषकोद्धारणन्यायः। घटारोहणन्यायः। विषभक्षणन्यायः। सच्छिद्रघटाम्बुन्यायः। घुणाक्षरन्यायः। ब्राह्मणश्रमणन्यायः। तिर्य्यगधिकरणन्यायः। आभाणकन्यायः। गङ्गास्रोतोन्यायः। सिंहावलोकनन्यायः। पूर्व्वमपवादा निविशन्तेन्यायः। कौण्डिन्यन्यायः। पिष्टपेषणन्यायः। सूचीकटाहन्यायः। गन्धर्व्वनगरन्यायः। स्थालीपुलाकन्यायः। ब्राह्मणपरिव्राजकन्यायः। आयुर्घृतमितिन्यायः। खलेकपोतन्यायः दग्धपटन्यायः। कूष्माण्डन्यायः। एकत्र निर्णीतः शास्त्रार्थ इति न्यायः। तुष्यतु दुर्ज्जन इति न्यायः। गजभुक्तकपित्थन्यायः। काकाक्षिन्यायः। कैमुतिकन्यायः। अर्द्धजरतीन्यायः। अर्द्धं त्यजति पण्डित इति न्यायः। उष्ट्रलगुडन्यायः। देहलीदीपन्यायः। रूढिर्योगमपहरतीतिन्यायः। शाब्दी ह्याकाङ्क्षान्यायः। क्रतुर्विहितोभाव इतिन्यायः। हस्तामलकन्यायः। कारणनाशे कार्य्यनाशन्यायः। स्वप्नशयान्यायः। चक्रभ्रमणन्यायः। दग्धरसनान्यायः। अन्धदर्पणन्यायः। मूर्खसेवनन्यायः। चित्रपटन्यायः। अरण्यरोदनन्यायः। काकतालीयन्यायः। संयोगपृथक्त्वन्यायः। अश्वतरीगर्भन्यायः। व्याघ्रीक्षीरन्यायः। जलौकान्यायः। कूपन्यायः। चालनीन्यायः। दूरादस्पर्शनं वरमितिन्यायः। विवाहप्रवृत्तभृत्यन्यायः। तमःप्रकाशन्यायः। अहिनकुलन्यायः। स्फटिकलौहित्यन्यायः। [illegible]वम्बितचन्द्रन्यायः। मृषासिकतामन्यायः। शैलूषीन्यायः। बध्यघातकन्यायः। सन्दि-[illegible]न्दिग्धमितिन्यायः। गलेपादुकान्यायः। वह्निधूमन्यायः। आकाशापरिच्छिन्नत्वन्यायः। यः चोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति न्यायस्वरूपादिकथनञ्च।

---

**No. 2135.** पातञ्जलसूत्रभाष्यं। Substance, country-made yellow paper, 13 × 2½ inches. Folia, 42. Lines, 6 on a page. Extent, 959 ślokas. Character, Bengali. Date, ? Place of deposit, Guáḍpa, Post Bhástáḍá, Zilla Burdwan, Paṇḍit Aghoranátha Bhaṭṭácbárya. Appearance, new. Prose. Incorrect.

**Pátanjala-sútra-bháshya.** A commentary on the Yoga aphorisms of Patanjali. By Bhavadeva, pupil of Bhavadeva Ṭhakkura, son of Srikrishnadeva Mahámahopádhyáya, of Mithilá.

**Beginning.** पतञ्जलिं नमस्कृत्य योगिभ्योऽन्यांश्च योगिनः ।
भवदेवेन तत्सूत्रव्याख्यानं क्रियतेऽधुना ॥

मङ्गलं कुर्व्वन्नेव शिष्यावधानाय प्रतिजानीते अथेति । अत्र श्रीकेशवार्थतया अकारोऽथशब्देन मङ्गलं करोत्यनेन मङ्गलाचरणं । इत्यादि ।

**End.** आनन्दं ब्रह्मणोरूपं तच्च मोक्षे प्रतिष्ठित ।
इत्यादिश्रुतिरपीत्यर्थः ॥
एवं चतुर्थचरणे कैवल्यं प्रतिपादितं ।
पतञ्जलिमुनीन्द्रेण येन तं भावयाम्यहं ॥
रमापांशुजलव्याख्यां कल्पयित्वा व्रजाम्यहं ।
श्रिया चूडीकृते श्रीमत्पादाम्भोजे रमापतेः ॥
शाकेऽद्रिषट्वाण + +.+ + + मासेऽग्रहायणवल्लक्षपक्षे ।
+ + तिथौ श्रीभवदेवशर्म्मा पतञ्जलेर्भाष्यमिदं व्यधात् ॥
अमध्यमेतन्मम धार्ष्ट्यमीदृशं यद्व्यर्थितोभाष्यमिदं व्यधायि ।
भागीरथीतो + + ग्रहीत्वा ये स्वकीयत्वमुशन्ति सन्तः ॥
— — — — — — ।

**Colophon.** इति मैथिलमिश्रश्रीकृष्णदेवतनयमहामहोपाध्याय मट्ठक्कुरश्रीभवदेवशिष्य-शिष्यमिश्रश्रीभवदेवविनिर्म्मिते पातञ्जलसूत्रभाष्ये कैवल्यचरणव्याख्या सम्पूर्णा ।

विषयः । पतञ्जलिप्रणीतयोगसूत्रस्य व्याख्यानं ।

---

**No. 2136.** व्यवहारदर्पणम् । Substance, country-made paper, 13 × 4 inches. Folia, 78. Lines, 6 on a page. Extent, 2,093 Slokas. Character, Bengali. Date, ? Place of deposit, Vegunegrám, Post Sátgechhe, Zillah Burdwan, Pandit Sadánanda Bhattácharya. Appearance, old and decayed. Prose and verse. Correct.

**Vyavahára-darpana.** A summary of the laws relating to Judicature. By Ananta Yájnika.

**Beginning.** गणेशं भारतीं + + वाञ्छितार्थप्रसाधये ।
तनोति याज्ञिकोऽनन्तो व्यवहारेषु दर्पणम् ॥

अथ व्यवहारशब्दव्युत्पत्तौ कात्यायनः ।

वि नानार्थेऽवसन्देहे हरणं हार उच्यते ।

नानासन्देहहरणाद्व्यवहार इति स्मृतः ॥ इत्यादि ।

**End.** न तच्छक्यमपाकर्तुं क्रमात् त्रिपुरुषागतं ।

पित्रा सह विभिरित्यर्थ इति ।

**Colophon.** इति श्रीमदनन्तयाज्ञिककृतौ व्यवहारदर्पणं समाप्तं ।

विषयः । व्यवहारशब्दव्युत्पत्तिकथनं । व्यवहारकालनिरूपणं । भाषापादकथनं । भाषालेख्यानुसन्धानविधिः । प्रतिज्ञापत्रे लेख्यनियमकथनं । उत्तरपादकथनं । विचारकरणविधिः । उत्तरस्वरूपकथनं । एतद्भेदकथनं । प्रत्यवस्कन्दनविधिः । प्राङ्न्यायोत्तरविधिः । हीनवादिलक्षणं । उत्तराभासलक्षणं । सभ्यलक्षणतत्कालादिनिरूपणं । साक्षिलक्षणतद्भेदादिकथनं । असाक्षिणः । साक्ष्यग्रहणप्रकारकथनं । लेख्यविधिः । तत्कालादिनिरूपणं । जयपत्रलेखनप्रकारकथनं । भुक्तिनिरूपणं ।

---

**No. 2137.** मालतीमाधवटीका । Substance, country-made yellow paper, 9 x 4 inches. Folia, 192. Lines, 8 on a page. Extent, 1821 ślokas. Character, Nágara. Date, ? Place of deposit, Nisidágada, Post Vñaichi, Zilla Burdwan, Pandit Vaneśvara, Vidyáratna; another copy at Magrání, Post Madhuvaní, Zilla Darbhángá, Pandit Chhoṭilál Jhá. Appearance, new. Prose. Generally correct.

**Málatimádhava-ṭíká** A commentary on the Málatimádhava of Bhavabhúti. By Jagaddhara Mahámahopádhyáya. He is described as a Dharmádhikári or chief judge, but of what place and under what king is not mentioned.

**Beginning.** चञ्चच्चन्द्रिकचन्द्रचारुकुसुमोमाद्यज्जटापल्लवो-

द्यद्दारुणदन्दशूकमणिमान तल्पद्रुमशाखालयः ।

स्थाणुर्मे फलदोभवत्वतितरां गौरीमुखेन्दुद्रवत्

पीयूषद्रवदोहनादिव दधद्देवद्रुमत्व सदा ॥

नत्वा गुरून् गुणगुरूनवलोक्य टीकां

विश्वादिकोषभरतश्रुतिशब्दविद्यां ।

छन्दांस्यलङ्करणमर्थगतिं विचिन्त्य

श्रीमान् जगद्धरकृती वितनोति टीकां ॥

श्रीकण्ठकण्ठविलसत्पटुनाटकेऽस्मिन्
टीका मयाल्पमतिनापि वितन्यते यत् ।
स्तो ऽयं दुर्ज्जनगणस्य भवेद्यथैत-
दुच्चैः ऽदं तदभिकाङ्क्षति सर्व्वदैव ॥

इह तावदस्यदां नान्दीं विद्धान एव कविरप्रत्यूहमीप्सितसिद्धिमनुतष्य प्रचण्डचण्डीप-
तेरकाण्डताण्डवाडम्बरेण लम्बोदरोत्कीर्त्तनरूपं मङ्गलं प्रकरणादौ विबध्नाति सानन्दमिति ।
इत्यादि ।

**End.** अत्र एतावे इदानीं ——————— ।

आशाकान्तप्रतीपजयिनं मीमांसयालङ्कृतं ।
शुद्धं श्रीरगदाधरं कविवरं पुत्रं पवित्राशयं ॥
विद्याधरं वरमजीजनदेष श्रीरः श्रीरं जनेषु जयिनं गुणगौरवाले ।
प्रासूत सोऽयममलं गणिनं सुपुत्रं तं रत्नधरमेष जगद्धरञ्च ॥
येनापाठि कठोरगौतममतं वैशेषिकं खण्डितं
येनाश्रावि सकौषकाव्यनि- तं भट्टापितनीयं मतं ।
कन्दोलङ्करणञ्च भव्यभरतं येनाश्चयापि श्रुतिः-
स्तस्यामुष्य जगद्धरस्य कवितुष्टीकेयमुज्जृम्भतां ॥
वाग्देवत यं रत्नधरोऽतिभव्योऽतिभव्यरूपा इमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणोऽङ्कः समाप्तिमागाद्दशमोऽनवद्यः ॥

**Colophon.** इति श्रीमन्महामहोपाध्यायधर्म्माधिकरणिकश्रीजगद्धरकृतटीकायां दशमो-
ऽङ्कः समाप्तः ।

विषयः । भवभूतिकृतमालतीमाधवप्रकरणस्य व्याख्यानं ।

---

**No. 2138.** गीताप्रदीपः । Substance, palm-leaf, 11 × 2 inches. Folia, 178. Lines, 6 on a page. Extent, 4,205 ślokas. Character, Bengali. Date, ? Place of deposit, Nisdágad, Post Vñaichi, Zilla Burdwan, Pandit Vánesvara Vidyáratna; another copy at Calcutta, Government of India. Appearance, old. Prose. Correct.

**Gítá-pradípa.** A commentary on the Bhagavadgítá section of the Mahábhárata. By Jagaddhara, probably the same author to whom is due the work noticed under the last preceding No. There is an account of the author at the end of the codex, but that part is so smudgy and full of lacunæ, that it cannot be satisfactorily read.

**Beginning.** नीलेन्दीवरसुन्दरं दरलसत्पीताम्बराडम्बरं
पद्मासद्महृदम्बुजं प्रविकसत्सत्कौस्तुभाभासितं ।
वन्द्यैरप्यभिवन्दितं त्रिजगतामानन्दसन्दोहदं
श्रीगोविन्दपदारविन्दमधिकानन्दाय वन्दामहे ॥
गीता सुगीता मुनिपुङ्गवेन व्यासेन या सर्व्वविदां वरेण ।
समाल्पकस्यात्र परिश्रमेण गूढ़प्रका+दरविन्द+पि ॥
+ + + शङ्करादिरचितान्यालोक्य भाष्याणि च
यन्निर्णीय निजाशयेन महता कृत्वावधानं मुहुः ।
श्रीमानेष जडरोवितनुते गीताप्रदीपं ततो-
धीरैरत्र महागुणैरपि मनोदेयं गुणग्राहिभिः ॥

इह भगवतः कृष्णस्य संसारसागरमग्नलोकानामुद्दिधीर्षया योगमुपदिशतः अर्ज्जुनेन समं सम्वादो गीताशास्त्रेण कृतः समरशिरसि समारब्धः । तमुत्थापनीयं भगवान् कृष्णद्वैपायनो धृतराष्ट्र-सञ्जययोः प्रश्नोत्तरे अवतारयति धर्मक्षेत्रे इत्यादि ।

**End.** एवञ्च सकलाभिलाषसिद्धिः पाण्डवानां भवेदिति ।
( इतः परं ग्रन्थकर्तृपरिचयस्य लुप्तप्रायतया यत्किञ्चिल्लिख्यते । )
— — — — — — — — — ।
लब्धे दुर्लभशासने सुरगणग्राम+ कैवर्त्तिका
विद्यावशविभूषणो + + + + + +
येनाऽयं समभूद्द्विजातितिलकश्चण्डेश्वरः पण्डितो-
मीमांसैकरहस्यवश्यहृदयो दातावदाताशयः ॥
— — — — — — — — । ॥
प्रासूताऽयमपि प्रतीपजयिनं विद्याधरं सद्बुधं ।
प्रासोष्टान्यमपि प्रसिद्धयशसं तं रत्नपूर्व्वेश्वरं ॥
— — — — — — — — ।
श्रीजगद्धरनामानमनर्घ्यगुणशालिनं ।
येनाऽपाठि कठोरगोतममतं वैशेषिकं खण्डितं
येनाश्रावि सकोषकाव्यनिवहं तत्पाणिनीयं मतं ।
छन्दोऽलङ्करणञ्च भव्यभरतं येनाध्यगायि स्मृति-
र्व्याख्यायीदमशेषमेककविना ग्रन्था अनेके कृताः ।
— — — — — — — — — ।

**विषयः ।** भगवद्गीतायाः व्याख्यानं ।

**No. 2139.** संक्रान्तिविवेकः। Substance, country-made paper, 14 × 3 inches. Folia, 6. Lines, 6 on a page. Extent, 110 ślokas. Character, Bengali. Date, ? Place of deposit, Post Dighápatiyá, Atákulágrám, Zillá Rájasáhi, Pandit Rádhánátha Vidyávácháspati. Appearance, old. Prose and verse. Correct.

**Sankránti-viveka.** A dissertation on the passage of the sun from one sign of the zodiac to another, and the religious duties meet on such occasions. By S'úlapáni, who was the chief judge in the Court of Lakshmanasena of Gour.

**Beginning.** नत्वा इन्द्वारकैर्वन्द्यं सानन्दं नन्दनन्दनं।
संक्रमणविवेकोऽयं क्रियते शूलपाणिना॥
अथ संक्रान्तिः। आदौ संज्ञा ततोराशिस्थितिर्णयस्ततोव्यवस्था समासतोवक्तव्या। तत्र सामान्यसंज्ञा। मन्दा मन्दाकिनी ध्माङ्क्षी घोरा चैव महोदरी। इत्यादि

**End.** तस्य प्रतीकारमाह। धृतरवीजसलिलैः सायादित्यादिसंक्रान्तिदोषशान्तये इत्यादिना।

**Colophon.** इति साङ्गिवयालमहामहोपाध्यायश्रीशूलपाणिविरचितः संक्रान्तिविवेकः समाप्तः।

विषयः। सामान्यतः संक्रान्तिसंज्ञाकथनं। विशेषसंज्ञाकथनं। दिनसंक्रान्तिव्यवस्था। रात्रिसंक्रान्तिव्यवस्था। पराद्धरात्रसंक्रान्तिव्यवस्था। संक्रान्तिश्राद्धव्यवस्था। युगादियुगान्तनिरूपणं। संक्रान्तिदोषशान्त्युपायकथनञ्च।

---

**No. 2140.** तत्त्वचन्द्रिका। Substance, palm-leaf, 11 × 2 inches. Folia, 217. Lines, 5 on a page. Extent, 4,590 ślokas. Character, Bengali. Date, ? Place of deposit, Post Dighápatiyá, Atákulagrám, Zillá Rájasáhi, Pandit Rádhánátha Vidyávácháspati; another copy at Post Málipotá, Zillá Nadiyá, Pandit Kásinátha Bhattáchárya. Appearance, old. Prose. Correct.

**Tattva-chandriká.** A commentary on the Kirátárjuníya of Bháravi. By Gadasiñha, a grammarian of some repute.

**Beginning.** प्रणम्य गां प्रतिपदं + + रस पयस्वतीं।
क्रियते भारवेर्येतादिह्यतित्त्वचन्द्रिका॥

सन्ति प्रकाशवर्षादिटीका अपि सुविस्तराः ।
तथापि लघुबोधार्थं गदसिंहोऽकरोदिमां ॥
पितृकल्पाद्यथाऽधीतं भातुः श्रीसिंहसिंहतः
तद्धेतोर्भातृजादीनां स्मरणार्थं विलिख्यते ॥

कविकुलगुरोभारविः प्राणदेवोऽपरनामधेयः किरातार्ज्जुनीयं काव्यं प्रणिनीषुस्तच्चरणं वस्तु-निर्देशं प्रणयन्नाह । श्रिय इति ।

**End.** एकोऽद्वितीयश्चासौ सूनुश्चेति तस्य शिशुः द्वौ । वाक्ये अङ्गमागतस्याविनयं यथा पिता सहते तद्वदित्यर्थः ।

**Colophon.** इति श्रीगदसिंहविरचितायां तत्त्वचन्द्रिकायां सप्तदशः सर्गः ।

विषयः । भारविकृतकिरातार्ज्जुनीयाभिधानमहाकाव्यस्य सप्तदशसर्गान्तव्याख्यानम्

---

**No 2141.** महावेदान्तषट्कम् । Substance, country-made paper, 14 x 4 inches. Folium, 1. Lines, 12 on a page. Extent, 12 ślokas. Character, Bengali. Date, ? Place of deposit, Vonáslegrám, Post Májanagara, Zillá Rájaśáhí, Bábu S'ámácharana S'ányála. Appearance, fresh. Verse. Correct.

**Mahávedánta-shatka.** Six stanzas on the essence of the Vedánta doctrine, showing the identity of the divine and the human soul. By S'añkara A'chárya.

**Beginning.** मनोबुद्ध्यहङ्कारचित्तादि नाऽहं न श्रोत्रं न जिह्वा न च घ्राणनेत्रं ।
न वा व्योम न भूमिर्न तेजो न वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहं ॥

**End.** अहं निर्व्विकल्पो निराकाररूपो विभुर्व्विश्च सर्व्वत्र सर्व्वेन्द्रियाणां ।
न वा बन्धनं नैव मोक्षो न भातिश्चिदानन्दरूपः शिवोऽहं शिवोऽहं ॥

**Colophon.** इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशङ्कराचार्य्यविरचितं महावेदान्त-षट्कं समाप्तं ।

विषयः । जीवब्रह्मणोरैक्यावर्णनं ।

---

**No. 2142.** तत्त्वसारः । Substance, country-made paper, 14 x 4 inches. Folia, 4. Lines, 8 on a page. Extent, 84 ślokas. Character, Bengali. Date, ? Place of deposit Vonáslegram, Post Májanagara, Zillá Rájaśáhí, Bábu Syámácharaṇa Sányála. Appearance, fresh. Verse. Correct.

**Tattvasára.** The means of obtaining the knowledge of Brahma, disclosed in a dialogue between Mahádeva and Skanda. This is probably an extract from the Skanda Purána.

**Beginning.** मेरुशृङ्गे सुखासीनं देवदेवं जगद्गुरुं ।
प्रणम्य शिरसा भूमौ स्कन्दोवचनमब्रवीत् ॥
भाषितोऽसि त्वया नाथ दुस्तरे शास्त्रसागरे ।
धर्म्माधर्म्मसदाग्राहमतभेदादिसङ्कुले ॥ इत्यादि ।

**End.** अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफला भक्तिरद्योत्तीर्णोभवार्णवात् ॥

**Colophon.** इति तत्त्वसारः समाप्तः ।

विषयः । महादेवस्कन्दसंवादेन ब्रह्मज्ञानलाभोपायकीर्त्तन ।

---

**No. 2143.** गर्भगीता । Substance, country-made paper, 10 × 4 inches. Folia, 2. Lines, 8 on a page. Extent, 32 *slokas*. Character, Bengali. Date, ? Place of deposit, Átákulágrám, Post Dighápatiyá, Bábu Ánandachandra Maitra. Appearance, fresh. Verse. Generally correct.

**Garbha-gítá.** On the Vedánta doctrine bearing on transmigration. The work professes to contain the substance of a discourse between Krishna and Arjuna, and to be a sequel to the Bhagavadgítá, but it is exceedingly scarce. It calls itself a Upanishad.

**Beginning.** ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं ।
एकं नित्यं विमलमचलं सर्व्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥
अर्ज्जुन उवाच ।
गर्भवासं जरामृत्युं किमर्थं भ्रमतेनरः । इत्यादि ।

**End.** तस्मात्त्वं पृथक्कृत्य आत्मन्येव वसेत् सदा ।
मिथ्याभूतं जगद्व्यक्तं नान्यथा कल्पकोटिषु ॥

**Colophon.** इति श्रीकृष्णार्ज्जुनसम्वादे श्रीभगवद्गर्भगीतासूपनिषत्सु प्रथमोऽध्यायः । समाप्ता गर्भगीता ।

विषयः । श्रीकृष्णार्ज्जुनसंवादेन आत्मतत्त्वयोगकीर्त्तनं ।

**No. 2144.** सुबोधिनी । Substance, country-made yellow paper, 11 × 4 inches. Folia, 12 Lines, 7 on a page. Extent, 315 ślokas. Character, Bengali. Date, ? Place of deposit, Vonślegrám, Post Májanagara, Bábu Syámácharaṇa Sányála. Appearance, new. Prose. Correct.

**Subodhiní.** A commentary on the Bhagavadgítá. By Gauḍapáda A'chárya.

**Beginning** यस्माज्जातं जगत्सर्व्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्य्यते चैतत् तस्मै ज्ञानात्मने नमः ॥
यैरिमे गुरुभिः पूर्व्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्व्ववेदान्तास्तान् नित्यं प्रणमाम्यहं ॥

इह खल्वर्ज्जुनो धर्म्मक्षेत्रे भगवदुपदिष्टं आत्मतत्त्वोपदेशं विषयभोगप्राबल्येन विस्मृत्य पुनस्तद्व आत्मतत्त्वं ज्ञातुं भगवन्तं पृच्छति अर्ज्जुन उवाच । इति ।

**End.** वर्त्तमानवस्तुनि लब्धे चपराहित्ये सिद्धे पुनर्जन्म न विद्यते । इति भावः ।

**Colophon.** इति श्रीमदुत्तरगीताटीकायां सुबोधिन्यां श्रीगौड़पादाचार्य्यविरचितायां तृतीयोऽध्यायः । समाप्तेयं टीका ।

विषयः । उत्तरगीतायाः व्याख्यानम् ।

---

**No. 2145.** ज्योतिःसूत्रं । Substance, country-made paper, 12 × 2½ inches. Folia, 18. Lines, 6 on a page. Extent, 405 ślokas. Character, Bengali. Date, ? Place of deposit, Sonápatilagrám, Post Májanagara, Zilla Rájaśáhí, Paṇḍit Madhusúdana Miśra. Appearance, old. Prose and verse.

**Jyotih-sútra.** A manual of civil astrology. By S'ríkrishṇa Chakravartí. CONTENTS. Signs of the zodiac, ecliptic signs, lunar constellations, ascending constellations. Provinces of the planets. Entry of a planet in the mansion of the planet which presides at the nativity of a person. Adverse stars. Auspicious constellations. Auspicious conjunctions (siddhiyoga). Inauspicious parts of the days of the week. Auspicious conjunctions for starting on a journey. Ditto for ploughing. Ditto for sowing, reaping, &c. Ditto for entering a new house, wearing new clothes &c. Sacrament of nativity. Ditto of naming, new rice feast (*navánna*). S'ráddhas at convenience. Sacraments of tonsure, investiture with the sacred thread, &c. Marriage. Earthquakes.

**Beginning.** नत्वा श्रीगुरुमार्त्तण्डं दुर्बोधध्वान्तनाशनं ।
क्रियते ज्योतिषां सूत्रं श्रीकृष्णचक्रवर्त्तिना ॥
तत्रादौ राश्यादीनां संज्ञा ।
तदस्मि मनयोराशिं चैत्रस्तं तदस्य भं । इत्यादि ।

**End.** यात्रायां शुक्रतिथयः प्रस्तावयोर्दृशीं विना ।
योगं वैवाहिकं प्रोक्तं कुयोगान् परिवर्जयेत् ॥

**Colophon.** इति श्रीकृष्णचक्रवर्त्तिना विरचितं ज्योतिःसूत्रं समाप्तम् ।

विषयः । राशिनिरूपणं । लग्ननिरूपणं । वृत्तविभागकथनं । अधोमुखादिनक्षत्रनिरूपणं । ग्रहाणां दृष्टिनिरूपणं । गोचरशुद्धिः । विपत्तारादिनिरूपणं । नक्षत्रामृतं । सिद्धियोगादिकथनं । वारवेलादिनिरूपणं । यात्रिकलग्नादिनिरूपणं । हलप्रवाहकथनं । बीजवपनधान्यच्छेदनादिनिरूपणं । नववस्त्रशय्याद्युपभोगकथनं । जातकर्म्म । अन्नप्राशनं । नवान्नं । श्रावकाद्यश्राद्धनिरूपणं । चूडापनयनादिकथनं । विवाहकथनं । भूमिकम्पविवेचनञ्च ।

---

**No. 2146.** दोलयात्राविवेकः । Substance, country-made paper, 11 × 3 inches. Folia, 9. Lines, 5 on a page. Extent, 81 Slokas. Character, Bengali. Date, ? Place of deposit, Post Májanagara, Sonápátilá-grám, Zillá Rájasáhí, Pandit Madhusúdana Misra. Appearance, old. Prose and verse. Generally correct.

**Dolayátrá-viveka.** An essay on the swing festival of Govinda. By S'úlapáṇí Mahámahopádhyáya, who lived in the court of Lakshmaṇasena, of Gauḍa.

**Beginning.** नत्वा नारायणं दृष्ट्वा धर्म्मशास्त्रञ्च सद्वचान् ।
विवेको दोलयात्रायाः क्रियते शूलपाणिना ॥
स्कन्दपुराणे । जैमिनिरुवाच ।
फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमं ।
तत्र क्रीडति गोविन्दो महाविभवविस्तरैः ॥ इत्यादि ।

**End.** उभयत्र नक्षत्रयोगः फलातिशयार्थः । स्कन्दपुराण-देवीपुराण-ब्रह्मपुराण-भुजबलभीमैः सत्स्थितत्वादिति दिक् ।

**Colophon.** इति शूलपाणिमहामहोपाध्यायविरचितो दोलयात्राविवेकः समाप्तः ।

विषयः । दोलयात्राविधिकथनं । तत्र वह्न्युत्सवविधिः । तत्कालादिनिरूपणं । अधिवासविधिकथनञ्च ।

---

**No 2147** विचारनिर्णयः। Substance, country-made paper, 14 x 3 inches. Folia, 48. Lines, 6 on a page. Extent, 916 s'lokas. Character, Bengali. Date, ? Place of deposit, Post Májanagara, Syámanagara-grám, Zillá Rájas'áhí, Pandit Kailásachandra Bhattáchárya; another copy at S'ántipura, Pandit Káludása Vidyávágis'a. Appearance, old. Prose and verse. Correct.

**Vichára-nirnaya.** Miscellaneous dissertations on various topics of the Smṛiti. By Gopála Nyáyapanchánana Bhaṭṭácharya.

**Beginning.** प्रणम्य राधिकाकान्त स्निग्धवारिदसुन्दरं।
विचारनिर्णयारम्भो गोपालेन वितन्यते ॥
अथ विचारनिर्णयः। स च विचारार्हवाक्यस्य संशयपूर्व्वपक्षोपन्यासपूर्व्वकं यथार्थतात्पर्य्यनिर्णयात्मकः। इत्यादि।

**End.** पूर्णाहुत्यनन्तरं वह्निनमस्कारमाह स्मृति।
नमोनमस्ते त्रिपुरारिचक्षुष चराचराणां जठरेषु संस्थित।
+ + + + + + + + + + + + + + भक्ताय नमोऽस्तु वह्नये ॥

**Colophon.** इति श्रीगोपालन्यायपञ्चाननभट्टाचार्य्यकृतविचारनिर्णयः समाप्तः।

**विषयः।** विचारस्वरूपनिरूपणं। अधिकरणनिरूपणं। अर्थवादादिविवेचनं। यागस्वरूपविवेचनं। दानस्वरूपविवेचनं। स्वत्वनिरूपणं। द्रव्यदेवतानिरूपणं। कन्यादाननिरूपणं। आद्यश्राद्धादौ द्विजदम्पतीषोड़शदानादिविवेचनं। मृतभ्रान्त्या कृतश्राद्धादिकस्य पश्चादागमने कृत्यविवेचनं। वृषोत्सर्गविवेचनं। वृषाङ्कनविवेचनं। होमविवेचनं। तत्र कुण्डादिनिरूपणञ्च। इति।

---

**No. 2148.** दुर्गोत्सवनिर्णयः। Substance, country-made paper, 14 x 3 inches. Folia, 14. Lines, 5 on a page. Extent, 238 s'lokas. Character, Bengali. Date, ? Place of deposit, Post, Májanagara, S'yámanagara-grám, Zillá Rájas'áhí, Pandit, Kailásachandra Bhattácharya. Appearance, old. Prose and verse. Generally correct.

**Durgotsava-nirṇaya** A treatise on the Durgápújá and the ritual fo. performing it. Anonymous, (*cf.* II, p. 312.)

**Beginning.** नत्वा कृष्णपदद्वन्द्वं समारब्धान्तनाशनं।
निर्णयः शारदार्चाया गोपालेन वितन्यते ॥
अथ दुर्गोत्सवव्यवस्थानिर्णयः। तत्र शरत्कालीयदुर्गापूजा नित्या। तथा च देवीलिकापुराणं।
यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे। इत्यादि।

**End.** अशुभं खप्नं दृष्ट्वा देवमाल्यप्रपूजनं ।
दानं कुर्य्यीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः ॥

**Colophon** इति दुर्गोत्सवनिर्णयः समाप्तः ॥

विषयः । दुर्गापूजाया नित्यत्वकथनं । नवम्यादिकल्पत्रयस्याकथनं । प्रतिकल्पव्यवस्था एवं षष्ठ्यादिषु ज्ञेयं । बलिदानविधिः । होमविधिः । नवम्यामेव दक्षिणा कर्त्तव्येति नवखण्डनं । शुभाशुभस्वप्नदर्शनफलकीर्त्तनञ्च ।

---

**No 2149** तत्त्वदीपिका । Substance, country-made paper, 12 × 3 inches Folia, 118 Lines, 7 on a page Extent, 2,364 slokas. Character, Bengali Date, ? Place of deposit, Post Májanagara, Sonápátilá-grám, Zillá Rájaśáhí, Pandit Madhusúdana Miśra. Appearance, old. Prose. Correct.

**Tattva-dípiká** A commentary on the Chandí section of the Márkandeya Purána. By Kavikanthábharana Acháiya Virúpáksha.

**Beginning** ॐ नमश्चण्डिकायै ।
शब्दार्थभागोविषमश्चण्डिकायाः यथाबलं ।
विविच्यते विरूपाक्षशर्म्मणा तद्गतात्मना ॥

ऽौष्टुकिनामा द्विजः प्रियशिष्यः शिरसा नतोमार्कण्डेयं महामुनिं पप्रच्छ भगवन्निह जगति चतुर्दशमनवोभूताः, तेषां मध्ये सावर्णिरष्टमोमनुर्बभूव । स च भगवत्या महामायायाः प्रभावेण कीदृशोऽभूदिति श्रोतुमिच्छामि । मार्कण्डेयोमुनिरपि तस्मै प्रियशिष्याय कथां कथयितुमुपचक्रमे मार्कण्डेय उवाचेति । कडि मदे तस्मात् मृगय्वादयश्चेति उप्रत्यये कण्डुः मृगस्य कण्डुरिति पृषोदरादित्वाद्गलोपे मृकण्डुरित्यागमः । इत्यादि ।

**End.** पुरुषोत्तम स्वारेभे । संज्ञापकमनुत्रयमित्यादयः । देव्या इति मुनिसर्व्वेषामिति सम्भारलोपः ।

**Colophon.** इति श्रीकविकण्ठाभरणाचार्य्यविरूपाक्षकृतायां तत्त्वदीपिकायां चण्डी-श्लोकार्थप्रकाशः सम्पूर्णः ।

नेत्रवाणाश्विशीतांशुभिर्गणिते शकवत्सरे ।
अकारि चण्डिकाटीका श्रीविरूपाक्षशर्म्मणा ॥
विज्ञाः सदा सदयतां प्रवणप्रवीणा नैव मदीयचरिते कुरुतोपहासं ।
द्वैपायनस्य कवितावितताशयत्त्व अस्मादृशोयदि विदन्ति वय वराकाः
तस्माद्यदत्र लिखितं शिशुबोधहेतोः कार्य्या सता गुणवता न कदाप्यवज्ञा ।

ज्ञानेन चोतमनसां जनसंहतीनां ज्ञानार्पणं मतिमतां किल धर्म्म एषः ॥
द्वैपायनोऽजगति वाग्विषये स्वतन्त्रः शब्दाम्बुराशिचयपारपरीतचेताः ।
तद्वक्त्रनिर्गतपदेषु पदं यदेतत् सिद्धं न पाणिनिमतेन च वार्थमेवं ॥

विषयः । मार्कण्डेयपुराणान्तर्गतदेवीमाहात्म्यव्याख्यानम् ।

---

**No. 2150.** चमत्कारचन्द्रिका । Substance, country-made paper, 14 × 5 inches. Folia, 22. Lines, 5 on a page. Extent, 302 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonapura-grám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Post Khayaráśúla, Podo-grám, Zillá Vírabhúma, Bábu Vinodavihári Kavirája; another at Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

**Chamatkára-chandriká.** On the amours of Krishna at Vrindávana. By Kavikarnapura Gosvámí.

**Beginning.** यत् कारुण्यं सुचिरसचमत्कारवाराँनिधीशान्
सम्भोगाधा गिरिवरभृतः स्वप्रयोगार्थयोग्नः ।
तत्त्वैवैकं प्रयतमचिरात्सम्भृताशाचिदानैः
सोऽव्या + + दैगनविततैः कृष्णचैतन्यरूपः ॥
मातः प्रातः किमिव कुरुषे दृश्यते पेटिकेयं
यस्मादस्यां किमिव निचितं किं तवानेन सूनो ।
ज्ञातव्येन प्रणयचकितैः खेलगेवाद्य चिन्त्य
जिज्ञासा मे भवति महती ब्रूहि नोचेद्व्रयामि ॥
कस्यां चन्दनचन्द्रपङ्कजरजःकस्तूरिकाकुङ्कुमा-
द्यङ्गालामनुलेपनार्थमथ ते नेपथ्यचेतोमया ।
काञ्चीकुण्डलकङ्कणाङ्गदपमं वैदूर्य्यमुक्ताहरि-
द्रत्नाद्यं वरजातमत्यतिमरानद्धे क्रमादृर्तते ॥ इत्यादि ।

**End.** सभ्रूविभङ्गकुटिलास्यसरोजमाभमाद्यन्मधुव्रतविलाससुसौरभाणि ।
सम्प्राप्य यानविवरेषु जघूर्णरेवं प्रेष्ठालयः प्रतिपद् प्रमदोर्म्मिकुञ्जे ॥

**Colophon.** इति श्रीकविकर्णपूरगोस्वामिविरचितचमत्कारचन्द्रिकायां चतुर्थकुतूहलं । समाप्ता चेयं चमत्कारचन्द्रिका ।

विषयः । प्रथमे कुतूहले,—मञ्जूषान्तःप्रविष्टस्य कृष्णस्य अभिमन्युमिरषा राधिकाश्रयम-प्ययप्राप्तिकौतुकवर्णनं । २ये कुतूहले,—एकदा मञ्जुकुञ्जे राधिकया सह मिलनमेव श्रीकृष्णः

तत्र समागमं जटिलामातुलस्य अभिमन्युरूपपरिग्रहेण तां वक्षयामासेतिवर्णनं । इत्थे कुतूहले,—अथैकदा । श्यामेन विषपानलक्षणमभिनयन्त्याः राधायाश्चिकित्सार्थं विषवैद्यरूपेण श्रीकृष्णस्य तत्र समागमरहस्यवर्णनं । अथं कुतूहले,—अनन्तरमेकदा मानमश्लिनहृदयां राधिकां सामादिभिरुपायैरपि प्रसादयितुमसमर्थ एव श्रीकृष्णः स्त्रीरूपपरिग्रहेण तां प्रसादयामासेति-रहस्यवर्णनं । इति ।

---

**No. 2151. रासोल्लासतन्त्रं ।** Substance, country-made paper, 11 × 4 inches. Folia, 12. Lines, 6 on a page. Extent, 260 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Post Khayaráśúla, Poḍo-grám, Bábu Vinodavihári Kavirája. Appearance, new. Verse. Correct.

**Rásollása-tantra.** Descriptions of the Rásas, or amorous rejoicings of Krishṇa at Vrindávana and disquisition on their true meaning. The work professes to be a Tantra.

**Beginning.** श्रीनारद उवाच ।

श्रीराधाकृष्णदेवस्य नाम्नामष्टोत्तरं शतं ।
रासमङ्कीर्त्तनं नाम शृणु भागवतोत्तम ॥
राधानामसुधायुक्तं कृष्णनामरसायनं ।
यः पिवेत् प्रातरुत्थाय व्याधिभिः स न बाध्यते ॥
येनोच्चैरुच्यते रागैराधाकृष्णपदद्वयं । इत्यादि ।

**End.** लक्ष्मीस्तस्य वसेद्गेहे मुखे भाति सरस्वती ।
धर्म्मार्थकाममोक्षं लभते सत्यमेव स ॥

**Colophon.** इति श्रीरासोल्लासतन्त्रे श्रीराधाकृष्णयोः क्रीडावर्णनं समाप्तं ।

विषयः । श्रीकृष्णस्य रासमङ्कीर्त्तनस्तोत्रकथनं । रासलीलास्वरूपवर्णनं । रासगीता-कीर्त्तनञ्च ।

---

**No. 2152. गोविन्दविरुदावलीव्याख्या ।** Substance, country-made paper, 12 × 4 inches. Folia, 38. Lines, 9 on a page. Extent, 894 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu. Appearance, decayed. Prose. Incorrect.

**Govinda-virudhávali-vyákhyá.** A commentary on the work described under No. 1673, Volume IV, p. 284, on the career of Kṛishṇa at Vṛindávana. Anonymous.

**Beginning.** गौड़ोदयमुपयातस्तमःसमस्तं निहन्ति योयुगपत् ।
ज्योतिश्चयोऽतिशीतः पीतस्तमुपास्महे हताञ्जलयः ॥
यत्काव्यसद्मसु य एव हरिप्रियेषु शब्दार्थरत्ननिकरैस्तनुतेऽतिभव्यैः ।
शिल्पक्रियां बहुविधां कविविश्वकर्म्मा रूपाभिधोरसिकचित्तहरः स जीयात् ॥
अधीत्य विरुदावल्या गोविन्दविरुदावलौ ।
योऽभ्यधायि विशेषस्तु स तावदिह लिख्यते ॥

— — — — — — — — — — — यस्यां कलिकानामादिमायाखण्डहत्तमहा-कलिकायाः प्रारम्भ श्लोकयुग्मं वर्णयति । अनङ्गेत्यादि । हे सरसिजनयनश्रीगोविन्द येन त्वया— इत्यादि ।

**End.** वासुदेवोविशुद्धसत्त्वाविर्भावी श्रीकृष्णः । स्फुटमन्यत् ।
गोविन्दविरुदावल्या व्याख्यातरि विशारदाः ।
गोविन्दभक्तास्तुष्यन्तु मयि,विद्याविभूषणे ॥

**Colophon.** इति श्रीगोविन्दविरुदावली व्याख्याता ।

विषयः । विरुदावलीलक्षणादिविवेचनपुरःसरं गोविन्दविरुदावल्याव्याख्यानम् ।

---

No. 2153. सारात्सारतत्त्वसङ्ग्रहः । Substance, country-made paper, 14 × 4 inches. Folia, 30. Lines, 6 on a page. Extent, 576 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Post Khayraśúla, Podo-grám, Zillá Vírabhúma, Bábu Vinodavihári Kavirája. Appearance, decayed. Prose and verse. Generally correct.

**Sárátsára-tattva-saṅgraha.** On the essential principles, dogmas, fasts, observances and rituals of the Vaishṇavas. By Raghunáthadása.

**Beginning.** अन्तर्द्ध्वान्तविनाशाय कृष्णभक्तिप्रदाय च ।
करुणासिन्धुरूपाय तस्मै श्रीगुरवे नमः ॥
गौराङ्गं तप्तहेमाङ्गं प्रेमपुञ्जाम्बरोज्ज्वलं ।
कृपालुं परमानन्दं वन्दे प्रेमोत्सवप्रदं ॥
श्रीकृष्णं राधिकाकान्तं व्रजेशं जगतां गुरुं ।

गोविन्दं सच्चिदानन्दं वन्दे वृन्दावनेश्वरं ॥
गुरुः कृष्णः कृष्णनाम तद्भक्तिस्तज्जनस्तथा ।
एते पञ्च निरूप्यन्ते त्यक्ता तद्विमुखान् जनान् ॥
गुरुः कृष्णः कृष्णनाम सारात्सारं परात्परं ।
तद्भक्तिरपि तत्तुल्या तत्परोऽपि तथा जनः ॥
तत्रादौ श्रीगुरुतत्त्वलक्षणं । इत्यादि ।

**End.** ततोदुःसहसंसारदुःख मस्तु सज्जेत वुद्धिमान् ।
स्व एवास्य छिन्दन्ति मनोव्यासङ्गमुक्तिभिः ॥

**Colophon.** इति सारात्सारतत्त्वसङ्ग्रहे पञ्चतत्त्वोपाख्याने षष्ठविवेकः ।
इति श्रीरघुनाथदासविरचितः सारात्सारतत्त्वसङ्ग्रहः समाप्तः ।

**विषयः।** प्रथमे विवेके,—गुरुलक्षणतन्माहात्म्यकीर्त्तनं । वैष्णवलक्षणं । वैष्णवदीक्षाया-आवश्यकत्वकथनञ्च ।

द्वितीये विवेके,—श्रीकृष्णस्वरूपादिनिरूपणं । तन्माहात्म्यकीर्त्तनं । कृष्ण परित्यज्य देवतान्तरभजनदोषकथनञ्च ।

तृतीये विवेके,—श्रीकृष्णनाममाहात्म्यकीर्त्तनं ।

चतुर्थे विवेके,—भक्तिस्वरूपादिकथनं । भक्तजनकर्त्तव्यनिरूपणं । श्रवण-वन्दन-दर्शन-अर्चन-स्मरण-कीर्त्तनादिफलकथनादिकं । श्रीमद्भागवतास्वादकर्त्तव्यतानिरूपणं । वैष्णवसङ्ग-माहात्म्यकथनं । मथुराद्वारकादिवासमाहात्म्यकथनं । प्रसादमाहात्म्यकथनं । हरिवासरकर्त्तव्यता । भक्तौ प्रतिनिषिद्धविधानं । उपवासनिरूपणं । जन्माष्टम्यादिव्रतविधिकथनं । गङ्गा-सेवनविधिः । तुलसीसेवनविधिः । अश्वत्थादिपूजनमाहात्म्यकथनञ्च ।

पञ्चमे विवेके,—वैष्णवलक्षणकथन । तन्माहात्म्यकथनं । तत्कर्त्तव्यनिरूपणञ्च ।

षष्ठे विवेके,—वहिर्मुखलक्षणादिकथनं । तत्सङ्गवर्ज्जनस्यावश्यकताकथनञ्च । इति ।

---

**No. 2154. कलापदीपिका, भट्टिटीका ।** Substance, country-made paper, 13 × 3 inches. Folia, 300. Lines, 8—9 on a page. Extent, 9,300 ślokas. Character, Bengali. Date, Śk. 1650. Place of deposit, Post Boyáliyá, Sonápuragrám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Calcutta, Government of India. Appearance, fresh. Prose. Correct.

**Kalápadípiká.** A commentary on the epic poem called Rávaṇabadha of Bhaṭṭi Svámí, (*ante* p. 148). By Puṇḍaríkáksha son of S'ríkánta Paṇḍit. The peculiarity of this commentary is that it explains the text by references to the rules of the Kalápa Vyákaraṇa. The commentary in common use is based on the grammar of Vopadeva.

**Beginning**. नत्वा शङ्करचरणं ज्ञात्वा सकलं कलापतत्त्वञ्च ।
दृष्ट्वा पाणिनितन्त्रं वदति श्रीपुण्डरीकाक्षः ॥
पाणिनिप्रक्रियायां ये प्रसिद्धत्वान्न कौतुकं ।
कलापप्रक्रिया तस्मादप्रसिद्धा प्रकथ्यते ॥
कुनिबन्धतमस्तोमसम्पर्कस्त्यजितुं मया ।
कलापदीपिका चक्रे सत्पथालोकनाय च ॥

अत्र कविना सर्गबन्धो लक्ष्यसूचनाय काण्डबन्धश्च लक्षणसूचनाय कृतः। तत्र प्रकीर्णाधिकार-प्रसन्नतिङन्तकाण्डानि चत्वारि लक्षणमपि द्विविधं शब्दलक्षणकाव्यलक्षणभेदात्। तत्र प्रसन्नकाण्डातिरिक्तैस्त्रिभिः काण्डैः शब्दलक्षणं प्रसन्नकाण्डे च काव्यलक्षणं यत्र नाना + + वत्वां बहूनां लक्षणानां प्रदर्शनं तत् प्रकीर्णकाण्डं तदेवादौ दर्शितं व्यापकत्वात्। महाकाव्यस्यादावाशीर्नमस्-क्रियावस्तुनिर्देशो वा कर्त्तव्य इति सम्प्रदायानुरोधात् वस्तुनिर्देशं कुर्व्वन्नेवेष्टदेवतास्मरणात्मकं मङ्गलमप्यादावाविष्करोति अभूदिति। इत्यादि ।

**End**
यस्मि + + + ति दुर्गमकाव्यसिन्धौ
खञ्जीभवन्ति शतशोऽपि महाकवीन्द्राः ।
बालस्य मे चपलतां तदहो क्षमध्वं
यद्गाहितावपि कृतोऽस्य मया प्रयत्नः ॥
रत्नाकरो जयति यद्वचनामृतानि
पीत्वा प्रयान्ति विबुधाः पदवीं सुराणां ।
श्रीकान्तधीर इति तस्य सुतोऽभिजज्ञे
तस्यात्मजेन मयका लपितं तदेतत् ॥

**Colophon** इति महामहोपाध्याय श्रीमच्छ्रीकान्तपण्डितात्मजश्रीपुण्डरीकाक्षकृतायां कलापदीपिकायां भट्टिटीकायामयोध्यागमनं नाम द्वाविंशः सर्गः। समाप्तश्चायं ग्रन्थः। शकाब्दाः १६५०॥

विषयः। कातन्त्रमतानुसारेण व्याकरणप्रक्रियां प्रदर्श्य भट्टिकाव्यस्य व्याख्यानं।

---

**X No 2155**. भाषावृत्तिः। Substance, country-made paper, 14 × 4 inches. Folia, 202 Lines, 6—7 on a page. Extent, 6,039 ślokas. Character, Bengali. Date, Sk. 1648. Place of deposit, Post Boyáliyá, Sonápuragrám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Calcutta, Government of India. Appearance, fresh. Prose. Correct.

**Bháshávritti**. A commentary on the epic poem called Rávaṇabadha of Bhaṭṭi S'vámí. By Purushottama. This differs from the work described under the next preceding Number in making the Kátantra its grammatical authority.

**Beginning.** नमो वृद्धाय भाषायां यथा विमुनिलक्षणं
पुरुषोत्तमदेवेन लघ्वी वृत्तिर्विधीयते ॥

अथ शब्दानुशासनं। लौकिकानां प्रकृतिप्रत्ययविभागपरिकल्पनया सामान्यविशेषवता च लक्षणेन गत्यन्तराभावात्। वर्णानामुपदेशः क्रमसन्निवेशानुबन्धासञ्जनार्थः। तदुभयं संज्ञार्थं। सा च लाघवेन शास्त्रप्रवृत्त्यर्था। अकारस्य विवृतोपदेश आकारस्य ग्रहणार्थः। अ इ उ ण ऋ ऌ क इत्यादि।

**End.** अकारस्य विवृतोपदेशः प्रतिज्ञातः स प्रयोगे संवृतोभवेत्। इत्यः सिद्धिः।

**Colophon.** इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य भाषावृत्तावष्टमोऽध्यायः समाप्तः।
काशिकाभागवृत्त्योश्च सिद्धान्तं बोद्धुमस्ति धीः।
तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरियं मम ॥
वसतु मम मनः श्रीदोर्गपादाब्जयुग्मे
दिशति स्थितमपारं सेवितं यत्सुराद्यैः।
व्यलिखदतिमनोज्ञं चिन्तयंस्तद्भवानी-
चरणविदितनामा भूसुरः श्रीपदाद्यः ॥
शकाब्दाः १६४५।

विषयः। वैदिकप्रक्रियोपयोगिसूत्रपरित्यागेन काशिकावृत्त्यनुसारेण च पाणिनिसूत्राणां सोदाहरणव्याख्यानं।

---

**No. 2156 स्मरणक्रममाला।** Substance, country-made yellow paper, 12 × 4 inches. Folia, 18. Lines, 5 on a page. Extent, 182 ślokas. Character, Bengali. Date, ? Place of deposit, Post, Boyáliyá, Sonápura-grám, Zillá Rájaśáhi, Bábu Madhusúdana Sháhá. Appearance, fresh. Prose and verse. Correct.

**Smaraṇakrama-málá.** Directions for meditating upon and mentally worshipping Kṛishṇa, Gaurachandra, and his followers,—a Vaishṇavite tract. By Viśvanátha Chakravarti, the author of the Chaitanya-charitámṛita.

**Beginning.** सर्व्वाभीष्टप्रद श्रीमद्गुरुदेव दयानिधे।
नानाविघ्नभयान्नित्यं पाहि मां मङ्गलालय ॥
तत्र श्रीगौरचन्द्रस्य। यथा।
निशान्ते गौरचन्द्रस्य शयनञ्च निजालये।
प्रातःकाले कृतोत्थानं स्नानं तद्भोजनादिकं ॥

पूर्व्वाह्नसमये भक्तमन्दिरे परमोत्सुकं ।
मध्याह्ने परमाश्चर्य्यकेलिं सुरसरित्तटे ॥ इत्यादि ।

**End.** ततः श्रीमन्महाप्रसादसेवनं कुर्य्यात् ।

**Colophon** इति श्रीविश्वनाथचक्रवर्त्तिविरचिता स्मरणक्रमसमाप्ता समाप्ता ।

विषयः । गौरचन्द्रस्य प्रातरादिकालेषु स्मरणप्रकारकथनं । एवं श्रीकृष्णस्य वृन्दावनस्य च । तथा गौरचन्द्रस्य मानसोपचारैः पूजाक्रमकथनं । एवं श्रीकृष्णस्य चपिच गौरगणस्य पूर्व्वोक्त-विधानेन स्मरणपारिपाट्यकथनं ।

---

**No. 2157 पद्धतिप्रदीपः।** Substance, country-made paper, 10 × 6 inches. Folia, 23. Lines on a page, 12. Extent, 82 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Bábu Madhusúdana Sháhá. Appearance, fresh. Prose and verse. Correct.

**Paddhati-pradípa.** Rituals and mantras for the meditation and worship of Krishna, Rádhá, Gauráṅga, and the followers of the last. By Ghanasyámadása.

**Beginning.** श्रीशचीनन्दनं गौरचन्द्रं गोकुलवल्लभं ।
वन्दे श्रीमन्नवद्वीपे सदा कैशोरविग्रहं ॥
अद्वैतप्रकटीकृतो निरहरिप्रेष्ठः स्वरूपप्रियो-
नित्यानन्दसखः सनातनगतिः श्रीरूपहृत्केतनः ।
लक्ष्मीप्राणपतिर्गदाधररसोल्लासी जगन्नाथभूः
साङ्गोपाङ्गसपार्षदः स दयतां देवः शचीनन्दनः ॥ इत्यादि ।

**End.** श्रीराधाकृष्णचैतन्यभजनक्रमपद्धतिः ।
साधकानां प्रमोदाय संक्षेपान्निर्म्मिता मया ॥
दीने मयि घनश्यामे कृपामेतां कुरु प्रभो ।
श्रीपद्धतिप्रदीपोऽयं यन्मेऽभवतु जीवनं ॥

**Colophon.** इति श्रीघनश्यामदासविरचितः श्रीपद्धतिप्रदीपः सम्पूर्णः ।

विषयः । अष्टकालीयगौरस्मरणविधिकथनं । एवं श्रीकृष्णस्य । ततो गौरादीनां ध्यानक्रमकथनं । श्रीराधिकादीनां ध्यानक्रमकथनमुखेन षोडशसंख्यादिचिन्तनप्रकारकथनं । पूर्व्ववत् नित्यानन्दाद्वैतगदाधरसार्व्वभौमादीनां ध्यानादिकथनं । प्रियनर्म्मसखी-प्राणसखीप्रभृतीनां ध्यानादि-कथनं । बलदेवनन्दयशोदारोहिणीसुबलमधुमङ्गलगोवर्द्धनराधाकुण्डश्यामकुण्डयमुनादीनां ध्यान-कथनं । प्रत्यकं प्रार्थनाकथनञ्च ।

---

**No. 2158.** **विराटपर्व्वटीका ।** Substance, country-made paper, 12 × 3 inches. Folia, 30. Lines, 7 on a page. Extent, 696 ślokas. Character, Bengali. Date, ? Place of deposit, Tájapura-grám, Post, Deṅgápáḍá, Zillá Rájaśáhi, Pandit Gaurasundara Bhaṭṭácbárya. Appearance, fresh. Prose. Generally correct.

**Viráṭaparva-ṭíká.** A commentary on the Viráṭa section of the Mahábhárata. By Arjuna Mis'ra, son of I's'ána Mis'ra. (*Cf.* p. 154).

**Beginning.** हरेरर्ज्जुनमिश्रेण प्रणम्य चरणाम्बुजं ।
विराटपर्व्वणः श्लोका व्याख्यायन्ते यथामति ॥

कथं विराटनगरे इत्यादेः सभां विराटस्य ततोऽभिजग्मुरित्यन्तस्य विराटपर्व्वणश्चतुर्वर्गसाधनीभूतं सत्यं द्यूतच्छलप्रयुक्तायामज्ञातवत्सरकर्त्तव्यताप्रतिज्ञायां न त्याज्यमिति तात्पर्य्यार्थः । विराटनगरे इत्यादेः सर्व्वं द्वैतवनादित्यन्तस्य अज्ञातवासनिर्व्वाहाज्ञातपरिचर्य्यापरिग्रहः तत्र च यां कामवस्थामुपगतस्योपजिजीविषोः प्रभुप्रीणनं श्रेयःसाधनमिति । इत्यादि ।

**End.** मैरेयं मद्यविशेषः । अभ्यत एव अभिक्रम्य स्थिता । श्रिया शोभया ॥
अल्पधीमन्दधीव्याख्याभ्याग्मये कृतिनां मुदे ।
विराटदीपिकैषास्तु मम सच्चित्तवेश्मनि ॥

**Colophon.** इति श्रीभागवताचार्य्यपाठकाचार्य्यश्रीमदीशानतनयश्रीमदर्ज्जुनमिश्रकृता विराटटीका समाप्ता ।

विषयः । महाभारतीयविराटपर्व्वव्याख्यानं ।

---

**No. 2159.** **महाभारतं आश्वमेधिकपर्व्व ।** Substance, palm-leaf, 29 × 2 inches. Folia, 179. Lines, 4—5 on a page. Extent, 4,806 ślokas. Character, Bengali. Date, ? Place of deposit, Sonápura-grám, Post, Boyáliyá, Zillá Rájaśáhí, Bábu Madhusúdana Sháhá. Appearance, old. Verse. Correct.

**Mahábhárata. A'svamedha Parva.** The history of the Páṇḍava brothers and of the great fratricidal war of Kurukshetra. By Jaimini. This work is quite distinct from the Mahábhárata of Vyása, and contains many narratives and descriptions which do not occur in Vyása's work. It is, however, no longer extant in its entirety—superceded, probably, by the more elegant recession of Vyása. The only portion extant is the A'svamedha section, on the sacrifice of a horse, and it is about four times the size of Vyása's version. The codex under notice professes to be complete in 69 chapters, but in the Berlin codex, noticed by Weber, there are 81 chapters.

**Beginning** नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
जनमेजय उवाच ।
कथं युधिष्ठिरः प्रीतोमम पूर्व्वपितामहः ।
अश्वमेधं क्रतुवरं चक्रे बन्धुभिरन्वितः ॥
जैमिनिरुवाच ।
शृणु राजन प्रवक्ष्यामि धर्म्मराजस्य चेष्टितं ।
दिवं पितामहे याते धर्म्मपुत्रोऽभिदुःखितः ॥
यदृच्छयात्र संप्राप्त व्यासं पप्रच्छ सादरं ।
केनोपायेन मे ब्रह्मन् गोत्रवध्याकृतं भयं ॥
ध्रुवं विनाशमाप्नोति तन्मे ब्रूहि तपोधन ।
विना भीष्मेण कर्णेन द्रोणेन च विवर्ज्जित ॥
न मे प्रीतिपदं राज्यं यत् प्राप्तं पूर्व्वजार्ज्जितं ।
कर्णस्य मन्दिरं रम्यं ब्राह्मणौघसमन्वितं ॥
मया शून्य कृतं तत्तु मार्ग्गितं दानवर्ज्जितं ।
यत्रार्थिनां गणा नित्यं लब्ध्वा यान्ति प्रहर्षिताः ॥
हर्षाद्गीर्णि मुह्यन्ति तत्र मुह्यन्ति शोकजं ।
धिङ्मदीयमिदं राज्यं यत्र भीष्मोन भानुजः ॥
ताभ्यां विरहितं यद्देवं चतुर्व्वैर्ज्जितं ॥ इत्यादि ।

**End.** प्रत्यह दृषभादेयस्तदा पर्व्वफलं लभेत् ।
यथाशक्त्यपि वै कार्य्योविधिः शाठ्यविवर्ज्जितः ॥
चयोदशैव पर्व्वाणि कथितानि विशाम्पते ।
ततश्चाश्रमवासाख्यं पर्व्व राजन् शृणुष्व तत् ॥
रममाणेषु राजेन्द्र कुरुराज्ये कुरूद्वह ।
वर्षाणि नव जातानि सुखेन भरतर्षभ ॥

**Colophon.** इति श्रीमहाभारते जैमिनीये आश्वमेधिके पर्व्वणि श्रवणफलं नाम नवषष्टितमोऽध्यायः समाप्तश्चायं ग्रन्थः ॥

विषयः । १—३ अध्याये,—जैमिनिना सह जनमेजयस्य संवादेन भीष्मद्रोणादिगुरुजनविनाशसन्तप्तस्य युधिष्ठिरस्य व्याससमीपे शोकप्रकाशनं । भगवता व्यासेन च त्वमश्वमेधानुष्ठानेन पूतोभवेति सन्दिष्टोऽसौ कथं मया महायज्ञेन विनार्च्चितेन च यज्ञमिमं शक्यते कर्त्तुमिति सकरुणमुक्ताभूय एव भगवानाह मरुत्ताभिधानेन वदान्येन राज्ञा हिमालयशिखरे यज्ञमनुष्ठाय

ब्राह्मणेभ्योऽखिलं धनं प्रदत्तं, तच्च तैस्तत्र परित्यक्तमद्यापि केनाप्यगृहीतं वर्त्तते। तदानीय समारभ्यतां याग इति। पीतपुच्छश्यामकर्णादिलक्षणलक्षितस्य यज्ञीयाश्वस्य लाभार्थं वृषकेतुमेघवर्णाभ्यां सह भीमस्य यौवनाश्वराज्यगमनविवरणकथनं। भद्रावतीपुरीवर्णनं।

४—६ अध्याये,—भीमपौत्रस्य मेघवर्णस्य अश्वहरणपूर्व्वकं पलायमानस्य पश्चात् धावन्तं सबलं यौवनाश्वमुपलभ्य कर्णपुत्रस्य वृषकेतोः समरसंरम्भवर्णनं। अथ मूर्च्छामापन्ने वृषकेतौ भीमेन सह यौवनाश्वकुमारस्य सुवेगस्य युद्धवर्णनं। अत्रान्तरे मूर्च्छितस्य यौवनाश्वस्य वृषकेतुप्रयत्नेन लब्धचैतन्यस्य च नितरां निर्व्विण्णतया भीममाहूय तेन सह सन्धाय ताभ्यां स्वपुरीं प्रवेशयतो हस्तिनापुरप्रयाणवर्णनं। अत्र जरद्गवायाः वृत्तान्तकीर्त्तनञ्च।

७—११ अध्याये,—कृष्णयुधिष्ठिरादिभिः सह साक्षात्कारं विधाय सपरिजनस्य यौवनाश्वस्य स्वपुरीगमनकथनं। संक्षेपेण मरुत्तकृतयज्ञविवरणं संक्षेपतः ब्राह्मणादीनां वर्णानां धर्म्मकथनं। विधवाकृत्यनिरूपणं। बन्धकीस्वैरिणीप्रभृतिलक्षणकथन। लक्ष्मीस्थैर्य्यकारणकथनं। अथ यज्ञानुष्ठानकाले रुक्मिण्या सार्द्धं भगवतः सान्निध्यार्थं तमानेतु भीमस्य द्वारकापुरीप्रवेशपूर्व्वकं तत्र भोजनपारिपाट्यदर्शनवर्णनं। कृष्णस्य भोजनकाले सत्यभामायाः परिहासकरणं। सपरिवारस्य कृष्णस्य हस्तिनापुरीमुद्दिश्य गमनकाले कामिनीनां व्यङ्गोक्तिवर्णनं। कृष्णमुद्दिश्य गोपानां मुग्धभाषितकथनञ्च।

१२—१५ अध्याये,—सप्तर्षिगणकृतकृष्णस्तोत्रवर्णनं। स्मार्त्तगणकृततत्स्तोत्रकथनं। अथ पुरीप्रवेशपूर्व्वकं कृष्णादीनां यज्ञीयाश्वदर्शनकाले अनुशाल्वकर्त्तृकाश्वहरणवृत्तान्तकीर्त्तनं। तेन सह युद्धकाले प्रद्युम्नकृष्णादीनां मूर्च्छाप्राप्तिकथनं। अनुशाल्वेन सह युधिष्ठिरस्य बन्धुत्वकरणकथनं। अथ चैत्रपूर्णिमायां युधिष्ठिरस्य हयमेधारम्भकथनं। हयरक्षार्थमर्ज्जुनस्य नियोजनकथनं। अथ माहिष्मतीपतेर्नीलध्वजस्य पुत्रः प्रवीराभिधानः पुष्पितासु लतासु सार्द्धं स्त्रीसहस्रेण रममाणोऽसौ हयवरं वीक्ष्य स्वां पुरीं निनायेतिकथनं। तेन सह पार्थादीनां युद्धवर्णनं। तत्र स्वाहानामिकया नीलध्वजकुमार्य्या वह्नेर्विवाहवृत्तान्तकथनञ्च। अथ नीलध्वजेन पार्थाय हयवरे दत्ते नितरां मन्युवेगमापन्नाया नीलध्वजपत्न्या ज्वालाराजधानीं प्रविष्टायाः परुषाक्षरश्रवणेन सन्धुक्षितपुत्रशोकाया गङ्गाया वाणरूपेण बभ्रुवाहनतूणप्रवेशकथनं।

१६—२१ अध्याये,—अथ विन्ध्यगिरिप्रदेशं प्रति चलितस्य हयवरस्य शिलास्पर्शेन जडीभावप्राप्तिकथनं। ततश्च पार्थस्य सौभरिमुखात् उद्दालकमुनिपत्न्याः शिलाभावप्राप्तिविवरणश्रवणकथनं। तत्र प्रसङ्गेन श्राद्धे विहिताविहितद्रव्यादिकथनञ्च। अथ चम्पापुरीपतेर्हंसध्वजस्य तद्धयग्रहणकथनमुखेन तत्पुत्रस्य सुधन्वनः प्रियामनोरथसम्पादनव्यग्रतया पार्थमभियोधयितुं पित्रा दर्शितस्यापि कालविलम्बदर्शनात् शङ्खलिखितोपदेशेन तस्य तप्ततैलप्रवेशरूपदण्डकथनं। तत्र भगवन्नामप्रभावेण अक्षतशरीरस्य तस्य पुनः पित्रा सह पाण्डवकुलहिताय प्रयाणवर्णनं। अथ

अर्ज्जुनकृतस्य सुधन्वशिरसः कृष्णपादयोः पतनकथनं। तथा तदनुजमस्तकपतने संवृत्ते कृष्णाज्ञया गृहीततन्मस्तकस्य प्रयागमुद्दिश्य चलितस्य गरुड़स्य पुरतस्तन्मुण्डग्रहणाय शिवादेशेन भृङ्गिरीटेः पराक्रमप्रदर्शनं। अथ पराजितोऽसौ शिवानुचरो निजावस्थां पार्व्वत्यै कथयामास। तया च सोत्कण्ठमभिहितो भगवान् भूतपतिः स्ववाहनं जरद्गवं गरुड़दर्पनाशाय प्रेरयामास। अथ तन्निःश्वासवातेन संमूर्च्छितइव पक्षिराट् कथमपि प्रयागतीर्थे तन्निचिक्षेप। अत्रान्तरे नन्दी तन्मस्तकग्रहणेन शिवसन्तोषमापाद्य तत्कण्ठमालायां योजयामासेतिवृत्तान्तकथनं। अथ तुरगस्य सरोवरप्रवेशेन तुरगीभावप्राप्तिकथनं। ततस्तस्य व्याघ्रभावप्राप्तिकीर्त्तनञ्च।

२१—२६ अध्याये,—अथ स्वभावमापन्नस्य हयवरस्य स्त्रीराज्यप्रवेशपूर्व्वकं तत्र बन्धनप्राप्तिकथनं। अथ युद्धे पराजितायाः नारीपुरीस्वामिन्याः प्रमीलायाः पार्थकृतपाणिग्रहणकथनं। अश्वस्य राक्षसपुरीगमनवृत्तान्तकथनं। तस्य मणिपुरगमनप्रसङ्गेन मणिपुरवर्णनं। पितृशापेन चित्राङ्गदाया नक्रीभावप्राप्तिकथन। बभ्रुवाहनस्य पार्थेन सह युद्धनैपुण्यवर्णनप्रसङ्गेन कुशेन सह रामस्य समरसंरम्भे दृष्टान्ततया समुट्टङ्किते संक्षेपेण रामचरितवर्णनं। सीतानिर्व्वासनकाले रामेण सह भरतादीनां विवादकथनं। विस्तरेण रामकृताश्वमेधवृत्तान्तकीर्त्तनं। शत्रुघ्नसमीपात् लवस्य बन्धनप्राप्तिकथनादिकञ्च।

२७—४८ अध्याये,—बभ्रुवाहनकृतपार्थवृषकेतुविनाशकथनं। उलूपीचित्राङ्गदयोः परिदेवितवर्णनं। तयोरुपदेशेन सञ्जीवकमणिप्रभावात् तेषां जीवनप्राप्तिकथनञ्च। प्रसङ्गात् बभ्रुवाहनस्य सञ्जीवकमण्यागमविवरणकीर्त्तनं। यदा खलु बभ्रुवाहनेन पार्थो निपातितस्तदा धृतराष्ट्रोपदेशेन दुर्बुद्धिकृतपार्थशिरोऽपहरणविवरणकथनं। रत्ननगराधिपतिपुत्रस्य ताम्रध्वजस्य हयबन्धनवृत्तान्तकीर्त्तनं। तत्र तत्पितुर्मयूरध्वजस्य वृद्धब्राह्मणरूपाय कृष्णाय देहार्द्धदानविवरणकथनञ्च।

४९ ५९ अध्याये,—अर्ज्जुनस्य मयूरध्वजादश्वद्वयलाभकथनं। सारस्वतपुरनाथस्य वीरवर्म्मणः अश्वद्वयबन्धनविवरणकथन। यमेन सह वीरवर्म्मसुतायाः मालिन्या विवाहकथनं। तत्र यक्ष्मप्रमेहविसूचिकादिरोगाणां वंशादिकथनं। सर्व्वेषां रोगाणां कर्म्मविपाककथनञ्च। अश्वयोश्चन्द्रहासपुरगमनविवरणकथन। अर्ज्जुनादीनां नारदमुखात् चन्द्रहासनृपतिचरित्रश्रवणकथनं। तत्र एकादशीव्रतमाहात्म्यादिकीर्त्तनञ्च मदनतनयया सार्द्धं चन्द्रहासस्य विवाहादिवर्णनञ्च।

६०—६९ अध्याये,—कौन्तलपस्य राज्ञः पुरतो गालवस्य अरिष्टाध्यायकथनं। चण्डिकागृहे समुपासनार्थं समुपस्थितस्य मदनस्य बधवृत्तान्तकीर्त्तनं। शालग्रामशिलामाहात्म्यकथनं। अथाश्वयोरुत्तरमहासागरजलप्रवेशवृत्तान्तकीर्त्तनं। तत्र प्रविष्टानामर्ज्जुनादीनां दृष्टवजलमार्कण्डेयलोमशपतनस्य बकदाल्भ्यस्य मुनेर्दर्शनप्राप्तिकथनं। अथ जयद्रथराज्यगमनानन्तरं पार्थस्य दुःशलासमाश्वासन। विस्तरेण युधिष्ठिरस्य हयमेधमहोत्सववर्णनं। कलिधर्म्मकीर्त्तनञ्च।

---

**No. 2160.** **आयुर्व्वेददीपिका, वा चरकतात्पर्य्यटीका।** Substance, foolscap paper, 12 × 4 inches. Folia, 266. Lines, 9 on a page. Extent, 10,688 ślokas. Character, Bengali. Date, 1277 Bengali era. Place of deposit, Punṭiyá, Zillá Rájaśáhí, Bábu Rádhikádhara Kavirája. (He is a native of S'rírámapura-grám, Post, Dumkolá, Zillá Murisidabád.) Appearance, new. Prose. Incorrect.

**Ayurveda-dípiká** *alias* **Charakatátparya-dípiká**. A commentary on Charaka's institutes of medicine. By Chakrapáṇidatta. The work of Charaka, which is older than Susruta, professes to be a compilation from a treatise by A'treya, a Vedic sage. It is divided into eight books, named respectively, Sútrasthána, Nidánasthána, Vimánasthána, Sárírasthána, Indriyasthána, Chikitsitasthána, Kalpasthána, and Siddhisthána. This eightfold division obtains also in Susruta, but the order of arrangement and some of the names are different. The codex under notice is incomplete, containing only the first five books. Each book has a different series of pagination, and the total thereof is given above. One complete, but incorrect, edition of the text of Charaka has been published in Calcutta, and three incomplete editions are also extant.

**Beginning.** गुणत्रयविभेदेन मूर्त्तित्रयमुपेयुषे।
त्रयीभुवे त्रिनेत्राय त्रिलोकीपतये नमः॥
सरस्वत्यै नमोयस्याः प्रसादात् पुण्यकर्म्मभिः।
बुद्धिदर्पणसंक्रान्तं जगदध्यक्षमीक्ष्यते॥
ब्रह्मदक्षाश्विदेवेशभरद्वाजपुनर्व्वसून्।
कृताग्निवेशचरकप्रभृतिभ्योनमोनमः॥
पातञ्जलमहाभाष्ये चरकप्रतिसंस्कृते।
मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नमः॥
नरदत्तगुरुच्छिष्टचरकार्थानुगामिनी।
क्रियते चक्रदत्तेन टीकायुर्व्वेददीपिका॥
सभ्याः सद्गुरुवाक्सुधाश्रुतिपरिस्फीतश्रुतीनस्मि वो-
माल्लं तोषयितुं पयोदपयसां नाम्भोनिधिस्तृप्यति॥
व्याख्याभ्यासरसप्रकाशनमिदं त्वस्मिन् यदि प्राप्यते
क्वापि + + कणागुणस्य तदसौ कर्णे क्षणं दीयतां॥

इह हि धर्म्मार्थकाममोक्षपरिपन्थिरोगोपशमाय ब्रह्मप्रभृतिभिः प्रणीतायुर्व्वेदतन्त्रेष्वति-विस्तरत्वेन सम्प्रति वर्त्तमानाल्पायुर्म्मेधसां पुरुषाणां न सम्यगर्थाधिगमः। तदनधिगमाच्च तद्विहितानानुष्ठाने तथैवोपप्लवोऽवजायतेति मन्यमानः परमकारुणिको भगवानग्निवेशोऽल्पायुर्म्मेधसामपि सुखोपलम्भार्थं नातिसंक्षेपविस्तरं कायचिकित्साप्रधानमायुर्व्वेदतन्त्रं प्रणेतुमारब्धवान्। तस्मिंश्च तन्त्रे सूत्रनिदानविमानशारीरेन्द्रियचिकित्सितकल्पसिद्धिस्थानात्मकेऽभिधातव्ये निखिलतन्त्रप्रधानार्था-भिधायकतया सूत्रस्थानमेवाग्रे वक्तव्यमतोऽन्यद्वक्ष्यति। सूत्रस्थानं समुद्दिष्टं। तन्त्रस्य शिवं शुभं। इत्यादि।

**End.** अध्यात्मविषयत्वेन पूर्व्वोक्तो + + रोगाधिकारिणां किमयं सप्तक. आयुर्व्वेदमित्या-दि ७ एकः प्रश्नस्तन्त्रार्थमित्यादि। अर्थासद्वादशमूलीयः।

**Colophon** इति श्रीचक्रपाणिदत्तकृतायामायुर्व्वेददीपिकायां चरकतात्पर्य्यटीकायां इन्द्रियस्थानं समाप्तं। सन१२७७ साल।

विषयः। चरकेतिप्रसिद्धचिकित्साशास्त्रस्य व्याख्यानं।

---

**No. 2161.** रसेन्द्रसारसङ्ग्रहः। Substance, foolscap paper, 12 × 4 inches. Folia, 108. Lines, 8 on a page. Extent, 3,210 ślokas. Character, Bengali. Date, ? Place of deposit, Puntiyá, Zillá Rájaśáhi, Bábu Rádhikádhara Kavirája. Appearance, new. Prose and verse. Correct.

**Rasendrasára-sañgraha.** A pharmaceutical treatise, containing directions for the preparation of metalic medicines, particularly mercurial compounds. Directions are also given for the employment of those medicines in fever and other diseases. Some remarks are also appended on the *rationale* of medical treatment. By Gopálakṛishṇa Kavirája.

**Beginning.** रसेन्द्रमिव निःशेषजराव्याधिविनाशनं।
प्रणमामि गुरुं भक्त्या शङ्कर योगसाधनं॥
नत्वा गुरुपदद्वन्द्वं दृष्ट्वा तन्त्राण्यनेकशः।
श्रीलगोपालकृष्णेन क्रियते सारसङ्ग्रहः॥
सिद्धयोगाश्च ये केचित् ख्यातिशालिनो भवन्ति हि।
एकीकृत्य तु ते सर्व्वे लिख्यन्ते यत्नतो मया॥
तत्र रसप्राधान्यमाह।
अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः।
क्षिप्रमारोग्यदायित्वादौषधेभ्यो रसोऽधिकः॥ इत्यादि।

**End.** द्वीपान्यादिमहादोषास्तस्मा नश्यन्ति सेवया ।
अस्य सूतस्य माहात्म्यं वेत्ति शम्भुर्न चापरः ॥
महानीलकण्ठः ।

**Colophon.** इति रसेन्द्रसारसङ्ग्रहे रसायनाधिकारः ।

**विषयः ।** पारदादिधातूनां जारणमारणादिविधिकथनपूर्व्वकं ज्वरादिषु सर्व्वव्याधिकारेषु भैषज्यविधानकथनं । भैषज्यकरणप्रकारकीर्त्तनञ्च ।

---

**No. 2162. रसमञ्जरी ।** Substance, country-made paper, 11 × 3½ inches. Folia, 36. Lines, 6 on a page. Extent, 187 Slokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Babu Rádhidhara Kavirája; Appearance, fresh. Verse. Incorrect.

**Rasamaṇjarí.** On metalic, principally mercurial, and vegetable medicaments, their preparation and their uses, founded on the works of Chakrapáṇidatta and Náráyaṇa. By S'álinátha.

**Beginning.** यदा मे भूमिपृष्ठी नियमति सततं निश्चला चञ्चलेव
यस्याः सव्ये धनुष्मान् सुकनकसुषमोल्लक्षणः श्रीहनूमान् ।
भक्त्याग्रे यष्टहस्तस्थितशतपतिमतःखण्डवद्धाति चापे-
द्देवेन्द्रैः स्तूयमानं जलधरवपुषं तं भजे रामचन्द्रं ॥
उक्ताश्चक्रेण ये द्रव्यगुणा नारायणेन च ।
तथान्येऽस्मिन् विलिख्यन्ते शालिनाथेन यत्नतः ॥
क्वचिट्टीकाकृतोव्याख्याविशेषमधिगत्य सः ।
पद्येन लिख्यते यत्नाद् व्याख्यानं वचनस्य च ॥
अथ द्रव्यगुणा यत्नात् कथ्यन्ते राजवल्लभाः ।
येषां ज्ञानेन भिषजो न मुह्यन्ति कदाचन ॥
किञ्चिद्रसेन कुरुते कर्म्म पाकेन चापरं ।
गुणान्तरेण वीर्य्येण स्वशक्त्या द्रव्यमेव च ॥ इत्यादि ।

**End.** येषां परिच्यवति शाश्वतमद्वितीयं
तेजस्तमोनिवहनाशकरं हरस्य ॥
तेषां मुखे शशिक + + पल + भाजां
स्वप्नेन वा भवति कालभयं नराणां ॥

**Colophon.** इति श्रीशालिनाथविरचिता रसमञ्जरी समाप्ता ।

**विषयः ।** रसधातुहरीतक्यादीनां प्रत्येकमधिकारक्रमेण गुणनिरूपणं ।

---

**No. 2163.** नाड़ीविज्ञानम्। Substance, country-made paper, 20 × 3½ inches. Folia, 6. Lines, 7 on a page. Extent, 173 ślokas Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Bábu Rádhidhara Kaviràja. Appearance, fresh. Prose and verse. Incorrect.

**Nádivijnána.** On the examination of the pulse in fever and other general diseases. By Govindaráma Sena.

**Beginning.** यज्ञानस्मरणादेव विघ्न विघ्नन्ति साधवः।
तं गोपवेशं गोविन्दं नौमि सर्व्वशमव्ययं॥
शैलेन्द्रतनयापुत्रं सर्व्वप्रत्यूहनाशनं।
प्रणम्य नाड़ीविज्ञानं लिख्यते शास्त्रदर्शनैः॥
श्रीमद्गोविन्दरामेण सेनेन भिषजाधुना।
श्रीगुरोश्चरणाम्भोजयुगमेवनमाश्रयात्॥
प्रथमं तावन्नाड़ीपरीक्षणादेव ज्वरादि द्विजनितरोगाणां साध्यासाध्यत्वमविशेषज्ञानमत्यद्यते। इत्यादि।

**End.** तस्मादिद्वान् प्रयत्नेन तज्ज्ञानं समुपार्ज्जयेत्।
क्वचित् + + + सम्भानात् कालदेशविभागतः॥
क्वचित् प्रकरणाच्चापि नाड़ीज्ञान + + दिश॥

**Colophon.** इति नाड़ीविज्ञानं समाप्तं।

विषयः। ज्वरादौ नाड़ीपरीक्षाविविकथनं।

---

**No. 2164.** णत्वभेदः। Substance, country-made paper, 20 × 5 inches. Folium, 1. Lines, 12 on a page. Extent, 27 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Paṇḍit Iśánachandra Vidyávágíśa. Appearance, fresh. Verse. Correct.

**Natvabheda.** A vocabulary of words having the cerebral ṇ. By Mádhava Achárya.

**Beginning.** स्थाणुर्वाणोगुणः कोणोलवणं पण इत्यपि।
वाणी मणिः फणिनश्च गणोवेणुः कणा कणः॥ इत्यादि।

**End.** मल्लवाची च चाणूरः स्थूणा स्तम्भस्य वाचिका।
लोपदेशिकणत्वेषु शब्दाः केचन कीर्त्तिताः॥

**Colophon.** इति माधवाचार्य्यकृतोणत्वभेदः समाप्तः।

विषयः। स्वभावादेव मूर्द्धन्यणकारयुक्तानां शब्दानां प्रदर्शनं।

---

**No. 2165. रसेन्द्रकल्पद्रुमः ।** Substance, country-made paper, 21 × 4 inches. Folia, 111. Lines, 7 on a page. Extent, 3,753 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájas'áhí, Bábu Rádhikádhara Kaverája. Appearance, old. Prose and verse. Correct.

**Rasendra-kalpadruma.** A treatise on various kinds of instruments, furnaces, retorts, sublimators, &c., for the preparation of mercurial medicines. By Rámakrishna Bhatta, Mahámahopádhyáya, son of Nílakantha Bhatta, a Vaidika Bráhmana of Drávida. The number of instruments described is large, and the details given are full, obviously the work of a practical pharmaceutist.

**Beginning.** लोकेशं व्यक्तमव्यक्तं निर्गुणं त्रिगुणात्मकं ।
सद्सद्रूपिणं वन्दे तं कारणमकारणम् ॥
वन्दे चरणसरोजं श्रीगौरीनीलकण्ठयोः पित्रोः ।
यद्भक्त्या कृतकृत्यास्तरन्ति दुःखाम्बुधिं लोकाः ॥
तापत्रयापहर्त्ता हरिरिव बलिजिद्धिरण्यगर्भोयः ।
स जयति शुद्धोद्दीप्तः पीताम्बर एष पारदोहरजः ॥
रसलोहोपरसादेः शुद्ध्याद्याः सिद्धियोगाश्च ।
समुद्रसेन्द्रतन्त्राद्रसेन्द्रकल्पद्रुमे वाच्याः ॥
वेमल्लपल्लिवासिक आत्रेय कौशलेयकुलजनितः ।
श्रीरामकृष्णभट्टः कृतिमानिह नीलकण्ठभट्टसुतः ॥
अनधिगतसूतशास्त्रश्चिकित्सति प्राज्ञमानी यः ।
स कथं सरंसमसमाने नो यात्युपहास्यतां वैद्यः ॥ इत्यादिः ।

**End.** पक्वाशयगते कुर्य्याद्रेचनं चोभयोर्द्वयं ।
इति विषाधिकारः ।
इमीदमुक्तं निखिलामयेषु सुस्थेषु चैवोभयकर्म्मकारि ।
सिद्धौषधं यत् सुलभं प्रसिद्धं यथानुभूतं व्यवहारसिद्धं ॥
सिद्धौषधमव्यभिचरितशक्तिकमिति ।

**Colophon.** इति दाक्षिणात्यद्राविड़वैदिक-श्रीनीलकण्ठभट्टात्मज-श्रीरामकृष्णभट्टमहामहोपाध्यायकृते रसेन्द्रकल्पद्रुमे प्रयोगकाण्डः समाप्तः । समाप्तश्चायं रसेन्द्रकल्पद्रुमाभिधेयग्रन्थः ॥

**विषयः ।** रस (पारद) शुद्धि-मूर्च्छा-बन्धन-मारणादिविधिकथनं । एवमभ्र-गन्धक-माक्षिक-हरिताल-मनःशिला-हिङ्गुलशोधनादिकथनं । तथा चपलविमलादिशोधनकथनं । लोहसं-

स्वादिविधिः । स्वर्ण-रौप्य-ताम्र-सीसक-रङ्ग-लौहप्रभृतीनां मारणविधिः । गणाध्यायकथनं । यन्त्राध्यायकथनं । तत्र, दोलायन्त्रं । स्वेदनीयन्त्रं । कच्छपयन्त्रं । सोमानलयन्त्रं । हंसपाकयन्त्रं । पटयन्त्रं । पातन-डमरु-लवणयन्त्राणि । भूधरयन्त्रं । वज्रमूषायन्त्रं । वालुकायन्त्रं । नलिकायन्त्रं । जालिकायन्त्रं । गौरीयन्त्रं । तप्तखल्वयन्त्रं । कोष्ठयन्त्रं । टङ्कयन्त्रं । जलयन्त्रं । एतेषां यन्त्राणां निर्म्माणप्रक्रियाकथनं उपयोगितानिरूपणञ्च । रसायनविधिकथनं । ज्वरादिषु सर्व्वेषु रोगेषु भैषज्यनिरूपणं । औषधकरणविधिकीर्त्तनञ्च ।

---

**No 2166 त्रिपुरासुन्दरीस्तुतिकाव्यम् ।** Substance, country-made paper, 14 × 4 inches. Folia, 34. Lines, 9—10 on a page. Extent, 827 s'lokas. Character, Bengali. Date, ? Place of deposit, Puntiyá Zillá Rájas'áhí, Mahárání S'aratsundarí Deví. Appearance, old. verse. Correct.

**Tripurásundarí-stuti-kávya.** A lyrical poem in praise of the goddess Tripurásundarí and of her achievements. By Kálidása, son of Rámagovinda. The work is an imitation of the Gítagovinda of Jayadeva.

**Beginning.** वन्दे वागीशवन्द्यां त्रिपुरपरगतां सुन्दरीं दिव्यवेशां
प्रातर्भास्वत्सुपुञ्जद्युतिसुखवपुषं सच्चिदानन्दरूपां ।
भक्ताभीष्टातिरिक्तप्रदपदकमलां सस्मितां मानकम्यां
कृत्या चित्रायमानामखिल + + तनुं शम्भुसम्मोहभङ्गां ॥

— — — — — — — — — — — ।

उदयच्छ्रीभुवनेश्वरीपदपरः श्रीयुक्तरामेश्वरो-
दाता ध्वस्तदरिद्रतोबुधवरः सद्वंशनाभोज्ज्वलः ।
नाम्ना रामगतिस्मृतिर्न हि कथं चेदीदृशोऽयं कृती
पीयूषप्रभवोदयाल्लुरनघः सर्व्वप्रियः सर्व्वदा ॥
श्रीकालीचरणाब्जयोगनुरतः श्रीमत्प्रभामासुत-
स्तत्प्रीत्या परया शिवार्च्चनमनाः श्रीरामगोविन्दजः ।
श्रीलश्रीहरिनन्दनः सुविदितः श्रीकामदेवे महान्
राढीयद्विजनायकोमुखवरस्तस्यान्वये सम्भवः ॥

— — — — — — — — — — ।

रामेश्वरकृतबहुपरितोषः ।
प्रचलितचित्तनभावनमस्याः ॥ इत्यादि ।

**End.** हरिहरहरनारीप्राविरञ्चप्रणाम्रप्रणयवरकृतिपादाम्भोजधूलिप्रसक्तः ।
गमयितुमिदमायर्याचते माधसङ्ग सुजनसुखविधाने कामकामारिकामे ॥

धीरानन्तोषकारी सुखकुलविदितोमात्तमत्यादिभासा
ज्ञातश्रीरामगोविन्दचरणशरणः श्रीमतः कालिदासः ।
सर्गोऽयाद्द्वादशोऽयं त्रिभुवनजननीस्तोत्रमाध्ये सुकाव्ये
नव्ये तस्यातिभव्ये मृत पवि उत तत्साधवः स्नापयन्तु ॥

**Colophon.** इति श्रीत्रिपुरसुन्दरीस्तुतिकाव्ये द्वादशः सर्गः ॥
शाकेऽग्निमुनिषट्चन्द्रमानितेऽब्दे कृतं मया ।
मातापितृपदध्यानकालिदासेन धीमता ॥

**विषयः ।** प्रथम सर्गे,—त्रिपुरसुन्दर्य्या आविर्भाववर्णनं । २ये सर्गे,—तस्यास्तपस्यावर्णनं । ३ये सर्गे,—तस्या माहात्म्यवर्णनं । ४र्थे सर्गे,—तत्कृतजगत्सृष्टिवर्णन । ५मे सर्ग—जगद्भयनाशनत्व-वर्णनं । ६ मे सर्गे,—देव्याः शरीरवर्णनं । ७मे सर्गे,—रूपवर्णनं । ८मे सर्गे,—स्वाभीष्टसिद्धये प्रार्थनावर्णनं । ९मे सर्गे,—देव्या रत्याभासवर्णनं । १०मे सर्गे,—सुरमंमदि देव्या अभिष्ठानवर्णनं । ११शे सर्गे,—देवीभक्तमाहात्म्यवर्णनं । १२शे सर्गे,—भक्तमनोभिलाषवर्णनमुखेन देव्या नाममाहात्म्यादिकीर्त्तनञ्च । (जयदेवकृतगीतगोविन्दानुकरणेन निर्म्मितमिदं गीतिकाव्यमिति शम् ।)

---

**No 2167.** गीर्व्वाणपदमञ्जरी । Substance, country-made paper, 14×4, inches. Folia, 15. Lines, 8 on a page. Extent, 318 ślokas Character, Bengali. Date; ? Place of deposit, Puntiyá, Zillá Rájaśáhí, Mahárání Saratsundarí Deví. Appearance, fresh Prose and verse. Incorrect.

**Girváṇa-padamanjarí** An elementary grammar of the Sanskrit language, in the form of a dialogue, interspersed with moral tales. By Varadarája.

श्रीगणेशाय नमः ।

**Beginning** कुचत्या भवन्तः । कस्मादागताः । कां दिशमलङ्कर्वन्ति स्म । कां दिशमलं कर्त्तुमीहा । कुत आगताः । कर्णाटदेशादागताः । कस्माद्देशात् समागता भवन्तः । महाराष्ट्रदेशात् समागतावयं । के यूयं । वयमुत्तरदेशिकाः । किमागमनकारण । अत्र किञ्चित् प्रयोजनमुद्दिश्य समागतास्माभिः । इत्यादि ।

**End.** मम यद्यद्वस्तु भक्षणयोग्यं तदेव मया गृहीतं स्वामिनः ॥
कृता वरदराजेन गीर्व्वाणपदमञ्जरी ।
गणेशप्रीतये चैव वैदिकप्रीतये तथा ॥

**Colophon.** इति श्रीगीर्व्वाणपदमञ्जरी समाप्ता ।

**विषयः ।** बालानां संस्कृतप्रवेशाय प्रश्नोत्तरक्रमेण संस्कृतवाक्यरचनाप्रकारकीर्त्तनं । क्वचिदुपन्यासावतारेण च हितोपदेशकथनञ्च ।

---

No 2168 देवीभक्तिरसोल्लासः। Substance, country-made paper, 14 × 4 inches. Folia, 10. Lines, 9 on a page. Extent, 222 s'lokas Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájas'áhí, Mahárání S'aratsundarí Deví. Appearance, fresh. Verse. Incorrect.

**Devíbhakti-rasollása**. The work is divided into two parts, the first treating of Siddhi Yoga in course of a hymn in praise of the goddess Durgá, and the second of the true nature of Vidyá, or the female energy. By Jagannáráyaṇa.

**Beginning.** परब्रह्माभोगस्फुरितमहसो हृद्यवचसो-
वचोज्योतस्नाध्वस्ताखिलजगदतीवोग्रतमसः।
स्मरन्मर्त्यामर्त्यानघपरमनिर्वाणरहसः
स्मरामि श्रद्धालुः सुगुरिमगुरोः पादकमलं॥
कुलीनश्चापञ्चासुरभुवननारायणसुतो-
जगन्नाथो नारायण उदितभक्तिर्गिरिसुतेः।
मुदा देवीभक्तिप्रकलितरसोल्लासममलं
विधत्ते विश्वात्मा स्वभिविदिषया साधनविधेः॥

**End.** महावाणी विद्याधनविरचितैषाऽतिविषदा
गुणाशाऽनन्याशा निरवधिनवीना रुचिकरी।
सुरम्या संम्मान्दा शशिसुदीप्तोज्ज्वलतरा
सतां कण्ठेऽकुण्ठ लगतु गजमुक्तास्रगिव मे॥

**Colophon.** इति देवीभक्तिरसोल्लासे जगन्नारायणमनोऽभिलाषे विरचितसहृदयहृदय विरागः शेषविभागः।

विषयः। प्रथमविभागे देव्याः स्तोत्रकीर्त्तनमुखेन नैष्कर्म्यसिद्धिनिरूपणं। द्वितीये विद्यास्वरूपादिकथनं।

---

No. 2169. मुग्धबोधपरिशिष्टम्। Substance, country-made paper, 14 × 4 inches. Folia, 157. Lines, 5 on a page. Extent, 1,858 s'lokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiya, Zillá Rájas'áhí, Paṇḍit I's'ánachandra Vidyávagís'a. Appearance, old. Prose. Correct.

**Mugdhabodha-paris'ishṭa**. A supplement to the Mugdhabodha grammar, of Vopadeva. By Ráma Tarkavágís'a. The work has been printed in Calcutta.

**Beginning.** नत्वा शम्भुपदाम्भोजमणिमाद्यष्टसिद्धिदं ।
सुगमबोधस्याव शेषस्तन्यते रामशर्म्मणा ॥

विंशत्यादेरनादन्तौ वेवक्तं । विंशत्यादेः परार्द्धपर्य्यन्ते वेवक्तं स्यात् । अनादन्तौ सत्यां । एकोनविंशतिः शूद्राः । इत्यादि ।

**End.** भूतभवत्याः । विभिन्नकालीनतया भूतभवन्ते साधवः स्युः । अग्निष्टोमयाजी पुत्रोऽजनिता छतः कटः श्रोभविता गोमानादीत् यशस्वी भविता इत्यादौ ।

विद्वद्वन्द्योऽद्वयन्तोऽमरगुरुरिव योबोपदेवः कवीन्द्र-
स्तेन व्याख्यातिशास्त्रं कठि-तरमपि प्रेच्य विस्तार्य्य यत्नात् ।
नानातन्त्राणि दृष्ट्वाऽमलमतविहितं रामशर्म्माऽवशेषं
तस्यामावाप्तबोधं जडमतिमतये श्रीयुतः सन्ततान ॥

**Colophon.** इति महामहोपाध्यायश्रीरामतर्कवागीशविरचितं सुगमबोधपरिशिष्टं परिपूर्णं ।

**विषयः ।** बोपदेवकृतसुगमबोधव्याकरणानुक्तानां वैयाकरणप्रक्रियाणां सोदाहरणलक्षण-प्रदर्शन ।

---

**No. 2170.** उष्मभेदः । Substance, country-made paper, 18 x 5 inches. Folia, 2. Lines, 9 on a page. Extent, 90 ślokas Character, Bengali. Date ? Place of deposit, Puntiyá, Zillá Rájaśáhí, Pandit I'śánachandra Vidyávágíśa. Appearance, old. Verse. Correct.

**Ushmabheda.** Three separate vocabularies of words which have naturally the three sibilants. By Purus'ottama.

**Beginning.** श्रेयःशर्म्मनिशातशातशकटं शाश्विच्छशोभिः शशः
स्वच्छश्रीपदशश्वशोभनश्रशं शुद्धं शरण्य श्रिय ।
शङ्क दर्शनशातन शुभशतं क्लिशाद्यशूर्पांशुकं
श्विचं श्रोवकशेषशेखरशिरःश्रैवालशोफश्रतं ॥ इत्यादि ।

**End.** संसनं भीसकं सत्यं सहमाहससाध्वसं ।
सहमारससंसारसाधुसमुद्रसोदराः ।
+ + + कषचखष दन्त्यसत्वेन संस्थिताः ॥

**Colophon.** इति पुरुषोत्तमविरचित उष्मभेदः समाप्तः ।

**विषयः ।** स्वभावादेव शषसयुक्तानां शब्दानां निर्द्दशकीर्त्तनं ।

---

**No. 2171** हैमाङ्गिकी । Substance, country-made paper 14 × 4 inches. Folia, 16. Lines, 8 on a page. Extent, 364 S'lokas. Character, Bengali. Date, ? Place of deposit, Puntiyá, Zillá Rájasáhi, Raja Nimanáráyana Thákura. Appearance, fresh. Verse. Correct.

**Haimáñgíkí.** A poem in praise of Gauránga, describing his career and his merits, and proving him to be an incarnation of Vishṇu. By Mahes'anáráyana S'armá, disciple of Rádháramaṇadása, a Vaishṇava of great sanctity.

**Beginning** चेतोभिः कलितः सतामिह नवद्वीपे द्युनद्यां दध-
द्धेम्नां कान्तिमुषं यतीन्द्रसदृशां मूर्त्तिं मदृत्त्या फलं ।
यश्चां प्रादुरभावि यः कलिमलध्वान्तार्कमुद्भ्राजितं
तं सर्व्वद्रुहिणेन्द्रवन्दितपदं चैतन्यदेवं भजे ॥
छन्दोभिस्तपसाध्वरेण वचनेनाराध्य योगाध्वना यं
भक्ताः कवदोऽभियन्ति सुमहज्ज्योतिः किलाद्यः परं ।
यं ब्रह्म श्रुतयोऽपि यानितिवित्तयं भगांसमस्या;यं
तस्यायं पुरुषोत्तमस्य विदितः पीतावतारः कलौ ॥
षड्भिर्दस्युजनैर्दुरन्तगहनं नीता भृशं दुःखिता
दृष्ट्वा हृष्टकुटुम्बकण्टकमिदं वात्यासमुद्दीपित ।
भिक्षोक्षानसरीरित विषधरं शाण्ड्यादिशैवज्वरं
सद्यः प्राणहर कृतान्तरभसं शार्दूलविक्रीडितं ॥
ये नेमं हरिमाश्रयन्ति शरणं निर्लिप्तमाकाशवद्-
भूमानं सकलेषु भूतनिकरेष्वन्तर्बहिः साक्षिणं ।
तेषां भारतभूजनिः किमसतां साफल्यमासेदुषी
तस्मादाशु निषेवतामशठधीः कृष्णाङ्घ्रिपङ्करुह ॥ इत्यादि ।

**End** तत्त्वावबोधमध्यन्तं दददुक्तिमदूषमां ।
श्रीमद्भागवतं भूयाद्रमच्छायां सदा मम ॥
नमो नारायणायाद्यो नराय च नमोनमः ।
नरोत्तमाय भारत्यै वेदव्यासाय ते नमः ॥

**Colophon.** इत्यशषशास्त्राकपरविद्याभ्यासप्रवचनसमवसायानुशीलनप्रागल्भ्योपचितपुण्य-यशश्चन्द्रिकापरिपूरितसमस्तदिङ्मण्डला खिलपुण्यारण्यवरिष्ठश्रीवृन्दारण्यविराजमानपरमभागवतश्री-ल-श्रीमद्राधारमणदासाभिधान-श्रीवैष्णवाचार्य्यवर्य्यपादानुशिष्य-श्रीमहेशनारायणद्विजविरचिता हैमाङ्गिकी नाम श्रीमद्गौराङ्गदेवस्तुतिः समाप्ता ।

विषयः। गौराङ्गापरनामधेयस्य चैतन्यस्य स्तोत्रव्याजेन तस्य भगवदवतारसंस्थापनं माहात्म्यवर्णनं चरितकीर्त्तनञ्च।

---

**No. 2172. तन्त्रप्रदीपः।** Substance, palm leaf, 12 × 2 inches. Folia, 187. Lines, 7 on a page. Extent, 6,691 ślokas. Character, Bengali. Date, Śk., 1493. Place of deposit, Puntiyá, Zilla Rájaśáhí, Ráya Nímanáráyana Thákura. Appearance, decayed. Prose. Incorrect.

**Tantra-pradípa.** A commentary on the Sáradá-tilaka, a Tantra of considerable repute. By Lakshmana Des'ika.

**Beginning.** लक्ष्मीदृगम्बुरुहचुम्बनसंविधान-
लग्नाञ्जनं मधुरमाननमच्युतस्य।
माध्वीकसौरभविलासकलाविलम्बि
वोऽलम्बमम्बुजमिव श्रियमातनोतु॥
क्षौणीपालकिरीटरत्नतरणिप्रोद्यत्प्रभामण्डल-
स्मेरस्वैरपदार — — — — — —।
— — — — राघवेन्द्रसुकृती दारिद्र्यविद्रावण-
क्षमाद्द्राविरभूद्गदाधर इतिख्यातः कुमाराग्रणीः॥
श्रीशारदातिलकदुर्गमर्गवीथ्या-
मज्ञानघान्द्रतमसोतितिरोहितायां।
संख्यावतामनुपदं स्खलितं विलोक्य
— — — — — — — — — — ॥

अस्य तन्त्रस्य देवताप्राधान्याद्देवतानाञ्च मन्त्रमयतया मन्त्राणामपि वर्णात्मकतया वर्णानामपि शक्तिपरिणामित्वात् शक्तेरपि शिवाभिन्नतया तन्त्रमूलं देवतं शिवं मूलीभूतं — — — — — — — — — — शिष्यशिक्षायै तच्छिष्यभाति। विद्यानन्देति। इत्यादि।

**End.** देशिकोग्रन्थकारगुरुः। तस्यैतानि विशेषणानि। शेषं सुगमं॥
प्राभूद्भूदेवराजोजितरिपुन्नपतिर्दर्पनारायणाख्य-
स्तस्यापि द्वौ तनूजौ चरितहरविभवौ रामसौमित्रिमित्रौ।
तत्र श्रीधीरसिंहः स्मृतमदन + + + कणीयान्
पारीन्द्रोयेन सद्योद्धृतविपुलमदोद्राविताराविन्द्रः॥
श्रीधीरसिंह + + + श्रीराघवेन्द्रः सुरपादपोऽभूत्।

यदङ्कमद्यापि + + + लक्ष्मीर्महासुराणां विजये व्यपासीत् ॥
— — — — — — — — — — ।
— — — नादित्यप्रकाशस्मितचरणसरोजन्मविश्रान्तकीर्त्तिः ।
भूपः श्रीरामभद्रोधरणिसुरतरुर्भैरवेन्द्रात्मजन्मा
क्षौणीमेतामिदानीं चतुरुदधि + + पूरमीमां प्रशास्ति ॥
श्रीराघवेन्द्रप्रभवप्रभावी गदाधरोनाम कुमारराजः ।
श्रीशारदायास्तिलकप्रकाशं तन्त्रप्रदीपं समपूरि धीरः ॥
श्रीधीरसिंहात्मजराघवेन्द्रतनूप्रसूतस्य गदाधरस्य ।
तन्त्रप्रदीपे समपूरि पञ्चविंशप्रकाशोभुवनप्रकाशः ॥
शुभमस्तु १४९२ ।

विषयः । लक्ष्मणदेशिककृतशारदातिलकस्य व्याख्यानं ।

---

**No 2173.** सात्त्वताचारवादार्थः, वा भक्तिविलासमतदीपिका । Substance, country-made paper, 9 × 4 inches. Folia, 102. Lines, 7—8 on a page. Extent, 1,516 ślokas. Character, Bengali. Date, ? Place of deposit, Puntiya, Zillá Rájaśáhí, Ráya Nímánaráyaṇa Ṭhákura. Appearance, fresh. Prose and verse. Generally correct.

**Sáttvatácháravádártha** *alias* **Bhaktivilása-matadípiká.** A dissertation on the propriety of abstaining, on the part of Vaishṇavas, from slaughter even for sacrifices ordained in the S'ástras, particularly at the Durgápújá festival. By a disciple of Rádháramanadása, of Vrindávana.

**Beginning.** अपि वैधत्वबुद्ध्या यद्बुद्धिः प्राणिविहिंसके ।
न तेषामधिकारोयद्धर्मे तद्विष्णवे नमः ॥
हिंसा चतुर्विधीनैर्य्या पारम्पर्य्योपदेशतः ।
वैधी श्रेयस्तथैतादृङ्मते ह्युपास्यते हि सा ॥
शारदश्रीमहामायापूजनादिविधाविह ।
गौड़ादौ नियमङ्गौड़सम्प्रदायाभिमानिनः ॥
प्रायशोविष्णवंमन्याः कुर्व्वन्ति पशुघातनं ।
सच्छन्दं महिषच्छागच्छतजैः च्छितिकर्द्दमं ॥
तदेतद्दृश्यमाणाया अपि देव्यास्तु विद्विषं ।
दुर्म्मतं तद्विधाज्ञानाध्यवसायकृतं मया ॥

बहुमानोपपत्तिभ्यां निराकृत्य विलिख्यते ।
स्मार्त्तादिमतमाश्रित्य श्रीमधर्म्मवशिर्म्मणं ॥

— — — — — — — — — ।

वैधत्वबुद्ध्या मनसापि प्राणिविहिंसनायाश्रवमानेभ्यस्तत्परेभ्योऽज्ञानेभ्यस्तमाश्रद्देकान्तपरायणस्य
श्रेरः—— इत्यादि ।

**End.** इमं भागवतादिशास्त्रविदिताहिंसाख्यसिंहस्वनै-
स्तादृक्स्मार्त्तमतस्य यूथपतयस्त्यक्त्वा सुपेतुः स्थितौ ।
दीना वादिविदारकाः परमतः श्रावान् श्रनैर्विभ्यतो-
बद्धाम् सुचत मायिकाः प्रियतमचेत् स्वात्मभूतेष्वल ॥
यत्प्रमाणमरीचिरेव निखिलश्रोताचराणाभ्यभात्
स्वाध्यश्रीयुतदाक्षिणात्यगरुभिः ख्यातस्य मन्यां कविः ।
श्रीराधारमणप्रियोहि जयरत्नदासनामाचरो-
वृन्दारण्ये वरालयेमम गुरुर्ज्ञानोपदेष्टा स्थि सः ॥

**Colophon.** इति सात्वताचारवादार्थोपरनाम्न्यां भक्तिविलासतत्त्वदीपिकायां वैधहिं-
सापरिच्छेदः ।

**विषयः ।** मिषगं कतणात्मभिर्वैष्णववर्णाममारिभिः सभक्तिकपथावद्वैष्णवलमिच्छद्भिः सात्त्व-
तगणैर्वैधहिंसापि मा जातु कर्त्तव्येति श्रुतिस्मृतिपुराणादिप्रमाणसंवादेन विविधवादप्रदर्शनेन
च प्रतिकूलवादखण्डनपूर्व्वकं सर्व्वथापि हिंसायास्त्याज्यत्वनिरूपणं ।

---

**No. 2174.** स्मृतिसङ्ग्रहसारम् । Substance, country-made paper, 14 × 3 inches. Folia, 27. Lines, 7 on a page. Extent, 811 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bhavaśaṅkara Bhaṭṭácharya. Appearance, old. Verse. Correct.

**Smṛiti-saṅgrahasára.** A collection of Vyavasthás on various Smṛiti topics, founded on the rules laid down in Raghunandana's digest. By Mahes'a Panchánana.

**Beginning.** प्रणम्य गोपालपदारविन्दं विलोक्य मन्वादिकृतञ्च शास्त्रं ।
व्यवस्थकर्त्तव्यविधानहेतुं महेशशर्म्मा वितनोति धीरः ॥
विहितस्य निषिद्धस्य कर्म्मणोज्ञानकारकः ।
व्यवस्थासङ्ग्रहः सर्व्वैः पण्डितैः परिलिख्यते ॥
ब्राह्मणक्षत्रियविशां जनने मरणे तथा ।
दशद्वादशपञ्चाहैः शुद्धिः शूद्रस्य मासतः ॥ इत्यादि ।

**End.** अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्धं रजस्वला ॥

**Colophon** इति श्रीमच्छ्रीरघुनन्दनविरचितं स्मृतिसङ्ग्रहसारं समाप्तं ।

विषयः । रघुनन्दनमतमधिगम्य विरचितोऽयं सङ्ग्रहः । तत्र अशौचनिरूपणं । शुद्धिनिरूपणं । मलमासादिनिरूपणं । परिणयादिकर्म्मविशेषे सौरमासादिनियमनं । मङ्गलपत्राक्षरचमाविधिकथनं । युग्मादितिथिविवेचनं । एकादश्युपवासनिरूपणं । पारणविधिनिरूपणं । जन्मतिथिनिरूपणं । संक्रान्तिनिरूपणं । ग्रहणादावामश्राद्धविधिकथनं । पुरश्चरणविधिः । सावित्रीचतुर्द्दशीविधिः । दशहरादिनिरूपणं । रथयात्रादिविधिः । जन्माष्टम्यादिविधिः । शारदीयापूजाकोजागरादिलक्ष्मीपूजादिनवान्नविधानं । श्रीपञ्चमी । शिवचतुर्द्दशी । अशोकाष्टमी । श्राद्धविधिः । सपिण्डीकरणादिविधिः । आह्निककृत्यविधिः । उद्वाहविधिः । तत्र सापिण्ड्यादिनिरूपणञ्च । ( अत्र सर्व्वत्र व्यवस्थासौष्ठवं दृश्यते । )

---

**No. 2175.** दुर्गावबोधिनी । Substance, country-made yellow paper, 13 × 3 inches. Folia, 27. Lines, 8 on a page. Extent, 818 ślokas. Character, Bengali. Date, Sk. 1712. Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bhavaśaṅkara Bhattácharya and Gopivallabha Bhaṭṭácharya; another copy at S'ántipura, Káhdása Vidyávágíśa. Appearance, fresh. Prose. Correct.

**Durgávabodhiní.** A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Chaturbhuja Mis'ra.

**Beginning.** एकमूर्त्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये ।
कात्यतेश्वरतया विवर्त्तते ब्रह्मशक्तिमहमा नुमोऽस्मि तां ॥
श्रीचतुर्भुजभरास्ततात्मना चण्डिकासुचरितं विविच्यते ।
क्षीरसार्थ इव दुग्धतां यतः क्षीरवाण्यपि सतां विनोदिनी ॥

प्राक् किल भगवद्बादरायणान्तेवासी जैमिनिर्महाभारतविषयेषु केषुचित्पदार्थेषु सन्दिहानो मार्कण्डेयमहर्षिमुपगम्याप्राक्षीत् । अथ नायमस्माकं कथाक्षण इति सर्व्वार्थाभिज्ञान् विन्ध्याचलनिलयांश्चतुरः पक्षिणः पृच्छत मुनिनोपदिष्टोऽसावपि तथैवाकार्षीत् । — — — — — —
अष्टममन्वन्तरमुपक्रममाणा धर्म्मपक्षिणः ऊचुः । मार्कण्डेय उवाचेत्यादि । मृकण्डोरपत्यं मार्कण्डेयः इत्यादि ।

**End.** देवीमाहात्म्यतात्पर्य्यटीका दुर्गावबोधिनी ।
श्रीचतुर्भुजमिश्राणां क्षतिरास्तामियं चिरं ॥
श्रीचतुर्भुजमिश्रेण ग्रन्थोऽयं सरमातनैः ।

वेदनवविधौ शाके टीका दुर्गावबोधिनी ॥

**Colophon.** इत्यौपमन्यवश्रीचतुर्भुजमिश्रविरचितायां देवीमाहात्म्यतात्पर्य्यटीकायां दुर्गावबोधिन्यां देवीमाहात्म्यं समाप्तं ।

शाके रविद्वये चन्द्रे सूर्य्ये कर्कटसंस्थिते ।

देवीमाहात्म्यटीकां हि काशीनाथोऽलिखन्मुदा ॥

विषयः । चण्ड्यपरनामधेयदेवीमाहात्म्यस्य व्याख्यानम् ।

---

**No. 2176.** अनुमानदीधितिसारमञ्जरी । Substance, country-made paper, 18 × 2½ inches. Folia, 159. Lines, 6 on page. Extent, 8,111 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭácharya. Appearance, old. Prose. Correct.

**Anumána-didhitisára-manjarí.** Glossarial notes on Raghunátha's commentary on the Anumánakhaṇḍa of Gaṅgeśa. By Siddhántavágís'a Bhaṭṭácharya.

**Beginning.** प्रथमतः चत्वारि पत्राणि न सन्ति । संयोगादिसम्बन्धेन उपाधावव्यभिचारित्वमित्यादिदूषणमनवकाशं विशेषणतावच्छिन्नेति सौध्याव्यापकसाधनाव्यापकत्वेत्यादि ।

**End.** नीलविशिष्टधूमेऽपि विशेष्यत्वस्य उपाधेः सत्त्वेन निरुपाधिसाधनाव्यापकत्वादिति विशेष्यत्वपर्य्यन्तपाठस्य चाप्रामादिकत्वादुपेक्षितं ॥

**Colophon.** इति महामहोपाध्यायश्रीसिद्धान्तवागीशभट्टाचार्य्यविरचिता अनुमानदीधितिसारमञ्जरी समाप्ता ।

विषयः । रघुनाथशिरोमणिकृतानुमानखण्डदीधितेर्व्याख्यानम् ।

---

**No. 2177.** संस्कारपद्धतिरहस्यम् । Substance, country-made paper, 18 × 2½ inches. Folia, 88. Lines, 6 on a page. Extent, 2,519 ślokas. Character, Bengali. Date, Sk. 1575. Place of deposit, Ulá, Post Ráṇághaṭa, Zillá Nadiyá, Dínanátha Bhaṭṭácharya. Appearance, decayed. Prose and verse. Correct.

**Sañskára-paddhati-rahasya.** A commentary on Bhavadeva Bhaṭṭa's treatise on Sañskáras. By Rámanátha Vidyáváchaspati. The commentator not only explains all difficult passages, but also supplements the text with expositions of topics not therein referred to, but which are germane to the subject.

**Beginning.** पाण्डवयज्ञसदस्यं सततमुपास्यं विधीन्द्राद्यैः ।
वेदाविदितरहस्यं गिरिशनमस्यं नमस्यामः ॥
गृह्यपरिशिष्टसारं वारं वारं विचार्य्य चिन्मानः ।
सामगकर्म्मरहस्यं विद्यावाचस्पतिर्विकाशयति ॥
भवदेवीयच्छान्दोगकर्म्मानुष्ठानपद्धतौ ।
उक्तानुक्तदुरुक्तानि चिन्तयामि प्रमाणतः ॥

ग्रन्थारम्भे विघ्नविघाताय कृतं समुचितेष्टदेवतानतिरूपमङ्गलं शिष्यशिक्षार्थं प्रसङ्गादध्येत्र-ध्यापकलेखकादीनां मङ्गलसम्पत्तये ग्रन्थादौ निबध्नाति चतुर्व्वदनेति ।

**End.** इदं सर्व्वं विवेचितं श्राद्धरहस्यसंस्काररत्नरहस्येषु ।
तन्त्रं शैवर्णमिदं मत्सरवागुद्रहनदीपितं विमलं ।
तान्त्रिककरावलम्बान्मधुरधुरीणं ध्वनिं तनुते ॥
निरवद्या सदा सर्व्वविद्या यस्य पुरःसरी ।
श्रीवाचस्पतिना तेने तेनेदं तन्त्रमुत्तमं ॥
वेदवेदेषुशीतांशुगणिते शाकवत्सरे ।
भवदेवीयटीकेयं रामभाद्रेन निर्म्मिता ॥

**Colophon.** इति महामहोपाध्यायश्रीरामनाथविद्यावाचस्पतिविरचिते संस्कारपद्ध-तिरहस्ये द्वितीयः परिच्छेदः । समाप्तश्चायं ग्रन्थः ।
यथादृष्टं तथाङ्कितं लेखके नास्तिदूषणं ।
भीमस्यापि रणे भङ्गो मुनीनाञ्च मतिभ्रमः ॥
शाके वाणाचलतिथिमिते भास्करे कर्कटस्थे
विंशत्यंशे विधुसुतदिने शुक्लपक्षे च षष्ठ्यां ।
व्यालेख्येषा सहृदयजनाश्चिन्तयित्वा क्षमध्वं
दोषांश्चाचाक्षरलिपिकृतान् तत्त्वतोदूरयित्वा ॥

विषयः । भवदेवभट्टकृतसामवेदीयसंस्कारपद्धतेः अनुक्तांशपूरणपूर्व्वकं दुरुक्तांशशोधनेन व्याख्यानं ।

---

**No. 2178.** अमरकोषभाष्यम् । Substance, palm-leaf, 12 × 1½ inches. Folia, 134. Lines, 6 on a page. Extent, 4,005 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadíyá, Dínanátha Bhaṭṭáchárya. Appearance, decayed. Prose. Correct.

**Amarakosha-bháshya.** A commentary on the Námalingánusásana of Amara Siṅha. By Raghunandana S'armá, son of S'ríkṛishṇa Bhaṭṭa. The work is limited to the Manushyavarga section of the text.

**Beginning.** यं शैवाः शिवमित्युपेन्द्रमपरे पौराणिका वेधसं
सर्व्वज्ञं सुगताश्च यज्ञपुरुषं यं याज्ञिका मेनिरे ।
वेदान् वेदविदोदिगम्बरमिति द्वैतागमद्वेषिण-
स्तं ज्ञानं परमं परात्परतरं वन्दे प्रपञ्चात्परं ॥
कात्यायनव्याडि+माधवादीन् कातन्त्रतन्त्राणि विचार्य्य यत्नात् ।
श्रीराघवेन्द्रोऽमरसिंहकोषे तनोति भाष्यं सुधियां हिताय ॥

विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं विघ्नविघातकं मङ्गलमादौ निबध्नाति + + + + + + + + अभीष्टदेवतास्वरूपं मङ्गलं समाप्तिहेतुभूतमुपोद्घातसङ्गत्या शिष्योपदेशायाच यस्येति हे धीराः स आराध्यतां । तच्छब्देन विशेषणबलात् प्रसादनामालङ्कारेण विष्णुरुक्त इति भावः । इत्यादि ।

**End.** तालवृन्तमिव तालवृन्तकमिति । तालवृन्तानिलाधिकमिति कालिदासः ।

**Colophon.** श्रीश्रीकृष्णस्य भट्टस्य तनूजेन द्विजन्मना ।
निरमायि सतां प्रीत्यै भाष्यं मानुषवर्गकं ॥

**विषयः ।** अमरसिंहकृतनामलिङ्गानुशासनस्य मनुष्यवर्गान्तं व्याख्यानं ।

---

**No. 2179. दानसागरः ।** Substance, country-made paper, 19 × 4 inches. Folia, 102. Lines, 6 on a page. Extent, 2,348 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Correct.

**Dánáságara.** A treatise on the merits of religious gifts, and the proper times and modes of consecrating them, preceded by a dissertation on the Bráhmaṇ caste. By Mahárájádhirája Kámadeva, according to the colophon. It is evidently an imitation of the Dánaságara of Vallálasena. (*ante* I, p. 151.)

**Beginning** नमामि नीरदश्यामं रामं कामदमीश्वरं ।
गुरुञ्च ज्ञानदातारं तारकं भववारिधेः ॥
अथादौ दानपात्रतया ब्राह्मणप्रशंसा । तत्र मनुः ।
ब्राह्मणोजायमानोहि पृथिव्यामधिजायते ।
ईश्वरः सर्व्वभूतानां धर्म्मकोषस्य गुप्तये ॥
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ।
श्मशानेष्वपि तेजस्वी पावकोनैव दुष्यति ॥

हूयमानश्च यज्ञेषु भूय एवाभिवर्द्धते ।
एवं यद्यप्यनिष्टेषु वर्त्तते सर्व्वकर्म्मसु ॥
सर्व्वथा ब्राह्मणः पूज्योदैवतं परमं महत् । इत्यादि ।

**End.** जलदानसमं दानं न भूतं न भविष्यति ।
अतन्त्रितेण कर्त्तव्यं भुक्तिमुक्ती समिच्छता ॥

**Colophon.** इति श्रीमहाराजाधिराजनिःशङ्करभुवनज्योतिःश्रीकामदेवविरचिते दानसागरे वारिदानवर्णः ॥

विषयः । ब्राह्मणप्रशंसाकीर्त्तनं । दानप्रशंसा । दानलक्षणादिकथनं । दानपात्रापवादः । दानपरिपाटीकथनं । दानकालनिरूपणं । पुण्यदेशकथनं । देयस्वरूपविवेचनं । अमदानकथनं । प्रतिग्रहविधिः । द्रव्यदेवताकथनं । परिभाषाकथनं । तत्र नक्षत्रादिपरिभाषाकथनं । सर्व्वौषधिगणकथनं । सर्व्वगन्धगणकथनं । सर्व्वरसगणकथनं । मानपरिभाषाकथनं । महादानविधिकथनादिकं । तुलानिर्म्माणविधिः । तुलामानप्रयोगकथनं । (एवं परत्र ज्ञेयं ।) हिरण्यदानं । ब्रह्माण्डदानं । कल्पपादपदानं । गोसहस्रप्रदानं । कामधेनुदानं । हिरण्याश्वदानं । हेमहस्तिरथदानं । पञ्चलाङ्गलदानं । धरादानं । विश्वचक्रदानं । महाकल्पलतादानं । सप्तसागरदानं । रत्नधेनुदानं । महाभूतघटदानं । मेरुदानं । धान्याचलदानं । एवं लवण-गुड़-तिल कार्पास-घृत-रत्न-रौप्य-शर्कराचलदानानि । तिलधेनु-घृतधेनु-जलधेनुप्रभृतिदानं । वृषदानादिकथनं । भूमिदानादिकथनं । आसनशयनादिदानकथनं जलदानमाहात्म्यकीर्त्तनञ्च ।

---

**No 2180.** स्मृतिरत्नाकरः । Substance, country-made paper, 14 × 3½ inches. Folia, 257. Lines, 9 on a page Extent, 6,800 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Paṇḍit Rámeśvara Chúḍámaṇi. Appearance, decayed. Prose and verse. Correct.

**Smṛiti-ratnákara.** An elaborate digest of all the different topics treated of in the Smṛitis. By Vedácharya Avasathika. The author says he prepared the digest for the use of his pupils.

**Beginning.** हेतवे सर्व्वभूतानां संसाराब्धिसुसेतवे ।
गुरवे सर्व्वविद्यानां शम्भवे विभवे नमः ॥
आलोच्य सर्व्वशास्त्राणि सारमुद्धृत्य यत्नतः ।
हिताय निजशिष्याणां सङ्ग्रहः क्रियते मया ॥
नित्यनैमित्तिकाचारकर्म्माणि विविधानि च ।
सर्व्वाण्यत्र निरूप्यन्ते स्वर्गमोक्षार्थदानि च ॥

तत्र मनुः ।

आचाराल्लभते ह्यायुराचाराल्लभते सुखं । इत्यादि ।

End. अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
शुद्ध्यन्ति दशरात्रेण भूमिष्ठन्तु नवोदकं ॥ इति ॥
आसीत् पूर्व्वं सुरगुरुसमः कामरूपेऽग्रजन्मा
दृष्ट्वा रूपं प्रमुदितमनाः प्रार्थयामास पृथ्वी ।
दासं कृत्वा तदनु नृपतिर्वाक्यमुच्चैर्बभाषे
आत्मानं मे + + + + + + + + ॥
— — — — — — गान्धारीतनयस्यापि सूचय — — — । — — — —
- — ।

मातुः सपत्न्या वाक्येन सम्प्राप्य + ने पुरा ।
जात एव वने सोऽपि भाविते — — — — ॥
— — — — — — — — — यस्या-
स्यान्वद्विद्वांसः श्रुतिपथकुशला भूमिदेवा बभूवुः ।
विष्णूपाध्यायदेवात् — — — — — — — —
— — — — — — — — ।
— — — — — तेनैव शिष्योघानां कुतूहलात् ।
संचिन्त्य विस्तरं शास्त्रं ग्रन्थः सङ्कलितोऽधुना ॥

Colophon. इत्यावसथिकश्रीवेदाचार्य्यकृतौ स्मृतिरत्नाकरः परिपूर्णः ।

विषयः । सदाचारप्रशंसा । प्राभातिकपुण्यश्लोकादिस्मरणविधिः । शौचस्थाननिरूपणं । विण्मूत्रादित्यागविधिः । तत्र उपवीतस्य कर्णे निधानमेकवस्त्रविषयमिति निर्णयः । तत्र मौनस्यावश्यकता । शौचविधिः । स्थानविशेषे द्रव्यहस्तोऽपि विण्मूत्रादिकमुत्सृजेदिति कथनं । शारीरमलशौचविधिः । आचमनविधिः । सर्व्वादौ पादप्रक्षालनस्यावश्यकतानिरूपणं । आचमनीयजललक्षणं । आचमननिमित्तकथनं । क्षुतनिष्ठीवनादौ दक्षिणकर्णस्पर्शस्यावश्यकता । दन्तधावनविधिः । तत्र दन्तकाष्ठलक्षणतद्ग्रहणमन्त्रादिकथनं । प्रातरेव केशप्रसाधनं कर्त्तव्यमिति तद्विधिकथनं । कुशनिरूपणं तद्ग्रहणमन्त्रादिकथनञ्च । प्रातःस्नानविधिकथनप्रसङ्गेन तत्कालादिविवेचनं । मृत्तिकादिभिः स्नानविधिकथनं । शिखाबन्धनविधितन्मन्त्रादिकथनं । प्रातःसन्ध्याविधिः । तत्र प्राणायामविधितत्स्वरूपनिरूपणं । गायत्रीजपविधिः । प्रसङ्गान्मध्याह्नसायंसन्ध्यानिरूपणं । अशौचादिनिमित्तसन्ध्यावर्ज्जनव्यवस्थानिरूपणं । ब्रह्मयज्ञविधिः । मध्याह्नस्नानविधिः । तिलकविधिः । तत्तल्लक्षणतन्मन्त्रादिकथनञ्च । रुद्राक्षतुलस्यादिमाल्यधारणविधिः । तर्पणविधिकथनं । तत्करणपात्रनिरूपणञ्च । तत्र संक्षेपेण विधिकथनं । वैश्वदेवविधिः । तत्र होमलक्षणादिकथनं । शान्तिकरण-

